**कसाया**–कषः, संसारस्तस्मिन् आ समन्तादयन्ते–गच्छन्त्येभिरसुमन्त इति कषायाः,यद्वा कषाया इव कषायाः । उत्त० १६० । कर्षन्ति परस्परं हिंसन्ति प्राणिनोऽस्मिन्निति कषं कर्म भवो वा, अथवा कृष्यन्ते शारीरमानसदुःखलक्षैर्घृष्यन्ते प्राणिनोऽस्मिन्निति कषं कर्मैव,भव एव वा,यतो यस्मात् कषं कर्म, कषो वा भव आयो लाभो येषां ततस्ते कषायाः । कषमायन्ति यतः, अतः कषायाः–कषं–गमयन्तीत्यर्थः । विशे० ५४३ । कृषन्ति–विलिखन्ति–कर्म्मक्षेत्रं सुखदुःखफलयोग्यं–कुर्वन्ति–कलुषयन्ति वा जीवमिति निरुक्तविधिना कषायाः । ठाणा० १६३ । कलुषाः । ५८६ । कषः–संसारस्तमयन्ते गच्छन्त्येभिर्जन्तव इति कषायाः–क्रोधादयः परिणामविशेषः । जीवा० १५ ।

**कसासिव्वणी**– । नि० चू० प्र० १२७ अ ।

**कसाहीया**–मुकुलिअहिभेदविशेषः । प्रज्ञा० ४६ ।

**कसिण**–कृत्स्नः–सम्पूर्णः । आव० ४६२, ५०० । दश० २३४ । सूत्र० २७८ । व्य० द्वि० ३०१ आ । कृत्स्नः । विशे० ४२४ । भग० १४६ । व्य० प्र० ११८ आ । कृत्स्नं सर्वार्थग्राह्कत्वात् । ज्ञाता० १५३ । कृत्स्नं कृष्णं वा । उत्त० ४८५ । प्रधानभावम् । नि० चू० प्र० १३६ आ । कृष्णं । क्लिष्टम् । दश० २३४ । वण्णतो जुत्तप्पमाणा । नि० चू० तृ० ४६ अ । सदसं प्रमाणातिरिक्तं । नि० चू० प्र० १३८ आ ।

**कसिणखंध**–कृत्स्नस्कन्धः–परिपूर्णस्कन्धः । अनु० ४० ।

**कसिणधवलपडिवज्जगो**–कृष्णधवलप्रतिपत्ता । आव० ३६४ ।

**कसिणा**–यावतोऽपराधानापन्नस्तावतीनां तच्छुद्धीनामारोपणा कृत्स्नारोपणा । सम० ४७ । कृत्स्ना यत्र झोषो न क्रियते । व्य० प्र० १२४ आ ।

**कसिणाओ**–कृत्स्नाः, सम्पूर्णा अनुपहृता । आचा० ३२३ ।

**कसिणे**–घनमसृणानि यैः सूर्यो न दृश्यते । बृ० द्वि० २४० अ ।

**कसेरुगं**–वनस्पतिविशेषः । आचा० ३४८ ।

**कसेरुमती**–नदीविशेषः । व्य० प्र० २२७ आ ।

**कसेरुया**–जलरुहविशेषः । प्रज्ञा० ३३ ।

**कसेहि**–परव्यतिरिक्त आत्मा शरीरं तत् कष्टतपश्चरणादिना कृशं कुरु, यदि वा "कष" कस्मै कर्म्मणेऽलमित्येवं पर्यालोच्य यच्छक्नोषि तत्र नियोजयेरित्यर्थः । आचा० १६१ ।

**कहं**–कथा वाक्यप्रबन्धरूपा । उत्त० ४२४ । कथं–केनप्रकारेण केनान्वर्थेनेति । सूर्य० २६२ ।

**कहंतरं**–कथान्तरम् । आव० ५६२ उत्त० ४२५ । उच्चस्वरः । बृ० प्र० २१३ अ ।

**कहकह**–हसितशब्दः ।

**कहकहकं**–प्रमोदभरजनितकोलाहलम् । जं० प्र० ४१६ ।

**कहकहेंति**–कहकहायमानं–प्रहसितविशेषः । प्रश्न० ५२ ।

**कहग**–कथकः सरसकथाकथनेन श्रोतृरसोत्पत्तिकारकः । जं० प्र० १२३ । कथकः । अनु० ४६ ।

**कहणविहि**–कथनविधिः, कथनप्रकारः । आव० ८६२ ।

**कहणविही**–कथनविधिः, कथनप्रकारः । आव० ८०३ ।

**कहणा**–धर्मकथालब्धिसंपन्नः । ओघ० ६३ । कथना–कथनम् । आव० २३४ ।



Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

**कहरत्तो**-कथासु रक्तः-सक्तः कथारक्तः। ओघ० १२७।

**कहल्लो**-कभेल्लः-कर्परः। अन्त० १२।

**कहा**-संयमाराधनी या वाग्योगप्रवृत्तिः। बृ० द्वि० ४० अ। वाइगजोगेण संयमाराहणी कहा। नि० चू० तृ० १ आ। साधूवादं जल्पं वितडं वा एता तिण्णिवि कहा। नि० चू० प्र० २४० अ। आख्यानकानि। सम० ११८। वचनपद्धतिः, चरित्रवर्णनरूपा वा। ठाणा० १५६। ब्रह्मचर्यगुप्तेर्भेदः। आव० ५७२। कथा-वाक्यप्रबन्धः शास्त्रम्। सम० ५५। कथा-वार्त्ता। दश० ११४।

**कहाहिगरणाइं**-कथा-राजकथादिका-अधिकरणानि च यन्त्रादीनि कलहा वा कथाधिकरणानि। सम० ५५।

**कहिंथ**-कुत्रात्र। उत्त० १६२।

**कहिय**-कथितं-प्रबन्धेन प्रतिपादितम्। उत्त० ३४१।

**कहियाइओ**-कथितवान्। आव० २३७।

**कांक्षा**-ऐहलौकिकपारलौकिकेषु विषयेष्वाशंसा। तं०७१८।

**कांचणय**-यस्मादुत्पलादीनि काञ्चनप्रभाणि काञ्चननामानश्च देवास्तत्र परिवसन्ति ततः काञ्चनप्रभोत्पलादियोगात् काञ्चनकाभिधदेवस्वामिकत्वाच्च सः काञ्चनकः। जीवा० २६१।

**कांचणिया**-काञ्चनिका-राजधानीविशेषः। जीवा० २६२।

**कांजिक**-जहण्णेणं ज्ञावे कोदवोदणो जूहं, च तंदुलोदकं मुद्गरसो। नि० चू० प्र० ३२६ आ।

**काइआण**-निकाय। जं० प्र० ७५।

**काइओ**-कायिकः। आव० ७७८।

**काइमाईया**-गुच्छविशेषः। प्रज्ञा० ३२।

**काइय**-कायिकी-प्रश्रवणम्। आव० ६३४।

**काइयसमाहि**-कायिकीसमाधिः। आव० ६१८।

**काइया**-चीयत इति कायः-शरीरं तत्र भवा तेन वा निर्वृता कायिकी, क्रियायाः प्रथमो भेदः। भग० १८१। आव० ६११। चीयते इति कायः शरीरं काये भवा कायेन निर्वृत्ता कायिकी। प्रज्ञा०४३५। क्रियाः-व्यापारविशेषाः, तत्र कायेन निर्वृत्ता कायिकी कायचेष्टेत्यर्थः। सम०१०।

**काइयामत्तो**-कायिकीमात्रकम्। आव० ६३३।

**काईया**-कायिकी। आव० ५६।

**काउंबरि**-कादुम्बरि बहुबीजकवृक्षविशेषः। प्रज्ञा० ३२।

**काउंबरिय**-वृक्षविशेषः। भग० ८०३।

**काउंबरो**-काकोदुम्बरः-खादिमवृक्षविशेषः। आव० ८२८।

**काउज्जुय**-कायर्जुकः-कायेन ऋजुरेव ऋजुकः। उत्त० ५६०।

**काउज्जुयया**-ऋजुकस्य-अमायिनो भावः कर्म्म वा ऋजुकता कायस्य ऋजुकता कायर्जुकता। ठाणा० १६६।

**काउड्डावणे**-कार्याकर्षणहेतुः। ज्ञाता० १८८।

**काउदर**-काकोदरः-दर्वीकरसर्पविशेषः। प्रश्न० ८।

**काउय**-कपोतः-बहुकृष्णरूपः। प्रज्ञा० ८०।

**काउलेसा**-कपोतलेश्या-कपोतवर्णा लेश्या-धूम्रवर्णा। ठाणा० १७५।

**काउस्सग्गो**-कायस्योत्सर्गः कायोत्सर्गः। आव० ७७८।

**काऊ**-लोहे धम्यमाने यादृक् कपोतः-बहुकृष्णरूपोऽग्नेर्वर्णः। जीवा० १०३। लेश्या कायवान्। आचा० २३१।

**काऊअगणि**-कृष्णाग्निः। सम० १३६।

**काऊअगणिवण्णाभा**-कृष्णाग्निर्लोहादीनां ध्यायमानानां तद्वर्णवदाभा येषां ते कृष्णाग्निवर्णाभाः। सम० १३६।

**काए**-कायः-शरीरं, देहः, बोन्दी, चयः, उपचयः, सङ्घातः, उच्छ्रयः, समुच्छ्रयः, कडेवरं, भस्त्रा, तनुः, पाणुरिति। आव० ७६७। पर्यायः, सामान्यरूपो निर्विशेषणो जी वत्वलक्षणः विशेषरूपो नैरयिकत्वादिलक्षणः। प्रज्ञा० ३७५। अष्टाशीतौ पञ्चत्रिंशत्तमो ग्रहः। जं० प्र० ५३८। कापोतिका। बृ० द्वि० १०१ अ। काकः-वायसः। ज्ञाता० २०५। कावोडी। नि० चू० प्र० १८७ अ। कवोडी। नि० चू० द्वि० १८ अ। अष्टाशीत्यां पञ्चत्रिंशत्तमो महाग्रहः। ठाणा० ७९। कुहणविशेषः। प्रज्ञा० ३३।

**काओ**-कायः, जीवस्य विवक्षितः सामान्यरूपो विशेषरूपो वा पर्यायविशेषः। जीवा० १४०।

**काओअरा**-दर्वीकरसर्पविशेषः। प्रज्ञा० ४६।

**काओली**-साधारणबादरवनस्पतिकायविशेषः। प्रज्ञा० ३४।

**काकंदी**-काकंदी-सुविधिनाथजन्मभूमिः। आव० १६०।

**काकंधे**-अष्टाशीत्यां महाग्रहे षट्त्रिंशत्तमः। ठाणा० ७९।

**काक**-भिक्षायां दृष्टान्तः। व्य० प्र० १६३ आ।

**काकजंघा**-काकजंघा-वनस्पतिविशेषः। सा हि परिहृत्य-



Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

मानस्नायुका-स्थूलसन्धिस्थाना च भवति इति तया जङ्घ-योरुपमानम् । अनुत्त० ४ ।

**काकणि**-क्षत्रियभाषया राज्यम् । विशे० ४१० ।

**काकणिरयणे**-चक्रवर्त्तिनः सप्तमेकेन्द्रियरत्नम् । ठाणा० ३९८ ।

**काकणी**-सूक्ष्मकण्ठगीतध्वनिः । ठाणा० ४७१ ।

**काकतालीयम्**-अवितर्कितसम्भवः, न्यायविशेषः । आचा० १८ ।

**काकधट्टो**-काकधृष्टः । आव० ५५४ ।

**काकनः**-पञ्चमं महाकुष्टम् । प्रश्न० १६१ ।

**काकनाद**-कुष्ठविशेषः । आचा० २३५ ।

**काकमुख**-रथाग्रभागः । जं० प्र० २४६ ।

**काकपद**-मणिलक्षणविशेषः । जं० प्र० १३८ ।

**काकलि**-वनस्पतिविशेषः । भग० ८०३ ।

**काकली**-मनोज्ञगीतादि । उत्त० ६३३ । सूक्ष्मकण्ठ-गीतध्वनिः । ठाणा० ४७२ ।

**काकस्सर**-श्लक्ष्णाश्रव्यस्वरम् । ठाणा० ३९६ । जं० प्र० ४० ।

**काकिणी**-राज्यम् । बृ० द्वि० १५४ अ ।

**काकुः**- । जीवा० २६१ । प्रज्ञा० २४७ ।

**काकुद**-तालुकः । जं० प्र० ११३ । जीवा० २७३ ।

**काकुपाठः**- । भग० ३३ ।

**काकुयं**-काकुदं-तालु । प्रश्न० ८२ ।

**काकोदरो**-काकोदरः, दर्वीकरसर्पविशेषः । जीवा० ३९ ।

**काकोली**-साधारणवनस्पतिविशेषः । आचा० ५७ ।

**कागंदी**-काकन्दी-नगरीविशेषः । खेमतेऽवि गाहावती-नगरी । अन्त० २३ । जितशत्रुराजधानी । अनुत्त० २ । भद्रसार्थवाहीस्थानम् । अनुत्त० ८ ।

**कागंदीए**-काकन्दीनगरी तद्भवः । ज्ञाता० १६३ ।

**कागजंघ**-जहिं मणीपडितो तलागे तत्थ रत्ताणि जाणि-ताणि कायाणि भण्णंति । नि० चू० प्र० २५४ आ ।

**कागणि**-कार्कणि-क्षत्रियभाषया राज्यम् । विशे० ४०६ ।

**कागणिमंसं**-काकणीमांसं श्लक्ष्णमांसखण्डम् । औप० ८७ । काकणीमांसं-तद्देहोत्कृत्त ह्रस्वमांसखण्डम् । विपा० ४७ । श्लक्ष्णखण्डपिशितम् । प्रश्न० ५९ ।

**कागणिरयणं**-काकणीरत्नम् । चक्रिणो रत्नविशेषः । जं० प्र० २३६ ।

**कागणिलक्खण**-द्वासप्ततौ कलायां द्वाचत्वारिंशत्तमा । ज्ञाता० ३८ ।

**कागणी**-रज्जं । नि० चू० प्र० २४३ आ । काकणी, चक्रिणो रत्नविशेषः । जं० प्र० १३८ । सपादा गुञ्जा । अनु० १५५ । रुप्पमयं । नि० चू० प्र० ३३०अ ।

**कागणीरयणे**-काकणीरत्नम्-सुवर्णाष्टकनिष्पन्नम् । अनु० १७१ ।

**कागभुत्तं**-काकभुक्तं. यथा काक उच्चित्योच्चित्य विष्ठादे-र्मध्याद्वल्लादि भक्षयति,विकिरति वा काकवत्सर्वं, काकव-देव कवलं प्रक्षिप्य मुखे दिशो विप्रेक्षते । ओघ० १९२ ।

**कागलि**-वल्लीविशेषः । प्रज्ञा० ३२ ।

**कागवन्नो**-काकवर्णः-शिल्पसिद्धदृष्टान्तः जितशत्रोरपर-नाम । आव० ४१० ।

**कागस्सर**-काकस्वरं श्लक्ष्णाश्रव्यस्वरम् । अनु० १३२ । श्लक्ष्णस्वरेण काकस्वरम् । जीवा० १९४ ।

**कागा**-लोमपक्षिविशेषः । प्रज्ञा० ४९ ।

**कागिणी**-काकिणिः-विंशतिकपर्दकाः । उत्त० २७२ । चक्रवर्त्तिरत्नम् । उत्त० ६५०, २७६ ।

**कागिणीमंसगं**-काकिणीमांसकं-श्लक्ष्णमांसखण्डम् । सूत्र० १२५ । श्लक्ष्णमांसम् । आव० ६५१ ।

**कागो**-काकः-वायसः । आव० ८५९ ।

**काङ्क्षावान्**-गृद्धः-मूर्छितः । आव० ५८७ ।

**काच**-काचः-पाषाणविकारः । औप० ९३ ।

**काचनं**-बन्धनम् । ठाणा० २२२ ।

**काञ्चनकाभिधान**- । ठाणा ३२७ ।

**काञ्चनासंविधानकं**- । प्रश्न० ८९ ।

**काञ्जिकं**-आरनालं । बृ० प्र० २६७ आ । सौवीरकम् । ठाणा० १४८ । अम्लम् । ठाणा० ४९२ । आरनालम् । ओघ० १५४ ।

**काञ्जिकपत्रं**-काञ्जिकेन बाष्पितम् । बृ० प्र०२६७ आ ।

**काञ्जिका**-आरनालम् । ओघ० २१५ ।

**काडिअं**-कौट्यौ, उभयप्रान्तौ । जं० प्र० २०१ ।

**काण**-काणः, भग्नाक्षः, स्फुटितनेत्रः । दश० २१५ ।



Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

आच० ३८९ ।

**काणओ**-चक्षुर्विकलः । बृ० द्वि० ११९ अ ।

**काणकक्रयी**-बहुमूल्यमपि अल्पमूल्येन चौराहृतं काणकं हीनं कृत्वा क्रीणातीत्येवंशीलः । प्रश्न० ५८ ।

**काणक्रयेण**- । उपा० ७ ।

**काणगं**-व्याधिविशेषात्सच्छिद्रम् । आचा० ३४९ ।

**काणग**-काणकः-चोरितमहिषः । व्य० प्र० २३१ आ ।

**काणगमहिसो**-जो चारिओ स काणगमहिसो । नि० चू० द्वि० ४३ आ ।

**काणच्छि**-काणाक्षः । नि० चू० प्र० २५७ अ । काणाक्षः । आव० २१८ । काणाक्षि । आव० २१८ ।

**काणण**-सामान्यवृक्षजातियुक्तानि नगराभ्यर्णवर्त्तीनि । स्त्रीणां पुरुषाणां वा केवलानां परिभोग्यानि वा । येभ्यः परतो भूधरोऽटवी वा तानि सर्वेभ्योऽपि वनेभ्यः पर्यन्तवर्तीनि वा । शीर्णवृक्षकलितानि वा । अनु० १५९ । स्त्रीपक्षस्य पुरुषपक्षस्य चैकतरस्य भोग्येषु वनविशेषेषु अथवा-यत्परतः पर्वतोऽटवी वा भवति तानि काननानि । ज्ञाता० ६७ । नगराद् दूरवर्त्ति वनखण्डः । भग० ४८३ । काननं-बृहद्वृक्षाश्रयैर्वनम् । उत्त० ४५१ । सामान्यवृक्षवृन्द नगरासन्नं काननम् । राज० ११२ । काननं सामान्यवृक्षवृन्दं नगरासन्नम् । जीवा० २५८ । सामान्यवृक्षोपेतं नगरासन्नं च । प्रश्न० १२७ । सामान्यवृक्षोपेतनगरासन्नवनविशेषः । प्रश्न ७३ । दूरवर्त्तिवनम् । आव० ५६८ । सामान्यवृक्षसंयुक्तं नगरासन्नं वनम् । भग० २३८ । सामान्यवृक्षवृन्दयुक्तानि नगरासन्नानि काननानि । ज्ञाता० ३६ ।

**काणयं**-काणकं-हीनम् । प्रश्न० ५८ ।

**काणव**-वनस्पतिविशेषः । भग० ८०३ ।

**काणिट्ठ**-लोहमय्य इष्टकाः । व्य० द्वि० १०६ आ । पाषाणमय्यः पक्वेष्टिका वा बलिका महत्यश्च कणिका, तन्मयगृहकारापकः । बृ० तृ० ५० आ ।

**काणियं**-काणितम् । आव० ३९६ । अक्षिरोगः । आचा० २३३ ।

**काणो**-काणः-दीपकाणः, फरलः । प्रश्न० २५ ।

**काण्डं**-धनुः । भग० ९३ ।

**काण्डकरणं**-उपकरणविशेषरूपम् । विशे० १२५९ ।

**कातिता**-कायिकी, कायचेष्टा । ठाणा० ३१७ ।

**कातिते**-कायिकं-शारीरिकम् । इडापिङ्गलादि प्राणतत्वम् । ठाणा० ४५२ ।

**कादंबक**-कादम्बाः, हंसविशेषाः । प्रश्न० ८ ।

**कादम्बा**-गन्धर्वभेदविशेषः । प्रज्ञा० ७० ।

**कादूसणिया**-कम्-आत्मानं दूषयति तमस्कायपरिणामेन परिणमनात् कदूषणा सैव दूषणिका । भग० २६९ ।

**काननं**-अरण्यम् । दश० १४७ ।

**काननद्वीपः**-जलपत्तनम् । उत्त० ६०५ ।

**कापालिक**-दृष्टान्तविशेषः । नि० चू० प्र० १८० अ । चरगविसेसो । नि० चू० तृ० ३१ अ ।

**कापालिका**-अस्थिका । व्य० प्र० २०६ अ ।

**कापिशायितं**-मद्यविशेषः । जीवा० २६५ ।

**कापिशायणं**-कापिशयनं-मद्यविशेषः । जीवा० ३५१ ।

**कापुरिसा**-कापुरुषाः, कुत्सितनराः । ज्ञाता० ५० ।

**कापोती**-भारकायः, क्षीरभृतकुम्भद्वयोपेता कापोती भण्यते। आव० ७७० ।

**काम**-शब्दरूपगन्धाः । आव० ८२५ । काम्यमानत्वात् कामाः-मनोज्ञशब्यादयः । उत्त० ३१८ । विषयाः । उत्त० २७७ । स्त्रीसंगः । उत्त० २४३ । मैथुनसेवा । जीवा० १७३ । मनोज्ञशब्यादिकः । उत्त० १८८ । लोमपक्षिविशेषः । जीवा० ४१ । इच्छानङ्गरूपः कामः । आचा० ८९ । इच्छाकामः-अप्राप्तवस्तुकाङ्क्षारूपः । उत्त० ६६४ । स्वेच्छा । प्रज्ञा० ९६ । इच्छा । आव० ३६५ । रोगः । दश० ८६ । वाञ्छामात्रम् । भग० ८९ । मदनाभिलाषः । ठाणा० २९१ । इच्छा-अनुमतो वा । नि० चू० प्र० ७९ अ । अभिधारियो-अनुमयो वा । नि० चू० प्र० १४ आ । अवधृतार्थे द्रष्टव्यः । नि० चू० प्र० २३३ अ० । कामं-अनुमतम् । आव० ५२७ । सम्मतम् । पिण्ड० ४५ । अभ्युपगमः । सूत्र० ५३ । विमानविशेषः । जीवा० १३८ । तवेच्छया । आवा० ४०३ । कामशब्दः-मकरध्वजे अवधृतौ च । व्य० प्र० १४५ अ । कामौ-शब्दरूपे । उपा० ८ । कामः-इच्छा-मदनभेदभिन्नो विषयः । आव० ६६२ ।



Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

**कामकंतं**–कामकान्तं–विमानविशेषः । जीवा० १३८ ।

**कामकमा**–कामः–अभिलाषस्तेन क्रामन्तीति कामक्रमाः । उत्त० ४१० ।

**कामकहा**–कामकथा–रूपं सुन्दरं, वयश्चोदग्रं, वेषः उज्वलः, दाक्षिण्यं, मार्दवं, शिक्षितं च विषयेषु, शिक्षा च कलासु दृष्टमद्भूतदर्शनमाश्रित्य श्रुतं चानुभूतं च संस्तवः परिचयश्चेति कामकथा । दश० १०६, १०७ ।

**कामकामे**–कामकामः–कामेन–स्वेच्छया कामो–मैथुनसेवा यस्य सः–अनियतकाम इति । प्रज्ञा० ९६ ।

**कामकूडं**–कामकूटं–विमानविशेषः । जीवा० १३८ ।

**कामगद्दहो**–कामगर्दभः–मैथुने गर्दभ इवात्यन्तासक्तो जनः । पिण्ड० १३१ ।

**कामगम**–कामगमः–विमानविशेषः । औप० ५२ । कामगमः–स्वेच्छाचारी । प्रज्ञा० ९६ । कामगमः–यानविमानविकुर्वको देवविशेषः । जं० प्र० ४०५ ।

**कामगुण**–काम्यन्त इति कामाः–शब्दरूपरसगन्धस्पर्शास्त एव स्वस्वरूपगुणबन्धहेतुत्वाद् गुणाः कामगुणाः । आव० ६१५ । कामस्य–मदनाभिलाषस्य अभिलाषमात्रस्य वा सम्पादका गुणाः–धर्म्माः पुद्गलानां, काम्यन्त इति कामाः ते च ते गुणाश्चेति वा कामगुणाः । ठाणा० २६१ । शब्दादयः । प्रश्न० ९७ । काम्यन्ते–अभिलाषन्ते इति कामास्ते च ते गुणाश्च पुद्गलधर्माः–शब्दादय इति कामगुणाः, कामस्य वा मदनस्योद्दीपका गुणाः कामगुणाः शब्दादय इति । सम० ११ । कामगुणम् । आव० २०० । कामगुणः । मकरकेतुकार्यम् । अब्रह्मणस्त्रिंशत्तमं नाम । प्रश्न० ६६ । आचा० ९९ । भग० ६६४ ।

**कामजलं**–स्नानपीढम् । आचा० ३९७ । ण्हाणपीढं । नि० चू० द्वि० ८३ आ ।

**कामजाए**–मनोज्ञशब्दादीनां प्रकारः समूहो वा । उत्त० २६१ ।

**कामज्झयं**–कामध्वजं, विमानविशेषः । जीवा० १३८ ।

**कामज्झया**–कामध्वजा–वणिग्ग्रामे गणिका । विपा० ४५ ।

**कामड्ढितगणे**–महावीरस्य नवगणेषु सप्तमः । ठाणा० ४५१ ।

**कामत्थिआ**–कामार्थिनः मनोज्ञशब्दरूपार्थिनः । जं० प्र० २६७ । शब्दरूपार्थिनः । ज्ञाता० ५८ ।

**कामदेव**–उपासकदसायां द्वितीयमध्ययनम् । उपा० १ । येन श्रुते सामायिकमवाप्तम् । आव० ३४७ ।

**कामध्वजगणिका**–गणिकाविशेषः । ठाणा० ५०७ ।

**कामप्पभं**–कामप्रभं विमानविशेषः । जीवा० १३८ ।

**कामफासे**–कामस्पर्शः–अष्टाशीतौ ग्रहे सप्तचत्वारिंशत्तमः । जं० प्र० ५३५ ।

**कामभोग**–काम्यन्त इति कामाः, भुज्यन्त इति भोगाः, ततश्च कामाश्च ते भोगाश्च कामभोगाः–अभिलषणीयशब्दादयः, यद्वा कामौ च शब्दरूपाख्यौ भोगाश्च स्पर्शरसगन्धाख्याः कामभोगाः । उत्त० २४३ । कामः–इच्छा भोगाः शब्दाद्यनुभवाः कामप्रतिबद्धा वा भोगाः कामभोगाः । आव० ३६५ । कामेषु–स्त्रीसङ्गेषु, भोगेषु धूपनविलेपनादिषु सः । उत्त० २४३ । कामौ च शब्दरूपलक्षणौ भोगाश्च गन्धरसस्पर्शाः कामभोगाः, अथवा काम्यन्त इति कामाः–मनोज्ञास्ते च ते भुज्यन्त इति भोगाः–शब्दादयः ते कामभोगाः । ठाणा० १४३ । कामभोगः–शब्दादिभोगो मदनसेवा वा । औप० ४३ । भग० ६२५ । कामौ च शब्द रूपे भोगाश्च गन्धरसस्पर्शाः कामभोगाः, अथवा काम्यन्त इति कामा मनोज्ञा ते च ते भुज्यन्त इति भोगाश्च शब्दादय इति कामभोगा । ठाणा० ९९ । कामभोगः, मदनकामप्रधानः शब्दादिविषयः विपाककटुश्च । दश० २७२ ।

**कामभोगतिव्वाभिलासे**–काम्यन्त इति कामाः शब्दरूपगन्धा भुज्यन्त इति भोगाः–रसस्पर्शाः कामभोगेषु तीव्राभिलाषः तदध्यवसायित्वं कामभोग तीव्राभिलाषः । आव० ८२५ ।

**कामभोगमारो**–कामभोगैः सह मारो–मदनः मरणं वा कामभोगमारः–अब्रह्मण एकविंशतितमं नाम । प्रश्न० ६६ ।

**कामभोगरसगिद्धो**–कामभोगरसगृद्धः–कामभोगेषु अभिहित स्वरूपेषु रसः–अत्यन्तासक्तिरूपस्तेन गृद्धास्तेष्वभिकाङ्क्षावान् । उत्त० २९५ ।

**कामभोगासंसप्पओगे**–कामभोगाशंसाप्रयोगः–कामभोगाभिलाषप्रयोगः । आव० ८३९ ।

**काममहावण**–वनविशेषः । भग० ६७५ ।

**काममहावणे**–काममहावनं–वाणारस्यां चैत्यविशेषः अन्त० २५ । ज्ञाता० २५१ ।



Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

**कामरए**-कामलक्षणं रजः कामरजः । कामरतः । कामानुरागः । भग० ४८३ ।

**कामरुवविउव्विणो**-कामरूपविकरणाः, यथेष्टरूपाभिनिर्वृत्तनशक्तिसमन्विताः । उत्त० १८७ ।

**कामरुविणो**-कामरूपिणः-कामः-अभिलाषस्तेन रूपाणि कामरूपाणि तद्वन्तः-विविधवैक्रियशक्त्यन्विताः । उत्त० २५२ ।

**कामल**-और्णिकं, वस्त्रम् । व्य० द्वि० १६२ अ ।

**कामलालसा**-विषयलम्पटाः । उत्त० ५३० ।

**कामलेसं**-कामलेश्यं-विमानविशेषः । जीवा० १३८ ।

**कामवन्नं**-कामवर्णं-विमानविशेषः । जीवा० १३८ ।

**कामविणए**-शब्दादिविषयसम्पत्तिनिमित्तं तथा तथा प्रवर्तनं कामविनयः । उत्त० १७ ।

**कामवृक्षः**-वृक्षोपरिजातो वृक्षः । सूत्र० ३५२ ।

**कामसमणुन्ने**-कामसमनोज्ञः कामाः-इच्छामदनरूपाः सम्यग् मनोज्ञा यस्य स, अथवा सह मनोज्ञैर्वर्त्तत इति समनोज्ञः, कामैः सह मनोज्ञः कामसमनोज्ञः, यदिवा कामान् सम्यगनु-पश्चात् स्नेहानुबन्धाज्जानाति सेवत इति कामसमनुज्ञः । आचा० १२५ ।

**कामसिंगारं**-कामशृङ्गारं-विमानविशेषः । जी० १३८ ।

**कामसिट्ठं**-कामशिष्टं-विमानविशेषः । जीवा० १३८ ।

**कामा**-काम्यन्त इति कामाः स्त्रीगात्रपरिष्वङ्गादयः । सूत्र० २६५ । इच्छामदनरूपाः,गन्धालङ्कारवस्त्रादिरूपा वा । सूत्र० १८४ ।

**कामावत्तं**-कामावर्तं-विमानविशेषः । जीवा० १३८ ।

**कामावसयिता**- । सूत्र० १८४ ।

**कामासंसपओग**-कामाशंसाप्रयोगः- शब्दादावभिलाषकरणः । ठाणा० २७५ ।

**कामिंजुया**-लोमपक्षिविशेषः । प्रज्ञा० ४६ ।

**कामिकतीर्थं**-लौकिकतीर्थम् । विशे० ४१० ।

**कामियसर**-सरःविशेषः । बृ० प्र० ४७ आ ।

**कामी**-पंचविसया कामेतित्ति कामी । नि० चू० द्वि० १६० अ ।

**कामे**-कामयते-सेवते । दश० १६८ ।

**कामेयगो**-लोमपक्षिविशेषः । जीवा० ४१ ।

**कामोत्कोचकारि**- । प्रश्न० १४१ ।

**कामोत्तरावडिसए**-कामोत्तरावतंसकः, विमानविशेषः । जीवा० १३८ ।

**काम्पिल्य**-अङ्गदेशे नगरी । ज्ञाता० १२५ । पञ्चाला यत्र काम्पिल्यं-नगरम् । ज्ञाता० १२५ ।

**काम्पिल्यपुरं**-द्रुपदराजधानी । प्रश्न० ८७ ।

**कायंदी**-काकन्दी, पुरुषपुण्डरीकवासुदेवनिदानभूमिः । आव० १६३ । नगरीविशेषः । भग० ५०१ ।

**काय**-जीवस्य निवासात् पुद्गलानां चितेः पुद्गलानामेव केषाञ्चित् शरणात्, तेषामेवावयवसमाधानात् कायः-शरीरम् । आव० ४५६ । भूमिस्फोटकविशेषः । आचा० ५७ । औदारिकादित्रयं घातिचतुष्टयं वा, अथवा-चीयत इति कायः । आचा० २५८ । प्रचयः । ठाणा० २१७ । निकायः । उत्त० ६६० । महाकायः । सूत्र० २७७ । कायः-राशिः । प्रदेशराशिः । भग० १४८ । निजदेहः । आव० ५४७ । कापोती, यया स्कन्धारुढया पुरुषाः पानीयं वहन्ति । पिण्ड० ३६ । चीयत इति कायः निकाय इति । उत्त० १८२ । गणः निकायः स्कन्धः वर्गः राशिः । विशे० ४१६ । कागः, काकविद्या । आव० ३१८ । गणः, निकायः स्कन्धः वर्गः राशिः पुञ्जः पिण्डः निकरः-सङ्घातः आकुलः समूहः । विशे० ४२६ । कायिकाभूमि गृहस्थसंबद्धां पश्यति । ओघ० ५६ । निकायः, पृथिव्यादिसामान्यरूपः । ठाणा० ६७ । औदारिकादिः शरीरः पृथिव्यादिषट्कायान्यतरो वा । भग० ३४७ । वंसो । दश० चू० १३१ । द्विपदादीनां प्रतिरूपम् । बृ० तृ० ६८ आ ।

**कायकालः**-कायस्थितिः । ठाणा० ३ ।

**कायकिलेसो**-कायक्लेशः-बाह्यतपो विशेषः । वीरासनादिभेदरूपः । दश० २६ । बाह्यतपःपञ्चमभेदः । भग० ६२१ ।

**कायकोक्कुईया**-कायकौकुच्यम्, यत्स्वयमहसन्नेव भ्रूनयनवदनादि तथा करोति यथाऽन्यो हसति । उत्त० ७०६ ।

**कायकोडिया**-काचो-भारोद्वहनं तस्य कोटी-भागः काचकोटी तथा ये चरन्ति काचकोटिकाः । ज्ञाता० १५२ ।

**कायकं**-काचकं-कचकवृक्षफलम् । आव० ५३० ।



Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

**कायगुत्ती**–गमणागमणपचलणादाणण्णसणप्फंदणादिकिरिया-णगोवणं कायगुत्ती । नि० चू० प्र० १७ अ ।

**कायगुप्तिः**–शायनासनादाननिक्षेपस्थानचंक्रमणेषु कायचेष्टा-नियमः । तत्त्वा० ६–४ ।

**कायगो**–क्रायकः । आव० ६७ ।

**कायजोग**–काययोगः–औदारिकादिशरीरयुक्तस्यात्मनो वीर्य-परिणतिविशेषः । आव० ६०६ ।

**कायछक्कं**–कायषट्कं कायानां पृथिव्यादीनां षट्कं । सम्य-गनुपालनविषयतया ऽनगारगुणाः । आव० ६६० ।

**कायट्ठिई**–कायो नाम जीवस्य विवक्षितः सामान्यरूपो विशेषरूपो वा पर्यायविशेषस्तस्मिन् स्थितिः कायस्थितिः, यस्य वस्तुनो येन पर्यायेण जीवत्वलक्षणेन पृथिवीकायादि-त्वलक्षणेन वाऽऽदिश्यते व्यवच्छेदेन यद्भवनं सा । जीवा० १४० ।

**कायट्ठिति**–काये–निकाये पृथिव्यादिसामान्यरूपेण स्थितिः–कायस्थितिः असङ्ख्योत्सर्पिण्यादिका । सप्ताष्टभवग्रहणरूपा । ठाणा० ६६ । काय इव कायः । तत्र सामान्यरूपो निर्वि-शेषणो जीवत्वलक्षणः, विशेषरूपो नैरयिकत्वादिलक्षण-स्तस्य स्थितिः-अवस्थानं कायस्थितिः । सामान्यरूपेण विशे-षरूपेण वा पर्यायेणादिष्टस्य जीवस्य यदव्यवच्छेदेन भवनं सा । प्रज्ञा० ३७५ ।

**कायठिई**–कायस्थितिः–काय इति पृथिवीकायस्तस्मिन् स्थितिः ततोऽनुद्वर्तनेनावस्थानम् । उत्त० ६६० । आचा० ८८ । कायकालः । ठाणा० ३ । कायस्थितिः–प्रज्ञापनायामष्टा-दशं पदम् । भग० ३५७ । प्रज्ञा० ६ । जीवा० १४१ ।

**कायणुवाए**–जहा दगतीरे असंवसंवातिमेसु कायगुवाए । नि० चू० तृ० १४८ आ ।

**कायतिगिच्छा**–कायस्य–ज्वरादिरोगग्रस्तस्य चिकित्सा प्रति-पादकं तन्त्रं कायचिकित्सा । ठाणा० ४२७ ।

**कायदुक्कड**–कायदुष्कृतः–आसन्नगमनादिनिमित्ता । आव० ५४८ ।

**कायदुप्पणिहाणे**–कायदुष्प्रणिधानम्–कृतसामायिकस्याप्रत्यु-पेक्षितादिभूतलादौ करचरणादीनां देहावयवानामनिभृतस्था-पनम् । आव० ८३४ ।

**कायपरित्तो**–कायपरीत्तः प्रत्येकशरीरी । जीवा० ४४६ ।

**कायपरीते**–कायपरीतः यः प्रत्येकशरीरी स । प्रज्ञा० ३६४ । प्रत्येकशरीरी । प्रज्ञा० १३६ ।

**कायबलिआ**–कायबलिकाः-क्षुधादिपरीषहेष्वग्लानीभवत्का-याः । औप० २८ ।

**कायबलिय**–कायबलिकाः परीषहापीडितशरीरः । प्रश्न० १०५ ।

**कायभव**–काये–जनन्युदरमध्यव्यवस्थितनिजदेह एव यो भवः जन्म सः कायभवः । भग० १३३ ।

**कायभावो**–काचभावः–काचधर्मः । आव० ५२१ ।

**कायमओ**–काचमयः । आव० ५५६ ।

**कायमणिआ**–काचमणि–कायः । आव० ७६६ ।

**कायमणियओमोसे**– । ओघ० २२३ ।

**कायमणीय**–काचमणिकः–कुत्सितः काचमणिः । आव० ५२१ ।

**कायमाणं**–कायमानम् । ओघ० ४६ ।

**कायमाणमंडवो**– नि० चू० प्र० २३० अ ।

**काययोगः**–औदारिकादिशरीरयुक्तस्यात्मनो वीर्यपरिणति-विशेषः । आव० ५८३ ।

**कायरए**–आजीविकोपासकः । भग० ३७० ।

**कायराः**–कातराः–परीषहोपसर्गोपनिपाते सति विषयलो-लुपा वा । आचा० १५३ । चित्तावष्टम्भवर्जिताः । ज्ञाता० ५२ ।

**कायरिए**–वरुणस्य पुत्रस्थानीयो देवः । भग० १९९ ।

**कायरिया**–कातरिका–माया । सूत्र० ५७ ।

**कायवरो**–काचवरः–प्रधानकाचः । प्रश्न० १५३ ।

**कायविसए**–कायाणि–कायविसए । नि०चू०प्र०२५४आ

**कायसंकिलेसे**–कायमाश्रित्य सङ्क्लेशः–असमाधिः काय-संङ्क्लेशः । ठाणा० ४८६ ।

**कायसंवेहो**–विवक्षितकायात्–कायान्तरे तुल्यकाये वा गत्वा पुनरपि यथासम्भवं तत्रैवागमनम् । भग० ८०६ ।

**कायसंसिओ**–कायसंसृतः–देहसङ्गतः । दश० १२७ ।

**कायसुखता**–काये सुखं–यस्यासौ कायसुखस्तद्भावः काय-सुखता । प्रज्ञा० ४६२ ।

**कायस्वभावः**–अनित्यता दुःखहेतुत्वं निःसारता अशुचि-त्वम् । त० ७–७ ।

**कायाणि**–जहिं मणी पडितो तलागे तत्थ रत्ताणि जाणि



Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

ताणि कायाणि भण्णंति । दुते वा काये रत्ताणि कायाणि । नि० चू० प्र० २५४ आ । क्वचिद्देशे इन्द्रनीलवर्णः- कर्पासो भवति तेन निष्पन्नानि कायकानि । आचा० ३६४।

**कायापरीत्तः**-साधारणशरीरी । जीवा० ४४६ ।

**कायिका**-उच्चारभूमिः । आव० ७८१ । प्रश्रवणम् । आव० ७६८ ।

**कारं**-राजदेयं द्रव्यम् । भग० ४८१ ।

**कारंडग**-कारण्डकः-पक्षिविशेषः । प्रश्न० ८ ।

**कार**-वैयावृत्यादिकरणः । बृ० प्र० ४३ अ, ५२ आ ।

**कारओ**-कारकः । विधायकः । उत्त० ३१३ ।

**कारक**-हेतुः । नं० १६५ । सम्यक् । विशे० १०६४ कर्तारम् । बृ० प्र० १५८ आ । हेतुर्व्यञ्जको वा । आव० ५६७ । सिप्पी ।

**कारगं**-करोतीति कारकं उदाहरणम् । ओघ० ११ । साधुः । सम्यग्दर्शनाद्यनुष्ठाना । आचा० ४१६ । क्रिया । बृ० प्र० ५२ आ ।

**कारगसुत्तं**-कारकसूत्रं । सूत्रस्य द्वितीयो भेदः । बृ० प्र० ५० आ ।

**कारगारी**-अपराधी । दश० ६८ ।

**कारण**-हेतुः, निमित्तम् । विशे० २७६ । उपपत्तिमात्रम् । भग० ११६ । आव० ६२ । अन्यथाऽनुपपत्तिमात्रम् । उत्त० ३०८ । उपपत्तिमात्रं दृष्टान्तादिरहितम् । उत्त० ३०८ । परोक्षार्थनिर्णयनिमित्तमुपपत्तिमात्रं । ठाणा० ४६३ । कारणं नामालम्बनं । प्रज्ञा० ६७ । हेतुः- उपपत्तिमात्रम् । विशे० ४६३ । प्रयोजनम् । विशे० ८७६ । आव० ५२४ । करोतीति कारणं, कार्यं निर्वर्त्तयतीति । आव० २७७ । स्वेन व्यापारेण कार्ये यदुपयुज्यते तत्करणं । आव० २७८ । बाह्यकारणम् । प्रज्ञा० २२३ । करोतीति कारणं-परोक्षार्थनिर्णयनिमित्तमुत्पत्तिमात्रम् । ठाणा० ४६२ । कारणं-ज्ञानादिव्यतिरिक्तं कारणमाश्रित्य वन्दते तत् कृतिकर्मणि पञ्चदशो दोषः । आव० ५४४ । इष्टार्थानां हेतुः-कृषि पशुपोषणवाणिज्यादिः । भग० ७३६ । कारणः-हेतुः । प्रज्ञा० १८० ।

**कारणजाए**-कारणजातः-कारणप्रकारः । उत्त० २३५ ।

**कारणपडिसेवि**-अकृत्यं यतनया प्रतिसेवते इत्येवंशीलः कारणप्रतिसेवी । व्य० प्र० ८ अ ।

**कारणभूता**-प्रमाणभूताः । नि० चू० प्र० ३२० अ ।

**कारणविणासाभाव**-कारणविनाशाभावः । दश० १२८ ।

**कारणविभागाभाव**-कारणविभागभावः कारणविभागाभावात् न खलु जीवस्य पटादेरिव तन्त्वादिकारणविभागोऽस्ति कारणाभावादेव । दश० १२८ । कारणविरुद्धकार्योपलम्भानुमानम् । ठाणा० २६३ । कारणविरुद्धोपलम्भानुमानम् । ठाणा० २६२ ।

**कारणसूई**- याः-परव्यपरोपणादिकारणमुद्दिश्य कारयित्वा परस्य नखमूलादौ कुत्यन्ते ताः कारणसूच्यः । बृ० द्वि० २२३ आ ।

**कारणा**-यातना । व्य० प्र० २१० अ ।

**कारणाइं**-कारणानि-विवक्षितार्थनिश्चयस्य जनकानि । ज्ञाता० ११० ।

**कारणानि**-ज्ञातानि । सम० ११८ ।

**कारणानुपलम्भानुमानम्**-न्यायविशेषः । ठाणा० २६३ ।

**कारणिक**-विवादनिर्णायकः । अनु० ३१ । विशे० ६२३ । राजपुरुषाः । नंदी० १५२, १५६ । विशे० ४१६ ।

**कारणिय**-कारणिकः, न्यायकर्त्ता । आव० ७१८ । गुरुवैयावृत्यादिना व्यापृतः । आव० ७७८ । न्यायालयसत्कः पुरुषः । उत्त० ३०१ ।

**कारणिया**-कारणिका । आव० ६६ । कारणिका । नि० चू० प्र० ११२ अ । नि० चू० प्र० १३५ अ ।

**कारणे**-वेदनादिकारणमन्तरेण भुञ्जानस्य कारणदोषः । ग्रासैषणादोषे पंचमो दोषः । आचा० ३५१ ।

**कारणेसु**-कारणेषु-सिसाधयिषितप्रयोजनोपायेषु विषयभूतेषु ये मन्त्रादयो व्यवहारान्तास्तेषु । विपा० ४० ।

**कारय**-यस्मिन् सम्यक्त्वे सति सदनुष्ठानं श्रद्धत्ते, सम्यक् करोति च तत् कारयति सदनुष्ठानमिति कारकं सम्यक्त्वमुच्यते । विशे० १०६४ ।

**कारवाहिआ**-करं-राजदेयं द्रव्यं वहन्तीत्येवंशीलाः कारवाहिनस्त एव कारवाहिकाः कारबाधिता वा । जं० प्र० २६७ ।

**कारवाहिया**-करपीडिताः, नृपाभाव्यवाहिनो वा । औप० ७३ । कारं-राजदेयं द्रव्यं वहन्तीत्वंशीयेलाः कारवा-



Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

हिनस्त एव कारवाहिकाः, करवाधिता वा। भग० ४८१।

**कारागृहम्**–कारागारम् । उत्त० ५५५ ।

**कारापकः**–करणं कारस्तं कारयति कारापयतीति णके च कारापकः । आव० २६० ।

**कारापणे**– । नि० चू० प्र० १०३ आ ।

**कारियणिमित्तकरणं**–कारितनिमित्तकरणम्–सम्यगर्थपदमध्यापितमस्माकं विनयेन विशेषेण वर्त्तितव्यं, तदनुष्ठानं च कर्त्तव्यम् । दश० ३१ ।

**कारियनिमित्तकरणं**–सम्यक् शास्त्रपदमध्यापितस्य विशेषेण विनये वर्त्तनं तदार्थानुष्ठानम् । सम० ६५ ।

**कारियल्लई**–वल्लीविशेषः । प्रज्ञा० ३२ ।

**कारी**–अपराधी। आव० ३४६ । कर्त्तारः। अपराधिनः। आव० ६७२ । अपराधिनी । दश० ६६ ।

**कारीषाग्निसमानः**–फुम्फुकाग्निसमानः परिमलमदनदाहरूपः । जीवा० ६५ ।

**कारुअवण्णे**– । जं० प्र० १६४ ।

**कारुइज्ज**–कारुकः, कारुकजातिविशेषः। करुटच्छिम्पकादिषु भवा कारुकीया । प्रश्न० ३० ।

**कारुण्यं**–अनुकंपा, दीनानुग्रहः । त० ७–६ ।

**कारुय**–कारुकः–वरुटच्छिम्पकादिकः । प्रश्न ३० ।

**कारेल्लकं**–वल्लीविशेषफलम् । अनुत्त० ६ ।

**कारोडिआ**–कारोटिकाः, कापालिकाः, ताम्बूलस्थगीवाहका वा। जं० प्र० २६७ । कापालिकाः । भग० ४८१ ।

**कारोडिय**–कारोटिकः । आव० १६१ । कारोडिकः । कापालिकः । ताम्बूलस्थगिकावाहको वा । औप० ७३ ।

**कार्तिकः**–रोहितकेशचियभिन्नो मुनिः । सं० ।

**कात्तिकश्रेष्ठी**–शक्रस्य पूर्वभवः । भग० ३२२ ।

**कार्पटिकः**–दीनकृपणः । दश० २६० । पिण्ड० १४० ।

**कार्मग्रन्थिकपरिभाषा**– । उत्त० ५८६ ।

**कार्मग्रन्थिका**– । प्रज्ञा० ३६१ ।

**कार्मणं**–लक्षणतः संवत्सरं कार्मणं, यस्य ऋतुसंवत्सरः सावनसंवत्सरश्चेति पर्यायौ । ठाणा० ३४५ ।

**कार्मणबन्धननाम**–यदुदयात् कार्मणपुद्गलानां गृहीतानां गृह्यमाणानां च परस्परं सम्बन्धस्तत्कार्मणबन्धननाम । प्रज्ञा० ४७० ।

**कार्मणसङ्घातनाम**–यदुदयवशात् कार्मणशरीररचनानुकारिसङ्घातरूपा ( परिणतिः ) जायते तत् । प्रज्ञा० ४७० ।

**कार्यं**–नेम ( देशी ) । पिण्ड० २८ ।

**कार्यकारणभावः**–न्यायविशेषः । आचा० ६६ ।

**कार्यनिमित्तको विनयः**–संग्रहमुपसंग्रहं वा मे करिष्यतीत्येवं बुद्धचा यो विनयः क्रियते सः । विनयस्य तृतीयो भेदः । व्य० प्र० २० आ ।

**कार्यव्यासङ्गात्**–न्यायविशेषः । आचा० १०६ ।

**कार्यानुपलब्ध्यनुमानम्**–न्यायविशेषः । ठाणा २६३ ।

**कार्यानुमानम्**–न्यायविशेषः । ठाणा० २६२ ।

**कार्षापण**–माषः । प्रज्ञा० २५७ । उत्त० २७६ ।

**कालंजरवत्तिणी**–कालञ्जरवर्त्तिनी–गङ्गामहानद्याविन्ध्यस्य चान्तरा अटवी । आव० ३४८ ।

**कालंबवालुआ**–कदंबवालुका–कदम्बवालुकानदीपुलिनम् । उत्त० ४५६ ।

**काले**–कालः–दक्षिणनिकाये प्रथमो व्यन्तरेन्द्रः । भग० १५७। तृतीयप्रथमप्रहरादिः। विपा० ६६। पिशाचेन्द्रः। जीवा० १७४ । तमतमापृथिव्यां प्रथमो महानिरयः । प्रज्ञा०८३। सप्तमः परमाधार्मिकः। सूत्र० १२४ ।आव० ६५० । पञ्चदशसु परमाधार्मिकेषु सप्तमः । उत्त०६१४। कालानुयोगः । गणितानुयोगश्चेत्यर्थः । दश० ४ । तृतीया पौरुषी । बृ० प्र० ६८ अ । अधिकृतावसर्पिणीचतुर्थभागरूपः । सूर्य० १ । अष्टाशीत्यां महाग्रहे षट्पञ्चाशत्तमः । जं० प्र० ५३५ । कलनं–कालः कलासमूहो वा ।आव०४६५, ५६३ । श्वा । स्वाध्यायकालः । मरणम् । आव० २७५ । कोणिकबन्धुः । आव० ६८३, ६८४ । कोणिकस्य दण्डनायकः। आव० ६८४। कालः–कलासमूहो वा कालः । नि० चू० प्र० ५ आ । स्थितिः, प्रमाणं वा । ठाणा० ७६ । मरणं, मारणान्तिकसमुद्घातः । भग० ६५० । यः कण्ड्वादिषु पचति वर्णतः कालश्च स कालः । परमाधार्मिकसप्तमनाम । सम० २८ । अष्टाशीत्यां महाग्रहे अष्टपञ्चाशत्तमः । ठाणा० ७६ । पिशाचेन्द्रः । ठाणा० ८५ । ज्ञाता० २५२ । वेलम्वे-



Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

न्द्रस्य लोकपालः । प्रभञ्जनस्य लोकपालः । प्रथमो वायुकुमारः । ठाणा० १९८ । प्रथमस्य वडवामुखपातालकलशस्याधिष्ठाता देवः । जीवा० ३०६ । ठाणा० २२६ । नवमहानिधौ षष्ठनिधिः । ठाणा० ४४८ । गणितानुयोगः । जं० प्र० २ । वर्तमानावसर्पिणीचतुर्थारकविभागरूपः । जं० प्र० १३ । प्रस्तावः । उत्त० ४८६ । मृत्युः । आचा० १२२ । अवसरादिः । भग० ७७३ । कलनं-कालः, कलासमूहो वा कालः,तेण वा कारणभूतेन, दव्वादिचउक्कयं कलिज्झतीति कालः-ज्ञायत इत्यर्थः । नि० चू० प्र० ५ आ । कालविषयम् । वृ० प्र० २०१ आ । निरयावलिकानां प्रथमवर्गस्य प्रथममध्ययनम् । निरय० ३ । कल्यते-संख्यायतेऽसावनेन वा कलनं वा कला-समूहो वेति कालः वर्त्तनापरापरत्वादिलक्षणः । ठाणा० ५५ । समयः । ठाणा० १९८ । ठाणा० २०१ । अवस्थितिः । भग० ५३३ । नारकादित्वेन स्थितिर्जीवानां सः । नारकादिभवेऽवस्थानं सः । ठाणा० २०१ । सञ्ज्ञाकालः । ओघ० १२२ । कृष्णवर्णः, कृष्णश्च स्वाध्यायकालः । विशे० ८५४ । स्वाध्यायकालः । शुना । मरणम् । आव० २७५ । सुभिक्षदुर्भिक्षादिः कालः । आव० ८३७ । प्रक्रमात् पतनप्रस्तावः । उत्त० ३३४ । कालः । दिवसस्य प्रहरत्रयलक्षणः । भग० २९२ । विमानविशेषः । सम० ३५ । आमलकल्पानगर्यां गृहपतिविशेषः । कालवत्तंसकविमाने सिंहासनम् । ज्ञाता० २४७ । मरणधर्मः । जं० प्र० १५८ । दीर्घकालिकसंज्ञा । विशे० २८१ । मरणम् । दश० ९। विशे०८३७ ।विपा०८० । क्षीयमाणादिलक्षणः । दश० ११५ । कूणिकराज्ञो भिन्नमातृको भ्राता । भग० ३१६ । षष्ठो निधिविशेषः । जं० प्र० २५८ । गणितः । आव० २९६ ।

**कालए-** । जीवा० ३७० ।

**कालकंखी-**कालम्-अनुष्ठानप्रस्तावं काङ्क्षत इत्येवंशीलः कालकांक्षी । उत्त० २६९ ।

**कालक-**विद्याप्रदानाय प्रशिष्यसकाशमागत आचार्यविशेषः । आव० ५२३ ।

**कालकरणं-**चन्द्राऽऽदित्यादिज्योतिषिकदेवगतिविशेषेण यद् भवति तत् । विशे० १२७५ ।

**कालकाचार्यः-**गुणननिमित्तमनुयोगे द्रष्टान्तः । बृ० प्र० ३९ अ । प्रवचनप्रत्यनीकशासकः । बृ० तृ० १५६अ, बृ० तृ० १५५ अ ।

**कालकाल-**तत्रैकः कालशब्दो वर्त्तनादिरूपः । द्वितीयस्तु समय परिभाषया कालो मरणमुच्यते, ततश्च कालस्य मरणं क्रियारूपस्य कलनं कालःकाल इत्यर्थः । विशे० ८३७ अ । अभीष्टवस्त्ववाप्त्यवसरः, कालो, मरणं । मरणक्रियायाः कलनं काल इत्यर्थः । दश० ९ । मरणक्रियाकलनं कालकालः । आव० २५७ ।

**कालकूटं-**कालकूटनामकं विषम् । उत्त० ४७८ ।

**कालखमणो-**कालक्षपणः-कालकाचार्यः । उत्त० १२७ ।

**कालगज्ज-**कालकाचार्यः । नि० चू० प्र० ३०३ अ ।

**कालगतिल्लतो-**कालगतः । उत्त० १९० ।

**कालगय-**कालगतः-मृतः । आव० ६२९ ।

**कालगहिया-**कालेन मृत्युना गृहीताः, पौनःपुन्यमरणभाज इत्यर्थः । धर्मचरणाय वा गृहीताः-अभिसन्धितः कालो यैस्ते कालगृहीताः । आचा० १८४ ।

**कालग्गं-**कालाग्रं-अधिकमासकः । यदिवाऽग्रशब्दः परिमाणवाचकस्तत्रातीतकालोऽनादिरनागतोऽनन्तः सर्वाद्धा वा । आचा० ३१८ ।

**कालग्गहो-**कालग्राही । व्य० द्वि० २५२ अ ।

**कालचक्कं-**कालचक्रं । आव० २१७ ।

**कालचारी-**कालचारिणी-एतादृशी संयती । कालचारिश्रमणीयुक्तः । ओघ० ५७ ।

**कालच्छेदे-**कालपर्यन्ते । ओघ० २१३ ।

**कालण्णाण-**कालज्ञानं-सकलज्योतिःशास्त्रानुबन्धिज्ञानम् । जं० प्र० २५८ ।

**कालदोस-**कालदोषः-अतीतादिकालव्यत्ययः । सूत्रस्य द्वात्रिंशद्दोषे एकविंशतितमः । आव० ३७४ । अनु० २९२ ।

**कालधम्म-**कालो-मरणं तल्लक्षणो धर्मः-पर्यायः कालधर्मः । विशे० १००३ ।

**कालधम्मु-**कालधर्म्मः-मरणः । ठाणा० १४३ ।

**कालनिषीथं-**कृष्णरजन्योः यत्र वा काले निषीथं व्याख्यायत इति । आचा० ४०८ ।



Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

**कालपएसे**–कालप्रदेशः–एकादिसमयः । प्रज्ञा० २०२ ।

**कालपक्ख**–कृष्णपक्षः । आव० ३४९ ।

**कालपरियाए**–मृत्युरवसरोऽत्रापि ग्लानावसरेऽसावेव कालपर्याय इति । आचा० २८२ ।

**कालपाले**–धरणेन्द्रस्य प्रथमलोकपालः । ठाणा १९७ ।

**कालपोराणं**–कृष्णपर्वणां उपरितनपत्रसमूहापेक्षया हरितालवत्पिञ्जराणां । जीवा० ३५५ ।

**कालप्रत्युपेक्षणा**–उचितानुष्ठानकरणार्थं कालविशेषस्य पर्यालोचना । ठाणा० ३६१ ।

**कालप्रायश्चित्तं**–त्रिविधप्रायश्चित्ते तृतीयम् । बृ० प्र० ४८ आ० ।

**कालभूमी**–कालभूमिः–कालमण्डलाख्या भूमिः । आ० ७८४ ।

**कालभेदः**–अतीतादिनिर्द्देशे प्राप्ते वर्त्तमानादिनिर्द्देशः । ठाणा० ४९९ ।

**कालभोइ**–जो मज्झण्हे भुंजइ अणत्थमिए वा । नि० चू० तृ० ३८ आ० ।

**कालमण्डला**–कालभूमिः । आव० ७८४ ।

**कालमरण**–यस्मिन् काले मरणमुपवर्ण्यते क्रियते वा । उत्त० २२९ ।

**कालमहं**–कालमहत्–अनागताद्धा । उत्त० २५५ ।

**कालमासा**–मासाभेदः । ज्ञाता० १०७ ।

**कालमासिणी**–कालमासवती–गर्भाधानान्नवममासवती । दश० १७१ । नवमे मासे गब्भस्स वट्टमाणस्स । दश० चू० ७९ ।

**कालमासे**–कालस्य–मरणस्य मासः । उपलक्षणं चैतत्पक्षाहोरात्रादेस्ततश्च कालमासे-मरणावसर इतिभावः। ठाणा० ९९।

**कालमिगपट्ट**–कालमृगपट्टः–कालमृगचर्म । जं० प्र० १०७। जीवा० २६९ ।

**कालमियचम्म**–कालमृगचर्म । ज्ञाता० २२० ।

**कालमुही**–कृष्णमुखी–उपद्रवकारिण्या विशेषणम् । ओघ० १७ ।

**कालमुहे**–कालमुखः । म्लेच्छविशेषः । जं० प्र० २२० ।

**कालमूढो**– । नि० चू० द्वि० ४१ आ ।

**कालवडिंसगभवणे**–चमरचञ्चाराजधान्यां भवनम्। ज्ञाता० २४७ ।

**कालवत्तिणि**–कालवर्त्तिनी–काले–भोगकाले यौवने वर्त्तत इति । अन्त० १२ ।

**कालवादी**–अस्ति जीवः स्वतो नित्यश्च कालत इति वादी। आव० ८१६ ।

**कालवादिनः**–विद्यते खल्वात्मा स्वेन रूपेण नित्यश्च कालवादिनः । सम० ११० । विद्यते खल्वयमात्मा स्वेन रूपेण न परापेक्षया ह्रस्वदीर्घत्वे इव नित्यश्च कालवादिनः । ठाणा० २६८ ।

**कालवाल**–नागकुमारेन्द्रस्य लोकपालः । भग० ५०४ ।

**कालवासी**–काले–प्रावृषि वर्षतीति एवंशीलः–कालवर्षी । काले जिनजन्मादिमहादौ वर्षतीतिकृत्वा । भग० ६३४ । कालवर्षी–अवसरवर्षीति । ठाणा० २७० ।

**कालवेसि**–जितशत्रुपुत्रः श्रृगालभक्षितः । म० २० ।

**कालवेसिय**–कालवेसिकः । मथुरायां कालाभिधवेश्यायाः पुत्रः । उत्त० ९२० ।

**कालशौकरिकः**–निरुपक्रमायुषि द्रष्टातः । भग० ७९९ । नरकादिकुगतिप्राप्तौ द्रष्टान्तः । उत्त० २७२ ।

**कालसंजोग**–कालसंयोगः–समयक्षेत्रमध्ये आदित्यादिप्रकाशसम्बन्धलक्षणः । ठाणा० ३५९ ।

**कालसंदीवो**–कालसन्दीपकः । आव० ६८६ ।

**कालसंधिय**–कालसन्धिता–काले स्वस्वोचिते सन्धानं सन्धा कालसन्धा सा सञ्जातैषामिति । जीवा० २६५ ।

**कालसंयोगो**–वर्त्तनादिकाललक्षणानुभूमिः मरणयोगो वा। ठाणा० १३३ ।

**कालसमए**–कालसमयः । सूर्य० ९० । कालेन–तथाविधेनोपलक्षितः समयः–अवसरः कालसमयः । सूर्य० २९४ ।

**कालसिरी**–कालगृहपतेर्भार्या । ज्ञाता० २४८ ।

**कालसीमा**–तस्यामेव सार्द्धत्रयस्त्रिंशति त्रिशतागुणितायां १००५ सप्तषष्ट्या हृतभागायां यल्लब्धं तदेषां कालसीमा । सम० ८० ।

**कालसुणगो**–कालसुनकाः–कालश्वानः । जीवा० २८२ ।

**कालसूरियं**–कालशौकरिकं, श्रेणिकस्य नरकनिवारणे द्रष्टान्तः । आव० ६८१ ।

**कालसोयरि**–विनयबहुमानचतुर्भङ्ग्यां चतुर्थे द्रष्टान्तः । नि० चू० प्र० ८ अ ।



Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

**कालसौकरिकः**–नामविशेषः । सूत्र० १७८ । महदापद्गतोऽपि स्वतः महदापद्गतेऽपि च परे आमरणादसञ्जातानुतापः । आव० ५९० । अभव्यकुमुदम् । बृ० प्र० १८८ ।

**कालसौकरिकादिः**– । सूत्र० १२२ ।

**कालहत्थी**–कालहस्ती कलम्बुकायां प्रत्यन्तिकः । आव० २०६ ।

**कालहय**–कालहतः–ग्रामेयकविशेषः । आव० ५५४ ।

**कालहेसिं**–काले–अराजकानां राजनिर्णयार्थके अधिवासनादिके समये हेषते शब्दादयतीत्येवंशीलं कालहेषि । जं० प्र० २३७ ।

**काला**–कालार्थ एकादशः । भग० ५११ । पिशाचभेदविशेषः । प्रज्ञा० ७० । मथुरायां जितशत्रुराजवेश्या । उत्त० १२० । काला सन्निवेशः । सिंहविद्युन्मतीगोष्ठीस्थानम् । आव० २०१ ।

**कालाइक्कमो**–कालस्यातिक्रमः, कालातिक्रमः । आव० ८३८ ।

**कालाएस**–कालप्रकारः । कालतः । भग० ८०९ ।

**कालागुरु**–गन्धद्रव्यविशेषः । सम० ६१ । कृष्णागुरुः । प्रश्न० ७७ । गन्धद्रव्यविशेषः । कृष्णागुरुः । सम० १३८ । कृष्णागुरुः । जं० प्र० ५१ । सुगन्धिद्रव्यविशेषः । जीवा० १६०, २०६ । प्रज्ञा० ८७ ।

**कालाणुट्ठाई**–यद्यस्मिन् काले कर्त्तव्यं तत्तस्मिन्नेवानुष्ठातुं शीलमस्येति कालानुष्ठायी, कालानतिपातकर्त्तव्योद्यतः । आचा० १३२ ।

**कालातिक्कंत**–कालं–दिवसस्य प्रहरत्रयलक्षणं अतिक्रान्तः कालातिक्रान्तः । भग० २९२ ।

**कालातिक्कंता**–ऋतुबद्धे काले वर्षाकाले च यत्र स्थितास्तस्यामृतुबद्धे काले मासे पूर्णे वर्षाकाले चतुर्मासे पूर्णे यत् तिष्ठति सा कालातिक्रान्ता । बृ० प्र० ९३ अ । तृष्णाबुभुक्षाकालाप्राप्ताः । ज्ञाता० ११३ ।

**कालापाय**–काल इत्यत्रापि कालादपायः कालापायः, काल एव वा । दश० ३६ ।

**कालायवसितो**–कालादवैश्यः । व्य० द्वि० ४३२ आ ।

**कालायस**–लोहः । जं० प्र० ३७, २३८ । जीवा० १९२ । लोहं । नि० चू० द्वि० ८७ अ । कालायसम्–लोहविशेषः । औप० ७१ । भग० ३२२, ४८१ ।

**कालालोणे**–कृष्णलवणं–सैन्धवलवणपर्वतैकदेशजम् । दश० ११८ ।

**कालावभासे**–कालावभासः, कालदीप्तिर्वा । भग० २६६ ।

**कालावीचिमरणं**–यथाऽऽयुष्ककाले मरणम् । उत्त०२३१ ।

**कालासवेसियपुत्ते**–पार्श्वापत्यीयः । भग० ९९ । प्रथमशतकगतद्रष्टान्तः । भग० ३२७ ।

**कालिंगं**–कालिङ्गम् । प्रज्ञा० ३७ ।

**कालिंगी**–वल्लीविशेषः । भग०८०३ । आचा०५७ । प्रज्ञा०३२ ।

**कालिकाचार्यः**–गर्दभिल्लस्य शिक्षादाता । नि० चू० प्र० ३०४आ,२५६ । अशठाचीर्णे द्रष्टान्तः । बृ० तृ० १४ अ ।

**कालिगि**–संज्ञाविशेषः । विशे० २७७ ।

**कालिञ्जर**–नगविशेषः । उत्त० ३८३ ।

**कालिनी**–आर्द्रादेवता, रौद्रीत्यपरनाम । जं० प्र० ४९९ ।

**कालिपोरेति**–काकजङ्घावनस्पतिविशेषपर्व । अनुत्त० ४ ।

**कालियं**–काले-प्रथमचरमपौरुषीलक्षणे कालग्रहणपूर्वकं पठ्यत इति कालिकम् । विशे० ९२७ । दिवसनिशाप्रथमपश्चिमपौरुषीद्वय एव पठ्यते तत्, तत्कालेन निवृत्तं कालिकम्, उत्तराध्ययनादि । ठाणा० ५२ । नंदी० २०४ । कालेन निर्वृत्तं कालिकम्,प्रमाणकालेनेति भावः । दश०२ ।

**कालियदीवे**–द्वीपविशेषः । ज्ञाता० २२८ ।

**कालियपुत्ते**–कालिकपुत्रः । स्थविरविशेषः । भग० १३८ ।

**कालियसुयं**–इहैकादशाङ्गरूपं सर्वमपि श्रुतं कालग्रहणादिविधिनाऽधीयत इति कालिकम् । विशे० ९३१ । कालिकश्रुतं एकादशाङ्गरूपः । भग० ७९२ ।

**कालियसुयमाणुओगिए**–कालिकश्रुतानुयोगे–व्याख्याने नियुक्ताः–कालिकश्रुतानुयोगिकाः, कालिकश्रुतानुयोग एषां विद्यते इति कालिकश्रुतानुयोगिनः । नंदी० ५१ ।

**कालिया**–काले सम्भवन्तीति कालिकाः–अनिश्चितकालान्तरप्रास्रयः । उत्त० २४३ । कालिका–श्रेणिकभार्या । आव० ६८७ ।

**कालियावाए**–कालिकावातः–प्रतिकूलवायुः । ज्ञाता०१५८ ।

**कालियावायरहिए**–कालिकावातरहितः । आव० ३८७ ।

**काली**–चमरेन्द्रस्य प्रथमाऽग्रमहिषी । भग० ५०३ । काली–अन्तकृद्दशानां अष्टमवर्गस्य प्रथममध्ययनम् ।



Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

अन्त० २५ । देवीविशेष: । निरय० १९ । धर्मकथाया: प्रथमवर्गस्य प्रथममध्ययनम् । ज्ञाता० २४७ । कालगृहपतिकालश्रियो: दारिका । ज्ञाता० २४८ ।

**कालीगमए-** । ज्ञाता० २५१ ।

**कालीपव्वंगसंकासे-**कालीपर्वाङ्गसङ्काश: काली-काकजङ्घा तस्या: पर्वाणि स्थूराणि मध्यानि च तनूनि भवन्ति तत:, कालीपर्वाणीव पर्वाणि-जानुकूर्परादीनि येषु तानि कालीपर्वाणि, तथाविधैरङ्गै:-शरीरावयवै: सम्यक्काशते-तप:श्रिया दीप्यत इति कालीपर्वभिर्वा सङ्काशानि-सदृशानि अङ्गानि यस्य स: । उत्त० ८४ ।

**कालुट्ठिती-**उग्गए आदिच्चे दिवसतो जो गच्छति । नि० चू० तृ० ३८ आ ।

**कालुणितेति-**कारुण्यं-शोक: । ठाणा० ४९६ ।

**कालुद्देसे-**कालोद्देश: । आव० ८२२ ।

**कलुसभावो-**कलुषभाव: कालुष्यम्-दुष्टाभिसन्धिरूपम् । दश० २१२ ।

**कालुस्से-**कसाउप्पत्ती । नि० चू० प्र० ३१ अ ।

**कालेज्ज-**कालेयकम् । सं० । कालेयक: । आव० ६५१ ।

**कालेण-**कालेन-प्रथमपश्चिमपौरुषीलक्षणेन हेतुभूतेनाधीयत्ते । ठाणा० १२६ । दुष्षमसुषमादिना विशिष्टेन कालेन सतोत्पत्त्यादिकमभूत् । आचा० ४२५ ।

**कालेयक-** । सम० २९ ।

**कालोदाइ-**कालोदधि:-अन्ययूथिक: । भग० ३२७, ३२३ । रजन्यां भिक्षाग्राही बौद्धसाधु: । बृ० द्वि० ९३ अ ।

**कालोदायी-**गुणशिलचैत्यनिकटवर्त्ती अन्ययूथिक: । भग० ७५० ।

**कालोय-**धातकीखण्डपरित: शुद्धोदकरसास्वाद: कालोद: समुद्र: । अनु० ९० । धातकीखण्डानन्तरं समुद्र: । प्रज्ञा० ३०७ ।

**कालोवक्कम-**कालस्योपक्रम: कालोपक्रम: । यदिह नालिकादिभिरादिशब्दात् शङ्कुच्छायानक्षत्रचारादिपरिग्रहस्तै: कालउपक्रम्यते स कालोपक्रम: । यत्तु नक्षत्रादिचारै: कालस्य विनासनं स वस्तुनाशे कालोपक्रम: । अनु० ४८ ।

**कालोवाय-**कालोपाय:-अपायभेद: । दश० ४० ।

**कावालिए-**अस्थिसरजस्क: । बृ० द्वि० ९० आ । कापालिक:-वृथाभागी । आव० ६२८ ।

**काविट्ठं-**महाशुक्रकल्पे विमानविशेष: । सम० २७ ।

**काविलिज्जं-**कापिलीयं, उत्तराध्ययनेष्वष्टमध्ययनम् । उत्त० २८९ ।

**काविलियं-**उत्तराध्ययनेषु अष्टममध्ययनम् । सम० ६४ ।

**काविसायण-**कपिशायनं-मद्यविशेष: । जं० प्र० १०० ।

**कावो-**काव:-कापडिवाहक: । जीवा० २८१ ।

**कावोडी-**कापोती-तुलाकारं पानीयानयनसाधनम् । दश० १३५ । दश० चू० ५७ ।

**कावोय-**कावडिवाहक: । अनु० ४६ ।

**कावोयलेस्सा-**कापोतस्य पक्षिविशेषस्य वर्णेन तुल्यानि यानि द्रव्यानि धूम्राणि इत्यर्थ:, तत्साहाय्याज्जाता कापोतलेश्या मनाक् शुभतरा सा लेश्या येषां ते । ठाणा० ३२ ।

**काशा-**शर्करा । प्रज्ञा० ३६६ ।

**काशिमण्डलं-**काशिदेश: । उत्त० ४४८ ।

**काश्यपादीनि-**गोत्रविशेष: । सम० ११२ ।

**काष्ठपादुके-**मौञ्जे । सूत्र० ११८ ।

**काष्ठमूलं-**चणकचवलकादिकं द्विदलम् । बृ०प्र० २६७ आ ।

**काष्ठमूलरसं-**चणकचवलकादिद्विदलं तदीयेन रसेन यत्परिमाणितम् । पानकम् । बृ० प्र० २६७ आ ।

**काष्ठमुद्रा-** । ठाणा० ५१२ ।

**काष्ठश्रेष्ठी-**पारिणामिकीबुद्धौ दृष्टान्त: । नंदी० १६६ । श्रमणविशेष: । बृ० द्वि० ९४ अ ।

**काष्ठाशब्द:-**प्रकर्षवाची । सूर्य० १३ ।

**कासंकासे-**कासंकष: । आचा० १३९ ।

**कास-**कास:-रोगविशेष: । भग० १९७ । गुच्छाविशेष: । प्रज्ञा० ३२ । अष्टाशीतौ महाग्रहे सप्तचत्वारिंशत्तम: । ठाणा० ७९ ।

**कासगो-**कर्षक: । नि० चू० द्वि० १४३ आ ।

**कासणं-**काशनं-खाट्करणम् । ओघ० ९२ ।

**कासय-**कर्षक:-कृषीवल: । उत्त० ३६१ ।

**कासरनालियं-**सीवण्णिफलं । दश० चू० ८६ ।

**कासवं-**काश्यपस्यापत्यं काश्यप: तं काश्यपगोत्रम् । नंदी० ४८ ।

**कासवे-**स्थविरविशेष: । भग० १३८ । कश्यप:-अन्त-



Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

कृद्दशानां षष्ठमवर्गस्य चतुर्थमध्ययनम् । अन्त० १८ । राजगृहे गाथापतिः । अन्त० २३ । उत्तराफालगुन्याः गोत्रनाम । जं० प्र० ५०० । काश्यपगोत्रो महावीरः । उत्त० ८३ । ऋषभस्वामी वर्धमानस्वामी वा । सूत्र० ६८ । कौशम्ब्यां राजबहुमतो ब्राह्मणः । उत्त० २८६ । नापितस्य सम्बन्धिक्षुरगृहम् । वृ० प्र० १८४ अ ।

**कासवए**–काश्यपः–नापितशिल्पः । आव० १३२ ।

**कासवग**–काश्यपः–नापितः । भग० ४७२ । सूत्र० ११६ ।

**कासवगा**–षष्ठीश्रेणिविशेषः । जं० प्र० १९३ ।

**कासवगोत्ते**–काश्यपगोत्रम् । सूर्य० १५० । आर्यजम्बुनामानगारस्य गोत्रम् । ज्ञाता० १३ ।

**कासवनालियं**–श्रीपर्णीफलम् । आचा० ३४६ । दश० १८५ ।

**कासवसंट्ठियट्ठाण**–यस्तु ग्राम एव त्रिकोणतया निविष्टः वृक्षा वा त्रयो यस्य बहिस्त्र्यस्राः स्थिताः एकतो द्वौ अन्यतस्त्वेकः काश्यपसंस्थितः । वृ० प्र० १८४ अ ।

**कासवा**–कशे भवः काश्यः–रसस्तं पीतवानिति काश्यपस्तदपत्यानि काश्यपाः । ठाणा० ३९० ।

**कासवी**–पञ्चमतीर्थकरस्य प्रथमा शिष्या । सम० १५२ ।

**कासाइअ**–कषायेण–पीतरक्तवर्णाश्रयरञ्जनीयवस्तुना रक्ता काषायिकी शाटिकेत्यर्थः । जं० प्र० १८६ ।

**कासायं**–काषायिकं–वस्त्रविशेषः । आव० ३५२ ।

**कासि**–काशीजनपदो यत्र वाणारसी नगरी । ज्ञाता० १२५ ।

**कासिभूमि**–काशीभूमिः–काश्यभिधानो जनपदः । उत्त० ३८३ ।

**कासी**-काशी–जनपदविशेषः । ज्ञाता० १४१ । प्रज्ञा० । वाणारसी, तज्जनपदोऽपि काशी । भग० ३१७ । अष्टाशीतौ महाग्रहे सप्तचत्वारिंशत्तमः । भग० ६८० ।

**कासीअ**–अकार्षीत् । उत्त० ३२२ ।

**कासीस**–रागद्रव्यः । ज्ञाता० २३१ ।

**कासो**–इक्खु । दश० चू० ५८ ।

**काह**–कदा । भग० ११६ ।

**काहए**–अकथयत् । उत्त० ४८० ।

**काहरो**–कापोतिकः–जलवाहकः । दश० १३५ ।

**काहलं**–फल्गुप्रायम् । वृ० प्र० ४५ आ ।

**काहला**–खरमुही । जं० प्र० १९२ । तस्स मुहत्थाणे खरमुहाकारं कट्ठमयं मुहं कज्जति खरमुखी । नि० चू० तृ० ६२ अ । वाद्यविशेषः । ठाणा० ६३ ।

**काहामि**–करिष्यामि । उत्त० ४३३ ।

**काहारसंठिते**– । सूर्य० १२९ ।

**काहारो**–जलवाहकः । दश० चू० ५७ ।

**काहावणं**–कार्षापणम् । उत्त० २७६ । कर्षापणः–द्रम्मः । प्रश्न० ३० ।

**काहितो**–सज्झायादिकरणिज्जे जोगे मोत्तुं जो देसकहादिकहीतो कहेति सो काहितो । नि० चू० द्वि ९१ आ ।

**काहिया**–धम्मत्थकामेसु अण्णाओ विकहाओ कहेंता कहिया भवंति । नि० चू० तृ० ९ अ ।

**काहीआ**–कथिका । ग० ।

**काहीउ**–कथकः । ओघ० १५० ।

**काहिए**– । ओघ १५० । पासणिए । नि०चू०प्र०२९२ अ ।

**काहीति**–करिष्यति । ठाणा० ४९६ ।

**किं**–प्रश्ने क्षेपे वा । आचा० १६५ । प्रश्ने । ज्ञाता० १४९ । क्षेपप्रश्नपुंसकव्याकरणेषु । आव० ३७९ ।

**किंकमे**–किंकमे, अन्तकृद्दशानां षष्टमवर्गस्य द्वितीयमध्ययनम् । अन्त० १८ ।

**किंकम्मय**–किंकर्मकः । आव० ४०९ ।

**किंकर**–भार्यादिशकरः–अन्वर्थः पुरुषविशेषः । पिण्ड० १३५ । किङ्कराः–प्रतिकर्मपृच्छाकारिणः । जं० प्र० २९३ । किङ्करा–किङ्करभूताः । प्रज्ञा० ८६ । जीवा० १६० । प्रतिकर्मपृच्छाकारिणः । भग० ५४७ । आदेशसमाप्तौ पुनः प्रश्नकारी । प्रश्न० ३९ ।

**किंकिणी**–किङ्किणी, क्षुद्रघण्टिका । भग० ३२२ । प्रश्न० ७५ । क्षुद्रघण्टा घण्टिका वा । जं० प्र० ५२९ ।

**किंञ्चिपुरं**–आदित्यरथराजधानी । प्रश्न० ८९ ।

**किंणाइंनि**–अथ किं पुनरित्यर्थः । भग० १४९ ।

**किंगिरिडा**–त्रीन्द्रियविशेषः । प्रज्ञा० ४२ ।

**किंचनं**–किञ्चनं–काञ्चनं–हिरण्यादि, अल्पमपि वा । आव० १५५ ।

**किंचि**–काञ्चिः मूशलमूलस्थलोहकटी । पिण्ड० १६४ ।

**किंचिच्च सूरिवचनं**– । ठाणा० २०३ ।



Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

**किंचूणा**–किञ्चिदूना–एकत्रिंशत्कवला । ठाणा० १४६ । ऊनोदरतायाः पञ्चमो भेदः । इत्थं पञ्चविंशतेरारभ्य यावदेकत्रिंशत्तावत्किञ्चिदूनोदरता । दश० २७ ।

**किंचूणोमोअरिआ**–किञ्चिन्न्यूनावमोदरिका – एकत्रिंशतो द्वात्रिंशत एकेनोनत्वात् । औप० ३८ ।

**किणा**– · । प्रज्ञा० ३०८ ।

**किणापउल**–वनस्पतिविशेषः । भग० ८०४ ।

**किंते**–तद्यथार्थः । औप०५४ । तद्यथा । जं० प्र० १९२ । प्रश्न० १५६ । किंभूतान् । ज्ञाता० २३० ।

**किंत्थुग्घं**–किंस्तुघ्नं–एकादशमं करणम् । जं० प्र० ४९३ ।

**किनए**–किण्वं–अनन्तजीववनस्पतिभेदः । आचा० ५९ ।

**किंनर**–किन्नरेन्द्रः । जीवा० १७४ । किन्नरः–दक्षिणनिकाये पञ्चमो वाणव्यन्तरेन्द्रः । भग०१५८ । किन्नरभेदविशेषः । प्रज्ञा० ७० । वाणव्यन्तरभेदविशेषः । प्रज्ञा० ६९ । चमरेन्द्रस्य रथानीकाधिपतिर्देवः । ठाणा० ३०२,४०६ । इन्द्रनाम । ठाणा० ८५ । किन्नरः–वाद्यविशेषः । देवविशेषो वा । प्रश्न० ७० । देवविशेषः । भग० ४७८ ।

**किंनरकण्ठः**–किन्नरकण्ठप्रमाणो रत्नविशेषः । जीवा० २३४ ।

**किंनरी**–देवीविशेषः । मैथुने द्रष्टान्तः । प्रश्न० ९० ।

**किंन्नरोत्तमाः**–किन्नरभेदविशेषः । प्रज्ञा० ७० ।

**किंपगारे**–किंप्रकारः–किंस्वरूपः । जीवा० ६५ ।

**किंपत्तियं**–कः प्रत्ययः कारणं यत्र तत् किम्प्रत्ययम् । भग० १८१, १३८ ।

**किंपभासई**–किं–कुत्सितं प्रकर्षेण भाषते इति किंप्रभाषते । उत्त० ४४३ ।

**किंपाकफलः**–फलविशेषः । आचा० १६४ ।

**किंपाग**–किम्पाकः वृक्षविशेषः । उत्त० ६२८, ४५४ । फलविशेषः । आव० ३८५ ।

**किंपुरिसा**–वाणव्यन्तरभेदविशेषः । प्रज्ञा०६९ । किंपुरुषः–उत्तरनिकाये पञ्चमो वाणव्यन्तरेन्द्रः । ठाणा० ८५,३०२ । भग० १५८ । किंपुरुषः–किन्नरेन्द्रः । जीवा० १७४ ।

**किंपुरुषकण्ठः**–किंपुरुषकण्ठप्रमाणो रत्नविशेषः । जीवा० २३४ ।

**किंपुरुषाः**–किन्नरभेदविशेषः । प्रज्ञा० ७० ।

**किंपुरुषोत्तमाः**–किन्नरभेदविशेषः । प्रज्ञा० ७० ।

**किंभयाः**–कस्माद् भयं येषां ते, कुतो बिभ्यतीत्यर्थः । ठाणा० १३५ ।

**किंमए**–किंमयः–किंविकारः । जीवा० ११० ।

**किंमज्झं**–किंमध्यं–किंशब्दस्य क्षेपार्थत्वात् असारम् । प्रश्न० १३७ ।

**किलेसे**–का–कृष्णादिनामन्यतमा लेश्या येषां ते किंलेश्या । भग० १८८ ।

**किंशुककुसुमं**–पलासकुसुमम् । जीवा० १९१ ।

**किंसंठिय**–किंसंस्थितं–किमिव संस्थितम् । जीवा० ३७८। किमिव संस्थिताः किंसंस्थिताः । जीवा० १०४ । किं संस्थितं–संस्थानं यस्याः यदिवा कस्येव संस्थितं–संस्थानं यस्याः सा किंसंस्थिता । सूर्य० ७३ ।

**किंसुकफुल्ल**–किंशुकफुल्लं–पलासकुसुमम् । ठाणा० ४२० ।

**किंसुयपुप्फरासी**–किंशुकपुष्पराशिः । प्रज्ञा० ३६१ ।

**किइ**–कृतिः–अवनामादिकरणं, मोक्षायावनामादिचेष्टैव वा। आव० ५११ ।

**किइकम्म**–कृतिकर्म–विश्रामणा । आव० ११८ । कृतिकर्म, वन्दनं, कार्यकरणम् । भग० ६३७ । वन्दनम् । आव० ८० । सम० २३ । ओघ० २२ । पादप्रक्षालनादि । ओघ० ६३ । द्वादशावर्त्तवन्दनम् । ओघ० १५६ ।

**किई**–कृतिः–द्वादशावर्त्तादिवन्दनम् । उत्त० १७ । कृतिकर्म वन्दनम् । दश० २४१ ।

**किच्च**–कृत्यः–आचार्याणां वैयावृत्त्वम् । आव० २६० । कृतिः–वन्दनकं–तदर्हतीति कृत्यः । उत्त० ५४ । कृत्यं, आसेवनीयं कालस्वाध्यायादि । आव० ५७३ । कृत्यं उचितानुष्ठानम् । उत्त० ६५ । आचार्याद्यभिरुचितकार्यम् । दश० २५० । कृत्यः–आचार्यादिः । दश० २५० । आचार्यः । दश० २३५ । माया । नि० चू० प्र० ७७ आ ।

**किच्चकर**–ग्रामकृत्ये नियुक्तः । ग्रामव्यापृतकः । नि० चू० प्र० १७६ आ । कृत्यानि कुर्वन्ति–अनुतिष्ठन्ति कृत्यकराः–नियोगिनः । उत्त० ३०५ । ग्रामचिन्तानियुक्तः । बृ० प्र० ३१३ आ । ग्रामकृत्ये नियुक्तः । बृ० तृ० ३३ अ ।

**किच्चणं**–तत्र दिवसे क्षणिका विमुक्तकृषिलवनव्यापारा ।



Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

ओघ० ७२ । कर्त्तनम् । बृ० प्र० २४१ आ ।

**किच्चाइ**–कर्त्तव्यानि यानि प्रयोजनानीत्यर्थः, अथवा कृत्यानि नैत्यिकानि । ज्ञाता० ६१ ।

**किच्चिरस**–कियच्चिरेण । आव० ५५६ ।

**किच्चोवएसगो**–कृत्योपदेशिकः कृत्यं–कर्तव्यं सावद्यानुष्ठानं तत्प्रधानाः कृत्या–गृहस्थास्तेषामुपदेशः-संरम्भसमारम्भारम्भरूपः स विद्यते यस्य सः । कृत्यं–करणीयं पचनपाचनकण्डनपेषणादिको भूतोपमर्दकारी व्यापारस्तस्योपदेशस्तं गच्छतीति कृत्योपदेशगः कृत्योपदेशको वा । सूत्र० ४७ ।

**किच्छं**–कृच्छ्रम् । आव० ३८४ ।

**किच्छदुक्ख**–कृच्छ्रदुःखं–गाढशरीरायासः । भग० ४७० ।

**किच्छपाणो**–कृच्छ्रप्राणः । उत्त० ११८ ।

**किच्छोवगयप्पाण**–कष्टगतजीवितव्यः । ज्ञाता० २११ ।

**किटिभ**–क्षुद्रकुष्ठविशेषः । जं० प्र० १७० । नवमं क्षुद्रकुष्ठम् । प्रश्न० १६१ । आचा० २३५ ।

**किट्ट**–लोहादिमलः । आचा० ३२२ । अच्युतकल्पे विमान विशेषः । सम० ३९ । ऊर्णाद्यवयवाः तन्निष्पन्नं वस्त्रम् । बृ० द्वि० २०१ आ ।

**किट्टइत्ता**–कीर्त्तयित्वा–स्वाध्यायविधानतः संशुद्धय । उत्त० ५७२ । गुरोर्विनयपूर्वकमिदमित्थं मयाऽधीतमिति निवेद्य । उत्त० ५७२ ।

**किट्टति**–अपगच्छति । बृ० तृ० २३३ अ ।

**किट्टा**–रोमविसेसा । नि० चू० प्र० १२६ अ ।

**किट्टिअं**–कीर्त्तितम्–भोजनवेलायाममुकं मया प्रत्याख्यातं तत् पूर्णमधुना भोक्ष्य इत्युच्चारणेन । आव० ८५१ ।

**किट्टिका**–साधारणबादरवनस्पतिकायिकभेदः । जीवा०२७ ।

**किट्टिय**–कीर्त्तितं–अन्येषामुपदिष्टम् । प्रश्न० ११३ । कीर्त्तिता-पारणकदिने अयमयं चाभिग्रहविशेषः कृत आसीद् अस्यां प्रतिमायां स चाराधित एवाधुना मुत्कलोऽहमिति गुरुसमक्षं कीर्त्तनादिति । ठाणा० ३८८ ।

**किट्टिसं**–ऊर्णादीनां यदुद्धरितं किट्टिसं तन्निष्पन्नं सूत्रमपि ऊर्णादीनामेव द्विकादिसंयोगतो निष्पन्नं सूत्रम्, उक्तशेषाश्वादिलोमनिष्पन्नं वा किट्टिसम् । अनु० ३५ । कुतवो वरक्को किट्टिसं । नि० चू० प्र० १२६ अ । ऊर्णाद्यवयवनिष्पन्नं वस्त्रम् । बृ० द्वि० २०१ आ ।

**किट्टिसिय**–किल्विषिका भाण्डादय इत्यर्थः । भग० ४८१ ।

**किट्टी**–किट्टिजमवयवनिष्पन्नः । ठाणा० ३३८ ।

**किट्टीया**–साधारणबादरवनस्पतिकायविशेषः । प्रज्ञा० ३४ ।

**किट्टेइ**–कीर्त्तयति–पारणकदिने इदं चेदं चैतस्याः कृत्यं तच्च मया कृतमित्येवं कीर्त्तनात् । भग० १२५ । ज्ञाता० ७२ ।

**किट्ठं**–वाहितं । नि० चू० प्र० २२ अ । कृष्टम् । आव० ६३० । कृष्टं कर्षणं लभ्यग्रहणायाकर्षणम् । जं० प्र० १९४ ।

**किट्ठि**–देवविमानविशेषः । सम० ६ । व[...]तिविशेषः । भग० ८०४ ।

**किट्ठिकूडं**–देवविमानविशेषः । सम० ६ ।

**किट्ठिघोसं**–देवविमानविशेषः । सम० १२ ।

**किट्ठिजुत्तं**–देवविमानविशेषः । सम० ६ ।

**किट्ठिज्झयं**–देवविमानविशेषः । सम० ६ ।

**किट्ठिप्पभं**–देवविमानविशेषः । सम० ६ ।

**किट्ठिया**–अनन्तकायविशेषः । भग० ३०० ।

**किट्ठियावत्तं**–देवविमानविशेषः । सम० ६ ।

**किट्ठिलेसं**–देवविमानविशेषः । सम० ६ ।

**किट्ठिवण्णं**–देवविमानविशेषः । सम० ६ ।

**किट्ठिसाविया**– । नि०चू०प्र० ३२६ अ ।

**किट्ठिसिंगं**–देवविमानविशेषः । सम० ६ ।

**किट्ठिसिट्ठं**–देवविमानविशेषः । सम० ६ ।

**किट्ठुत्तरवडिंसगं**–देवविमानविशेषः । सम० ६ ।

**किठी**–साधारणबादरवनस्पतिकायविशेषः । प्रज्ञा० ३४ ।

**किडए**–पाककुम्भी । नि० चू० प्र० ३०३ अ ।

**किडयं**– । नि० चू० प्र० १०६ आ ।

**किडिकिडिया**–किटिकिटिका–निर्मांसास्थिसम्बन्ध्युपवेशनादिक्रियासमुत्थः शब्दविशेषः । भग० १२५ । निर्मांसास्थिसम्बन्धी उपवेशनादिक्रियाभावीशब्दविशेषः । ज्ञाता० ७६ ।

**किडिकिडीभूयं**– । विपा० ७६ ।

**किडिभं**–कुट्ठभेदो । नि० चू० द्वि० ६२ अ । जंघासु कालाभं रसियं वहति । नि० चू० प्र० १२७ आ । शरीरैक-



Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

देशभाविकुष्ठभेदः । बृ० द्वि० २२२ अ । रोगविशेषः । नि० चू० प्र० १८८ आ ।

**किडिम(भ)**–किडिमः–क्षुद्रकुष्ठविशेषः । भग० ३०८ ।

**किडिया**– । नि० चू० प्र० १२२ अ ।

**किडुंति**–अन्तर्भूतकारितार्थत्वादन्यान् क्रीडयन्ति । भग० ६१८ ।

**किड्डा**–पाशककपर्दकैः क्रीडन्ति । ओघ० ५६ । क्रीडाप्रधाना दशा क्रीडा, दशदशायां द्वितीयादशा । ठाणा० ५१९ । क्रीडा–जन्तोर्द्वितीया दशा । दश० ८ । द्वितीयादशा । नि० चू० द्वि० २८ आ ।

**किड्डावियाए**–क्रीडापिका, क्रीडनधात्री । ज्ञाता० २१९ ।

**किढ**–वृद्धः । बृ० द्वि० २५६ आ ।

**किढग**–किटकः–वृद्धः । व्य० द्वि० २३४ अ ।

**किढिण**–वंशमयस्तापसभाजनविशेषः । निरय० २६ । किढिनं–वंशमयस्तापससम्बन्धीभाजनविशेषः । भग० ३२२, ५२० ।

**किढिणसंकाइयं**–किढिणं – वंशमयस्तापसभाजनविशेषः, सांकायिकं–भारोद्वहनयन्त्रं किढिणसांकायिकम् । निरय० २६ ।

**किढिणसंकाइयगं**–किढिणं–वंशमयस्तापसभाजनविशेषस्तत्तश्च तयोः साङ्कायिकं भारोद्वहनयन्त्रं किढिणसाङ्कायिकम् । भग० ५१६ ।

**किढिणपडिरुवगं**–कठिनप्रतिरूपकं–कढिनं वंशमयस्तापससम्बन्धीभाजनविशेषस्तत्प्रतिरूपकं तदाकारं वस्तु । भग० ३२२ ।

**किढिदासी**–काष्ठिकीदासी । आव० २३७ ।

**किढिया**– । नि० चू० प्र० १३६ आ । स्थविरा माता । बृ० तृ० ११४ अ ।

**किढी**–थेरी । बृ०प्र० १९८ आ । स्थविरा स्त्री । बृ० तृ० १११ अ । काष्ठिकी । आव० २३७ ।

**किणा**–किञ्चिन्मात्रा । पिण्ड० १७३ ।

**किणिऊणं**–क्रीत्वा । आव० १९८ ।

**कुसुण**–कुशनं, दध्यादि। पिण्ड० १६५, ६०।

**कुसुणियं**–कुसुणितं–करम्बादिरूपतया कृतम्। पिण्ड० ६१।

**कुसुमं**–पाटलिपुत्राभिधं नगरम्। आव० २६४। कुसुमसमूहः। जीवा० २५५। कुसुमजातम्। जीवा० २५६। अविकसितः। औप० ५६।

**कुसुमकुंडलं**–धत्तूरकपुष्पसमानाकृतिकर्णाभरणं, दर्भकुसुमं वा। अन्त० ५।

**कुसुमघरए**–कुसुमप्रायवनस्पतिगृहम्। ज्ञाता० ६५।

**कुसुमघरगा**–कुसुमप्रकरोपचितानि गृहकाणि कुसुमगृहकाणि। जं० प्र० ४५।

**कुसुमट्टिया**–कुट्टिया पुणो मट्टियाए सह कुट्टिज्जंति। उसुमट्टिया, कुसुमट्टिया वा। नि० चू० तृ० ६४ अ।

**कुसुमपुर**–मायापिण्डोदाहरणे सिंहरथराजस्य नगरम्। पिण्ड० १३६। चूर्णद्वारविवरणे चन्द्रगुप्तराजधानी। पिण्ड० १४३। पाटलीपुत्रमभिधीयते। नि० चू० प्र० १३६ आ। बृ० द्वि० २२७ अ। मुरुण्डस्य राजधानी। बृ० द्वि० २५६ आ।

**कुसुमरसं**–कुसुमरसः, कुसुमासवः। दश० ७२।

**कुसुमसंभवे**–कुसुमसम्भवः, दशम मास नाम। जं० प्र० ४६०। सूर्य० १५३।

**कुसुमा**–कुसुमसदृशत्वात् सौकुमार्यादिगुणयोगेन कुसुमाः।



Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

जं० प्र० १३१ ।

**कुसुमानि**–पञ्चलक्षणानि जातानि यत्र तत्कुसुमितम् । ठाणा० ५०२ ।

**कुसुमासव**–किञ्जल्कः । औप० ८ ।

**कुसुमासवलोला**–किञ्जल्कपानलम्पटाः । जीवा० १८८ । मकरन्दलम्पटाः । ज्ञाता० २७ । किञ्जल्कलम्पटाः । ज्ञाता० ५ ।

**कुसुम्मिय**–कुसुमितं–सञ्जातकुसुमम् । भग० ३७ ।

**कुस्तुंबकः**–वनस्पतिविशेषः । प्रज्ञा० ३७ ।

**कुरस**–कुशो–यो वेधे प्रान्तः प्रवेश्यते । बृ० प्र० ३६ आ ।

**कुहंडयकुसुमं**–कूष्माण्डिकाकुसुमं,पुष्पा(पुंस्क)लिकापुष्पम् । प्रज्ञा० ३६१ ।

**कुहंडिया**–मुद्रितः । आव० २२४ ।

**कुहंडे**–कुहण्डः–वाणमन्तरविशेषः । प्रज्ञा० ६५ ।

**कुह**–कुहः–वृक्षः । दश० १७ ।

**कुहए**–कुहकं इन्द्रजालादि । दश० २५४ ।

**कुहकं**–कुहकं, परेषां विस्मयोत्पादनप्रयोगः । प्रश्न० १०६ । कुतूहलम् । उत्त० ६५६ ।

**कुहकणरा**–क्षेपकरणम् । नि० चू० द्वि० ७ आ ।

**कुहण**–भूमिस्फोटकविशेषः । आचा० ५७ । एक एवालापको द्रष्टव्यः, तद्योनिकानामपरेषामभावादिति भावः । सूत्र० ३५२ । कुहणविशेषः । प्रज्ञा० ३३ । कुहणः–चिलातदेशवासी । प्रश्न० १४ ।

**कुहणता**–कुधनता–दारिद्र्यभावः । क्रोधनता । प्रश्न० १०६ ।

**कुहणा**–कुहणाः–भूमिस्फोटाभिधानाः ते चाप्कायप्रभृतयः । प्रज्ञा० ३० । कुहणा–भूमिस्फोटाभिधानास्ते चाप्कायप्रभृतयः । जीवा० २६ । कुहणा–भूमिस्फोटकविशेषाः । सर्पछत्रकादिः । उत्त० ६९२ ।

**कुहर**–पर्वतान्तरालम् । ज्ञाता० ६३ । जं० प्र० १४४ ।

**कुहव्वए**–कन्दविशेषः । उत्त० ६९१ ।

**कुहा**–कुत्ति पुहवि तीए धारिज्जंति तेणं कुहा । दश० चू० ६ ।

**कुहाड**–प्रहरणविशेषः । नि० चू० प्र० १०५ अ ।

**कुहित**–कुथितः–कोथमुपनीतः । ज्ञाता० ६७ ।

**कुहिय**–कुथितः–पूतिभावमुपगतः । जीवा० १०७ । कोथमुपगतः, ईषद्दुर्गन्धः । ज्ञाता० १२६ ।

**कुहुंडियाकुसुमं**–कूष्माण्डीकुसुमं–पुष्पफलीकुसुमम् । जीवा० १९१ ।

**कुहुक**–कुतूहलम् । उत्त० ३४७ ।

**कुहुण**–वनस्पतिविशेषः । भग० ८०४ । भूमिस्फोटकविशेषः । आचा० ५७ ।

**कुहेडविज्जा**–कुहेटकविद्या-अलीकाश्चर्यविधायिमन्त्रतन्त्रज्ञानात्मिका । उत्त० ४७६ ।

**कूअ**–कुतपः–तैलादिभाजनम् । जं० प्र० २६४ ।

**कूअणता**–कूजनता–आर्त्तस्वरकरणम् । ठाणा० १४६ ।

**कूइआ**–कूचिका । आव० १०२ ।

**कूइए**–कूजितम्–कासितम । आव० ५७४ ।

**कूइगादि**–कूचिकादि । आव० १९८ ।

**कूचिया**–कूचिका–बिन्दुरूपा बुद्बुदा । विशे० ६३३ ।

**कूच्च**–कूर्चः–गूढकेशोन्मोचको वंशमयः । उत्त० ४९३ ।

**कूजणया**–मातिपितिभातिभगिणीपुत्तदुहित्तमरणादीविं(सु) महइमहंतेण सद्देण रोवइत्ति कूजणया । दश० चू० १५ ।

**कूजन्त**–अव्यक्तं शब्दायमानम् । ज्ञाता० १६७ ।

**कूजित**–विविधविहगभाषयाऽव्यक्तशब्दं सुरतसमयभाविनम् । उत्त० ४२५ ।

**कूट**–कूटम् । भग० १८२ ।

**कूटग्राह**– । ठाणा० ५०७ ।

**कूटप्रयोगकारी**–प्रच्छन्नपापः । आव० ५८६ ।

**कूड**–कूटं–शिखरं,स्तूपिका: अथवा कूटं–सत्त्वबन्धनस्थानम् । ठाणा० २०५ । कूटं–शिखरम् । जीवा० २०५ । परवञ्चनार्थं न्यूनाधिकभाषणम् । प्रश्न० २७ । मानादीनामन्यथाकरणम् । प्रश्न० ५८ । कार्षापणतुलाप्रस्थादेः परवञ्चनार्थं न्यूनाधिककरणम् । सूत्र० ३३० । कार्षापणतुलादेः परवञ्चनार्थं न्यूनाधिकरणम् । ज्ञाता० ८० । कार्षापणतुलाव्यवस्थापत्रादीनामन्यथाकरणम् । ज्ञाता० २३८ । रत्नकूटादि । अनु० १७३ । असत्भूतम् । आव० ८२१ । कूटं–भ्रान्तिजनकद्रव्यम् । जं० प्र० १६६ । महच्छिखरम् । जं० प्र० ४६ । मृगग्रहणकारणं गर्त्तादि । भग० ६३ । शिखरं, हस्त्यादिबन्धनस्थानं वा । भग० २३८ । माडभागः । रजतमय उत्सेधः । जं० प्र०



Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

४६ । भ्रान्तिजनकद्रव्यम् । भग० ३०८ । कूटः-सिद्धायतनकूटप्रभृतिः । प्रज्ञा० ७१ । माडभागः । जीवा० २०४, ३६० । कुटकेषु-अधोविस्तीर्णेषूपरि संकीर्णेषु वृत्तपर्वतेषु हस्त्यादिबन्धनस्थानेषु वा । ज्ञाता० ६७ । कूटं-प्रभूतप्राणीनां यातनाहेतुत्वं नरक इत्यर्थः । उत्त० २४३ । पर्वतः । नंदी० २२८ । माडभागः । राज० ६२ । पाषाणमयमारणमहायन्त्रम् । भग० ६७३ ।

**कूडकवडमवत्थुगं**-कूटकपटावस्तुकं-कूटं-परवञ्चनार्थं न्यूनाधिकभाषणं, कपटं-भाषाविपर्ययकरणं । अविद्यमानं वस्तु-अभिधेयोऽर्थो यत्र तत् । समानार्थत्वादेकमधर्मद्वारस्य षष्ठं नाम । प्रश्न० २६ ।

**कूडग्गाहो**-कूटेन जीवान् गृह्णातीति कूटग्राहः । विपा० ४८ ।

**कूडछेलियहत्थो**-कूटछेलिकाहस्तः-या च कूटेन स्थाप्यते चित्रकादिग्रहणार्थं छेलिका-अजा सा, कूटं-मृगादिग्रहणयन्त्रं च छेलिका चेति कूटछेलिका सा हस्ते यस्य सः । प्रश्न० १३ ।

**कूडतुलकूडमाणे**-कूटतुलाकूटमानं, तुलया कुडवादिमानेन च यन्न्यूनाधिकत्वम् । आव० ८२२ ।

**कूडत्तं**-कूटत्वं-न्यूनाधिकत्वम् । आव० ८२३ ।

**कूडपासए**-कूटपाशकः । आव० ४३५ ।

**कूडया**-कूटता-तुलादीनामन्यथात्वम्, तृतीयाधर्मद्वारस्य द्वाविंशतितमं नाम । प्रश्न० ४३ ।

**कूडरूवग**-कूटरूपकः । आव० ४२१ । कूटरूप्यम् । आव० २०० ।

**कूडलेहकरणं**-कूटं-असद्भूतं लिख्यत इति लेखः, तस्य करणं-क्रिया कूटलेखक्रिया-कूटलेखकरणं अन्यमुद्राक्षरबिम्बस्वरूपलेखकरणमित्यर्थः । आव० ८२० ।

**कूडव**-मानविशेषः । आव० ८२३ ।

**कूडवाही**-कूटवाही, बलीवर्दः । आव० ७६७ ।

**कूडसक्खिज्जं**- कूटसाक्षित्वम्- उत्कोचमात्सर्याद्यभिभूतः प्रमाणीकृतः सन् कूटं वक्ति, अविधवाद्यनृतस्यात्रैवान्तर्भावो वेदितव्यः । आव० ८२० ।

**कूडसामलिपेढे**-कूटाकारा-शिखराकारा शाल्मली तस्याः पीठं-कूटशाल्मलीपीठम् । जं० प्र० ३५५ ।

**कूडसामली**-कूटाकाराशिखराकारा शाल्मली कूटशाल्मली । ठाणा० ६६, ७६ ।

**कूडा**-कूटाः-नन्दनवनकूटादिकाः । प्रश्न० ६६ ।

**कूडागारं**-धन्नागारं । नि० चू० प्र० २६५ अ । कूटागारं-सशिखरभवनम् । प्रश्न० ८२ । पव्वतसंठितं उवरुवरिभूमियाहिं वट्टमाणं कुडागारं, कूडेवागारं कूडागारं पर्वते कुट्टितमित्यर्थः । नि० चू० द्वि० ६६ आ । कूटाकारः । जीवा० २६६ ।

**कूडागारसंठिओ**-कूटाकारसंस्थितः-शिखराकारसंस्थितः । जीवा० २७६ ।

**कूडागारसाला**-कूटाकारेण-शिखराकृत्योपलक्षिता शाला कूटाकारशाला । भग० १६३ । कूटस्येव-पर्वतशिखरस्येवाकारो यस्याः सा तथा, सा चासौ शाला च । विपा० ६३ । कस्मिंश्चिदुत्सवे कस्मिंश्चिन्नगरे बहिर्भागप्रदेशे महती देशिकलोकवसनयोग्या शाला-गृहविशेषः । निरय० २२ । कूटस्येव-पर्वतशिखरस्येवाकारो यस्याः सा कूटाकारा यस्या उपरि आच्छादनं शिखराकारं सा कूटाकारेति, कूटाकारा चासौ शाला च कूटाकारशाला, यदिवा कूटाकारेण शिखराकृत्योपलक्षिता शाला कूटाकारशाला । राज० ५८ ।

**कूडाहच्चं**- कूटस्येव-पाषाणमयमारणमहायन्त्रस्येवाहत्या-आहननं यत्र तत् कूटाहत्यम् । भग० ६७० । कूटे इव तथाविधपाषाणसम्पुटादौ कालविलम्बाभावसाधर्म्यादाहत्या-आहननं यत्र तत् कूटाहत्यम् । भग० ३२३ ।

**कूणिए**-श्रेणिकचेल्लणयोः पुत्रः । निरय० ४ । श्रेणिकराजपुत्रः । ज्ञाता० ६ । चम्पानगर्यां राजा । निरय० १६ । चम्पायां राजा । भग० ६२० ।

**कूणिओ**-कूणिकः-चम्पायां राजा । भग० ३२० । शिक्षायोगदृष्टान्ते श्रेणिकपुत्रः, अपरनाम अशोकचन्द्रः । आव० ६७६ । भग० ५५६ । परकृतमरणे दृष्टान्तः । भग० ७६६ ।

**कूपिअं**-कूपिका, सन्निवेशः । महावीरस्वामिविहारभूमिः । आव० २०७ ।

**कूबरं**-युगन्धरम् । जं० प्र० २६१ ।

**कूयरा**-कुत्सितं शिष्टजनजुगुप्सितं चरन्ति इति कुचराः-



Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

उद्भ्रामका, उद्भ्रामिका वा । बृ० द्वि० ६४ अ ।

**कूर**-भक्तं । बृ० प्र० २३६ अ । ओदनविशेषः । ओघ० १३३ । कूरः । आव० ३५२, ६२४ । धान्यविशेषः । आव० ३१४ । परिकथनायां दृष्टान्तः । ओघ० ६६ ।

**कूरओडिया**-कूरकोटिका-सिक्थप्रचटिका । आव० ६२२ ।

**कूरकम्मा**-क्रूरकर्माः, क्रूराणि कर्माणि यस्य सः । प्रश्न० १३ ।

**कूरगडुकप्राय**-सीयकूरभोई अन्तपन्ताहारो । भग० ७०५ ।

**कूरपुवगादि**-कूरसिस्थादि, (देशीवचनं) । आव० ३१५ ।

**कूरभायण**-कूरभाजनः, ओदनभाजनः । दश० ३८ ।

**कूरविहाणं**-कूरविधानम् । आव० ८५५ ।

**कूरिकड**-क्रूरिकृतं, क्रूरं चित्तं क्रूरो वा परिजनो यस्यास्ति स क्रूरी, तेन कृतं-अनुष्ठितम् । तृतीयाधर्मद्वारस्य चतुर्थं नाम । प्रश्न० ४३ ।

**कूर्मापुत्रः**-नामविशेषः । औप० ११७ । कूर्मापुत्रः । प्रज्ञा० १०६ ।

**कूर्मोन्नता**-मनुष्ययोनिभेदः । आचा० ६७ ।

**कूलधमग**-कूले स्थित्वा । भग० ५१६ ।

**कूलवारओ**-कूलवारकः विशालाभङ्गे श्रमणदृष्टान्तः । आव० ४३७ ।

**कूलवाल**-श्रमणविशेषः । सूत्र० १३ ।

**कूलवालओ**-कूलवालकः, विशालाभङ्गे श्रमणदृष्टान्तः । आव० ४३७ ।

**कूलवालक**-गुरूणामेव प्रत्यनीकः । बृ० प्र० २१४ अ । विशालाभङ्गे श्रमणदृष्टान्तः । नंदी० १६७ । शिलाक्षेपकः श्रमणः । उत्त० ४४ । आचार्यादिप्रतिकूलत्वे निदर्शनीभूतः क्षुल्लकः । उत्त० ५४६ ।

**कूलवालगो**-कूलवालकः-शिलाऽक्षेपकः श्रमणः । आव० ६८५ ।

**कूलवालो**-श्रमणोऽविनीतः । बृ० द्वि० ५ आ ।

**कूव**-कूपः । आव० ५८१ । प्रश्न० ८ । कूजकं-व्यावर्त्तकबलम् । ज्ञाता० २२१ । अन्धकूपादिः । प्रश्न० ५६ । कूपः-रोमरन्ध्रः । भग० ४६० । कुतुपः । ज्ञाता० ५७ ।

**कूवए**-अन्तकृद्दशानां तृतीयवर्गस्य एकादशमध्ययनम् । अन्त० ३ ।

**कूवणय**-कूपनयः-कुमारायां कुम्भकारः । आव० २०२ ।

**कूवति**-कूजति-शब्दं करोति । आव० ८१६ ।

**कूवमहो**-कूपमहः-कूपसत्क उत्सवः । जीव० २८१ ।

**कूवय**-कूपकः, स्तम्भविशेषः । औप० ४८ ।

**कूवयट्ठाणं**-कूपकस्थानम् । नि० चू० प्र० ४७ अ ।

**कूवर**-कूबरं-तुण्डम् । ज्ञाता० १५६ ।

**कूविए**-चोरगवेषकः । ज्ञाता० ७६ । कूपिका । ज्ञाता० ७६ ।

**कूविय**-कूजकः, व्याहारकारी, गवां व्यावर्त्तका इत्यर्थः । पिण्ड ४७ ।

**कूवियबल**-निवर्त्तकसैन्यानि । ज्ञाता० २३८ ।

**कूष्माण्डः**-व्यन्तरविशेषः । प्रश्न० ५१ ।

**कूष्माण्डाः**-पिशाचविशेषः । प्रज्ञा० ७० ।

**कूष्माण्डी**-वल्लीविशेषः । जीवा० २६ । प्रज्ञा० ३० ।

**कूसेह**-( देशी० ) गवेषयत । बृ० द्वि० १२० अ ।

**कूहंड**-कूष्माण्डः, व्यन्तरनिकायामुपरिवर्त्तिनो जातिविशेषः । प्रश्न० ६६ ।

**कृकलासः**-अण्डविशेषः । दश० २३० ।

**कृतकुलः**-कृतकुरुकुचः । व्य० द्वि० १६१ आ ।

**कृतनिष्ठितता**-तन्दुलानां वपनमारभ्य यावद् वारद्वयं कण्डनं तावत् कृतत्वम्, तेषाञ्च तृतीयवारं तु कण्डनं निष्ठितत्वम् । पिण्ड० ६६ ।

**कृतप्रतिकृतिकः**-कृते-उपकृते प्रतिकृतं-प्रत्युपकारः तद् यस्यास्ति स । ठाणा० २८५ ।

**कृतमालिक**-यक्षविशेषः । ठाणा० २५८ ।

**कृतमाल्यक**-तमिस्रागुहायाः अधिष्ठायकदेवः । ठाणा० ७१ ।

**कृतयुगादीनि**- । ठाणा० १७८ ।

**कृतवीर्यः**-कार्त्तवीर्यपिता क्षत्रियः । सूत्र० १७०, १७८ । कार्त्तवीर्यपिता । सूत्र० ३६५ ।

**कृतिकर्म्म**-द्वादशावर्त्तवन्दनकम् । ठाणा० ४०८ । कर्मणोऽपनयनकारकमर्हत्सिद्धाचार्योपाध्यायविषयमवनामादिरूपमिति । आव० ६८ ।

**कृपणादि**-द्रव्यशस्त्रम् । आचा० १७४ ।

**कृमिः**-पृथिव्याश्रितो जीवविशेषः । कचवरनिश्रितो जीव-



Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

**कृमिराग**–लोभस्य लक्षणसूचकः। आचा० १७० । जीवा १९१ ।

**कृमिरागपट्टसूत्रं**– मनुष्यादिशोणितोत्पन्नकृमिलालसमुत्पन्नम्। अनु० ३५ ।

**कृषिवलः**–कर्षकः । आव० ८१५ ।

**कृष्णः**–केवलसम्यग्दर्शनी । आव० ८०५ । साधारणवनस्पतिविशेषः । आचा० ५७ । साधारणवनस्पतिकायिकभेदः । जीवा० २७ । कृष्णकं, साधारणवनस्पतिविशेषः । प्रज्ञा० ४० ।

**कृष्णपाक्षिकः**–संसारापरीत्तः । जीवा० ४४६ ।

**कृष्णराज्ञी**–ईशानदेवेन्द्रस्य द्वितीयाऽग्रमहिषी । जीवा० ३६५ ।

**कृष्णसारः**–नेत्रमध्यवर्त्तिनी कनीनिका । उत्त० ६५२ ।

**कृष्णवासुदेवः**–द्वारिकाधिपतिः । प्रश्न० ८८ ।

**केइ**–काश्चिन्न सर्वा इत्यर्थः । ज्ञाता० २३१ ।

**केइत्थ**–कांश्चिदत्र । ज्ञाता० २३१ ।

**केउ**–केतु–मेघवृष्ट्या निष्पद्यते तत् । प्रासादगृहादिकम् । बृ० प्र० १३८ आ। वर्षावारिनिष्पाद्यं क्षेत्रम् । बृ० तृ० ५० अ ।

**केउते**–पातालकलशविशेषः । ठाणा० २२६ ।

**केउमती**-धर्मकथायाः पञ्चमवर्गस्य अष्टादशमध्ययनम् । ज्ञाता० २५२ ।

**केउस्सवि**– । सम० ८७ ।

**केऊ**–केतुः, जलकेत्वादिकः । औप० ५२ । ज्योतिष्कविशेषः । प्रश्न० ९५ ।

**केऊर**–पातालकलशविशेषः । ठाणा० ४८० । केयूरं–अङ्गदम् । जं० प्र० १०६ ।

**केकई**–अष्टमवासुदेवस्य माता । सम० १५२ ।

**केकय**–चिलातदेशवासी म्लेच्छविशेषः । प्रश्न० १४ ।

**केकयअद्धं**–केकयार्द्धं, जनपदार्द्धविशेषः । प्रज्ञा० ५५ ।

**केकारवं**–केकायितं–मयूराणां शब्दः । ज्ञाता० ९६ ।

**केगमई**–कैकेयी–लक्ष्मणवासुदेवमाता । आव० १६२ ।

**केज्जगं**–क्रय्यम् । आव० ६७७ ।

**केतइ**–वलयविशेषः । प्रज्ञा० ३३ ।

**केतकी**–वलयविशेषः । प्रज्ञा० ३१ । वलयविशेषः । आचा० ३० । सुरभिकुसुमविशेषः । उत्त० ६५४ । जीवा० १९१ ।

**केतनं**–सामान्येन । ठाणा० २१८ । संकेतः । व्य० द्वि० १२५ अ ।

**केतराती**– । नि० चू० प्र० ३३० अ ।

**केतु**–आकाशपतितोदकनिष्पाद्यं क्षेत्रम् । आव० ८२६ । ध्वजः । जीवा० १८८ ।

**केतुकरे**–चिह्नकरः अद्भूतकारित्वादिति । ठाणा० ४६३ ।

**केतुमती**–किन्नरेन्द्रस्य द्वितीयाऽग्रमहिषी । भग० ५०४ । ठाणा० २०४ ।

**केदारः**–वप्रः, जलस्थानम् । जीवा० १२३ ।

**केमहालए**-किमहालयः–कियान् । जं० प्र० ४५० । किं महत्त्वं यस्यासौ किंमहत्त्वः । भग० १५१ ।

**केमहालय**–किमहान्, कियत्प्रमाणमहत्त्वम् । जीवा० १३८ ।

**केमहालिका**–किम्महती । जीवा० ३७२ ।

**केमहालिया**–किम्महती । सम० १४२ । कियन्महती–किम्महत्त्वोपेता–कियती वा । अनु० १६३ ।

**केमहिड्डिए**–केन रूपेण महर्द्धिकः, किंरूपा वा महर्द्धिरस्येति किंमहर्द्धिकः । कियन्महर्द्धिकः । भग० १५४ ।

**केय**–केतनं, केतः–चिह्नमङ्गुष्ठमुष्टिग्रन्थिगृहादिकम् । ठाणा० ४९९ । केतं–चिह्नम् । आव० ८४१ । केतः–चिह्नम् । भग० २९७ । केया–रज्जुः । दश० १०६ । रज्जु । नि० चू० प्र० २० ।

**केयइ**–गुच्छाविशेषः । प्रज्ञा० ३२ ।

**केयइअद्धे**–केकयीनामार्धं–अर्धमात्रमार्यत्वम् । राज० ११३ ।

**केयइपुड**–गन्धद्रव्यविशेषः । पुष्पजातिविशेषः । ज्ञाता० २३२ ।

**केयण**–कृतकम् । नि० चू० प्र० ३५१ अ । शृङ्गमयधनुर्मध्ये काष्ठमयमुष्टिकात्मकम् । उत्त० ३११ । केतनं–मत्स्यबन्धनम् । सूत्र० ८२ ।

**केयकंदली**–कन्दविशेषः । उत्त० ६९१ ।

**केयति**–वनस्पतिविशेषः । भग० ८०३ ।

**केयाघडिया**–रज्जुबद्धघटिकाहस्तः सन् विहायसि व्रजेदि-



Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

त्याद्यर्थप्रतिपादनार्थः, त्रयोदशशते नवम उद्देशकः । भग० ५९६ । रज्जुप्रान्तबद्धघटिका । भग० ६२७ ।

**केयार**–अवन्तीजनपदे कूपविशेषः । व्य० प्र० १८ अ । नि० चू० प्र० ३५१ अ ।

**केयावंती**–केआवन्ति–केचन । आचा० १८५ ।

**केयूरं**–आभरणविशेषः । आव० १८२ । भूषणविधिविशेषः । जीवा० २६९ । बाह्याभरणविशेषावित्यर्थः । ठाणा० ४२१ ।

**केयूवो**–केयूपः, मेरोर्दक्षिणस्यां पातालकलशः । जीवा० ३०६ ।

**केलास**-कैलासः–मेरुः । नि० चू० द्वि० ९९ अ । कैलाशः राहोः कृष्णपुद्गलः । सूर्य० २८७ । साकेतनगरे गाथापतिविशेषः । अन्त० २३ । अन्तकृद्दशानां षष्ठवर्गस्य सप्तममध्ययनम् । अन्त० १८ । ठाणा० २२६ । कैलाशः, नन्दीश्वरद्वीपे पूर्वार्द्धाधिपतिर्देवविशेषः । जीवा० ३६५ । तृतीयोऽनुवेलन्धरनागराजः, तस्यैवाऽऽवासपर्वतश्च । जीवा० ३१३ ।

**केलासभवणं**–कैलासभवनं कैलासपर्वतरूपाश्रयः । पिण्ड० १३२ ।

**केलाससमा**–कैलाससमा–कैलासपर्वततुल्या । उत्त० ३१६ ।

**केलि**–परिहासः । बृ० प्र० २६९ आ । क्रीडा । जीवा० १७३ । प्रज्ञा० ९६, २५८ । केलिः, नर्म । औप० ५२ ।

**केलीकिलः**– । आचा० २५५ ।

**केवइका**–द्रुम्माः । बृ० तृ० १३९ आ ।

**केवइकालं**–कियत्कालम् । भग० १९ ।

**केवइकालस्स**–कियता कालेन । जीवा० १४१ ।

**केवगादि**–द्रव्यविशेषः । नि० चू० द्वि० ४४ अ ।

**केवच्चिरं**–कियच्चिरं, कियन्तं कालं यावत् । जीवा० ६७ । कियच्चिरं–कियत्कालम् । भग० ११६ ।

**केवडिया**–रूप्यकाः । बृ० प्र० २९७ आ ।

**केवलं**–शुद्धम् । आव० ७६९ । ठाणा० ४६ । अकलङ्कम् । उत्त० १८८ । सम्पूर्णज्ञेयविषयत्वात् सम्पूर्णम् । अनु० २ । परिपूर्णं, विशुद्धं वा । प्रश्न० १३५ । सकलजगद्भाविसमस्तवस्तुसामान्यपरिच्छेदरूपम् । प्रज्ञा० ५२७ । असहायं, मत्यादिज्ञाननिरपेक्षं, शुद्धं, तदावरणकर्ममलकलङ्काङ्करहितं, सकलं, तत्प्रथमतयैव अशेषतदावरणाभावतः सम्पूर्णोत्पत्तेः, असाधारणं, अनन्यसदृशं, ज्ञेयानन्तत्वादनन्तं, यथावस्थिताशेषभूतभवद्भाविभावस्वभावावभासि वा । आव० ८ । अद्वितीयम् । आव० ७६० । असहायं, मत्यादिनिरपेक्षत्वादकलङ्कं वा आवरणमलाभावात्, सकलं वा तत्प्रथमतयैवाशेषतदावरणाभावतः सम्पूर्णोत्पत्तेरसाधारणं वा, अनन्यसदृशत्वादनन्तं वा । ठाणा० ४७ । असहायं मत्यादिज्ञाननिरपेक्षत्वात् शुद्धं वा, आवरणमलकलङ्करहितत्वात्, सकलं वा तत्प्रथमतयैवाशेषतदावरणाभावतः सम्पूर्णोत्पत्तेः असाधारणं वा, अनन्यसदृशत्वात् अनन्तं वा । ठाणा० ३४८ । केवलः–शुद्धः, अन्यपदासंसृष्टः । दश० १२६ । परिपूर्णः । ज्ञाता० १८० । भग० १५५ । असहायं, शुद्धं, परिपूर्णं, असाधारणं, अनन्तं वा । भग० ६६ । सुद्धो अण्णेण सह असंजुत्तो । दश० चू० ५४ ।

**केवलकप्प**–केवलकल्पं, केवलं–केवलज्ञानं तत्कल्पं परिपूर्णतया तत्सदृशं परिपूर्णमित्यर्थः । प्रज्ञा० ६०० । परिपूर्णम् । जीवा० १०९ । संपूर्णम् । बृ० तृ० ५२ आ । केवलज्ञानसदृशः, संपूर्णपर्यायो वा केवलकल्प इति । भग० १५५ । केवलः–परिपूर्णः स चासौ स्वकार्यसामर्थ्यात् कल्पश्च केवलज्ञानमिव वा परिपूर्णतयेति, केवलकल्पः समयभाषया परिपूर्णः । ठाणा० ६१ । केवलः–परिपूर्णः स चासौ कल्पश्च स्वकार्यसमर्थ इति केवलकल्पः । ज्ञाता० १८० ।

**केवलकप्पा**–केवलकल्पा–परिपूर्णा, परिपूर्णप्राया वा । ठाणा० १६१ ।

**केवलदंसणं**–केवलमेव दर्शनं–सकलजगद्भाविवस्तुसामान्यपरिच्छित्तिरूपं केवलदर्शनम् । जीवा० १८ ।

**केवलदंसणि**–केवलं–सकलदृश्यविषयत्वेन परिपूर्णं दर्शनं केवलदर्शनी-तदावरणक्षयाविर्भूततल्लब्धिमतो जीवस्य सर्वद्रव्येषु मूर्तामूर्तेषु सर्वपर्यायेषु च भवतीति । अनु० २२० ।

**केवलनाणं**–केवलज्ञानं–पञ्चमकं ज्ञानं, अथवाऽनन्तराभिहितज्ञानसारूप्यप्रदर्शक एव । आव० ८ । पञ्चमं ज्ञानम् । ठाणा० ३३२ ।

**केवलवेयसो**–केवलवेदसः–अवगततत्त्वः । जीवा २५६ ।



Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

**केवलि**–केवली–श्रुतावधिमनःपर्यायकेवलज्ञानी । ठाणा० ६८ ।

**केवलिआराहणा**–केवलिनां–श्रुतावधिमनःपर्यायकेवलज्ञानिनामियं केवलिकी सा चासावाराधना चेति केवलिकाराधना । ठाणा० ६८ ।

**केवलिइए**–रूप्यकाः । बृ० तृ० ६३ आ ।

**केवलिउवासग**–केवलिनमुपास्ते यः श्रवणानाकाङ्क्षी तद् उपासनमात्रपरः सन्नसौ केवल्युपासकः । भग० २२२ ।

**केवलिए**–केवलं–अद्वितीयं केवलिप्रणीतत्वाद् वा कैवलिकम्। ज्ञाता० ५१ ।

**केवलिकंसंसे**–केवलिनः 'कम्मंस'त्ति कार्मग्रन्थिकपरिभाषयाऽंशशब्दस्य सत्पर्यायत्वात् सत्कर्माणि केवलिसत्कर्माणि भवोपग्राहीणि । उत्त० ५८६ ।

**केवलिकी**– । प्रज्ञा० ३६६ ।

**केवलिकेवली**–केवलिनस्तृतीयो भेदः । नि० चू० द्वि० १३६ आ ।

**केवलिपन्नत्तो**–केवलिप्रज्ञप्तः–सर्वज्ञदेशितः । प्रज्ञा० ३६६ ।

**केवलिमरण**–केवलिमरणम् । सम० ३३ । ये केवलिनः–उत्पन्नकेवलाः सकलकर्म्मपुद्गलपरिशाटतो म्रियन्ते तज्ज्ञेयमिति । मरणस्य द्वादशो भेदः । उत्त० २३४ ।

**केवलिय**–केवलमद्वितीयं नापरमित्थम्भूतम् । आव०७६० । कैवलिकं–परिपूर्णम् । आव० ३२६ । केवलस्य भावः कैवल्यं–घातिकर्मवियोगः । आव० ७३ ।

**केवलिसमुग्घाय**–केवलिनि अन्तर्मुहूर्त्तभाविपरमपदे समुद्घातः केवलिसमुद्घातः । जीवा० १७ ।

**केवलिसावग**–जिनस्य समीपे यः श्रवणार्थी सन् शृणोति तद्वाक्यान्यसौ केवलिश्रावकः । भग० २२२ ।

**केवली**–सर्वज्ञः । भग० ६७ । चतुर्दशशतके दशम उद्देशः । भग० ६३० ।

**केवलीणठाणं**–केवलिनां स्थानं, केवलिनामहिंसायां व्यवस्थितत्वात् । अहिंसायाः षट्त्रिंशत्तमं नाम । प्रश्न०९९ ।

**केशर**–पद्मपक्ष्मम् । भग० १२ । जं० प्र० १३८ ।

**केशव**–कृष्णः । आचा० ३६० ।

**केशि**–उदायनभागिनेयः । ठाणा० ४३१ ।

**केशिगौतमीयं**–केशिगौतमाभ्यामभिहितं । विशे० ६४८ ।

**केस**–केशाः–शिरोजाः । सम० ६१ । शिरसिजाः । उत्त० ३३८ । कः–अज्ञातकुलशीलसहजत्वादनिर्दिष्टनामकः सकारः प्राकृतशैलीभवः । जं० प्र० २०२ ।

**केसभूमी**–केशभूमिः, केशोत्पत्तिस्थानभूता मस्तकत्वक् । जीवा० २७३ ।

**केसमंसु**–श्मश्रूणि, कूर्चकेशाः । भग० ८८ ।

**केसर**–किञ्जल्कः । जं० प्र० ४२ । आचा० ८१ । वर्णविशेषः । आचा० २६ । केशरम् । आव० ४१६, ६३५ । ज्ञाता० ६८ । केशरः–गन्धः । आव० २७७ । केसरोपलक्षितः । जीवा० १७६ । केसरप्रधानम् । जीवा० १२३ । काम्पील्यनगरे उद्यानविशेषः । उत्त० ४३८ ।

**केसरचामरवाल**–सिंहस्कन्धचमरपुच्छकेशाः । ज्ञाता० २२२ ।

**केसरपाली**–केसरपालिः–स्कन्धकेशश्रेणिः । जं०प्र०५३० ।

**केसरा**–केसराणि–कर्णिकायाः परितोऽवयवाः । जं० प्र० २८४ ।

**केसरि**–द्रहविशेषः । ठाणा० ७३ ।

**केसरिका**–पात्रमुखवस्त्रिका । ओघ० २१२ ।

**केसरिद्दहो**–केसरिद्रहो नाम द्रहः । जं० प्र० ३७७ ।

**केसरिया**–केशरिका–प्रमार्जनार्थं चीवरखण्डम् । भग० ११३ । औप० ६५ ।

**केसरी**–चीवरखण्डं प्रमार्जनार्थम् । ज्ञाता० ११० । प्रतिवासुदेवनाम । सम० १५४ ।

**केसरुमती**– । व्य० प्र० २८० आ ।

**केसव**–केशवः–वासुदेवः । आव० १६६ । ज्ञाता० २१३ । जीवा० १२६ । वसुदेवलघुसुतः वासुदेवः । उत्त० ४८६ । अपरविदेहे जीर्णश्रेष्ठिपुत्रः, श्रेयांसजीवः । ऋषभपूर्वभववैद्यपुत्रस्य मित्रम् । आव० १४६ ।

**केसवरिसं**–केशवर्षः । आव० ७३४ ।

**केसवाणिज्ज**–केशवाणिज्यम् । दासीर्गृहीत्वाऽन्यत्र विक्रीणाति । आव० ८२६ ।

**केसहत्थ**–केशहस्तो–धम्मिल्लः । भग० ४६८ ।

**केसा**–केशाः–शिरोजाः । प्रश्न० ६८ ।

**केसि**–कीदृशी स्त्री । अनु० १३ ।

**केसिआ**–केशा विद्यन्ते यस्याः सा केशिका । सूत्र० ११६ ।



Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

**केसिगोयमिज्जं**-केशिगौतमीयं, उत्तराध्ययनेषु त्रयोविंशतितममध्ययनम् । उत्त० ६ । केशिगौतमीयं-उत्तराध्ययनेषु त्रयोविंशतितममध्ययनम् । उत्त० ४६७ ।

**केसिसामि**-केशिस्वामी । भग० १३८ । केशिनामा आचार्यः । भग० ५४८ ।

**केसी**-पार्श्वापत्यः श्रमणः । राज० ११८ । निरय० १, ४० । केशी-विगतिद्वारे उदायनस्य भागिनेयः । आव० ५३७ । केश्यभिधानः कंससत्को दुष्टोऽश्वः । प्रश्न० ७५ । उदायनस्य भागिनेयः । भग० ६१८ ।

**केसुअ**-किंशुकं-पलाशपुष्पम् । जं० प्र० २१२ ।

**कैदारकः**-मल्लः । पिण्ड० ६६ ।

**कैवल्यं**-घातिकर्मवियोगः । विशे० ५२७ ।

**कोंकण**-देशविशेषः । आचा ५ । व्य० प्र० १६८ अ । नि० चू० प्र० ६३ अ । नि० चू० द्वि० ७६ आ ।

**कोंकणकसाधुः**-अपध्यानाचरिते साधुः । आव० ८३० ।

**कोंकणग**-म्लेच्छविशेषः । प्रश्न० १४ । प्रज्ञा० ५५ । कोङ्कणकः-देशविशेषः । आव० ६३ । प्राणातिपातदोषविषये उदाहरणम् । आव० ८१८ ।

**कोंकणगखमणओ**-कोङ्कणकक्षपकः-मनोदण्डे उदाहरणम् । आव० ५७७ ।

**कोंकणगदेसो**-कोङ्कणकदेशः-कर्मसिद्धोदाहरणे देशविशेषः । आव० ४०८ ।

**कोंकणगरुवं**- । ओघ० १५६ ।

**कोंकणगसावगो**-कोङ्कणकश्रावकः-गुणोदाहरणे श्राद्धः । आव० ८२१ ।

**कोंकारव**-कोङ्कारवः, पुरद्वारस्योद्घाट्यमानस्याव्यक्तोऽयं शब्दः । दश० ४८ ।

**कोंच**-म्लेच्छविशेषः । प्रज्ञा० ५५ । क्रौञ्चः-पक्षिविशेषः । आव० ३६६ । क्रोञ्चः, लोमपक्षिविशेषः । जीवा० ४१ । चिलातदेशनिवासी म्लेच्छविशेषः । प्रश्न० १४ ।

**कोंचवरो**-क्रौञ्चवरः, अपान्तरालद्वीपः । जीवा० ३६८ ।

**कोंचवीरग**-पेटासदृशं जलयानम् । बृ० द्वि० ३२ अ ।

**कोंचस्सरा**-क्रौञ्चस्वरा-विद्युत्कुमाराणां घण्टा । जं० प्र० ४०७ । क्रौञ्चस्वरः, क्रौञ्चस्येव स्वरो यस्य सः । जीवा० २०७ ।

**कोंचा**-लोमपक्षिविशेषः । प्रज्ञा० ४६ ।

**कोंचावली**-क्रौञ्चावलिः । जीवा० १६१ ।

**कोंचासणं**-क्रौञ्चासनं, यस्यासनस्याधोभागे क्रौञ्चो व्यवस्थितः सः । जीवा० २०० ।

**कोंची**-द्रविडदेशे नगरी । बृ० द्वि० २२७ अ ।

**कोंटलवेंटलं**-कार्मणवशीकरणादि । आव० १६३ ।

**कोंडग**-क्षत्रियविशेषः । नि० चू० प्र० १२ अ ।

**कोंडलमेंढं**-कुण्डलमेंढ-भृगुकच्छे वाणव्यन्तरविशेषयात्रास्थानम् । बृ० द्वि० १३६ अ । भृगुकच्छे वाणव्यन्तरविशेषः । बृ० द्वि० १३६ अ ।

**कोंडिण्णो**-कौण्डिन्य-तापसविशेषः । आव० २८७ ।

**कोंडिन्न**-कोण्डिन्य-शिवभूतिशिष्यः । विशे० १०२२ ।

**कोंडियायण**-चैत्यविशेषः । भग० ६७५ ।

**कोंतियं**-कौन्तिकम्-मधुविशेषः । आव० ८५४ । महुस्स पढमो भेओ । नि० चू० प्र० १६६ आ ।

**कोंति**-पाण्डुराज्ञो राज्ञी । ज्ञाता० २१३ ।

**कोंतेय**- । नि० चू० प्र० ३६ ।

**कोअगडं**-पार्श्वजिनस्य प्रथमपारणकस्थानम् । आव० १४६ ।

**कोआसिअ**-कोआसिते-विकसिते । जं० प्र० ११३ ।

**कोआसिय**-पद्मवद्विकसितम् । औप० १७ ।

**कोइल**-कोकिल-अन्यपुष्टः । उत्त० ६५३ ।

**कोइलच्छद**-कोकिलच्छदः-तैलकण्टकः । उत्त० ६५३ ।

**कोइलच्छदकुसुमं**-कोकिलच्छदकुसुमं-कोकिलच्छदः-तैलकण्टकः, तस्य कुसुमम् । प्रज्ञा० ३६० ।

**कोइला**-लोमपक्षिविशेषः । प्रज्ञा० ४६ । कोकिला-परभृत् । प्रश्न० ३७ ।

**कोइल्लं**-कोल्लेरं-नित्यवासविषये सङ्गमस्थविरदृष्टान्ते नगरम् । आव० ५३६ ।

**कोउअ**-कौतुकं-रक्षा । जं० प्र० १८६ । अलङ्कारविशेषः । आव० १८२ । मषीपुण्ड्रादि । उपा० ४४ ।

**कोउगं**-सौभाग्यादिनिमित्तं परेषां स्नपनादि । औप० १०६ । सौभाग्याद्यर्थं स्नपनम् । प्रज्ञा० ४०६ । अवतारणकादि । सूत्र० ३२५ । रक्षादिकम् । प्रश्न० ३६ । कौतुकं-रक्षादि । आव० १३० । कौतुकं-समवसरणम् । बृ० प्र० १६४ अ । मङ्गलकर्म । उत्त० ७१० ।



Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

**कोउगामिगा**–कौतुकात् मृगा इव मृगा । उत्त० ५०१ ।

**कोउतं**–कौतुकं–उत्सवः । आव० ४३३ ।

**कोउय**–कौतुकं–रक्षाविधानादि । भग० ५४५ । ललाटस्य मुशलस्पर्शनादीनि । उत्त० ४६० । कौतुकानि–मषीपुण्ड्रादीनि । निरय० ७ । कौतुकं–आश्चर्यम् । व्य० प्र० १६३ अ । मषीतिलकादिकम् । भग० १३७ । मषीपुण्ड्रादि । भग० ३१८ । सौभाग्याद्यर्थं स्नपनकम् । भग० ५१ ।

**कोउयकरण**–कौतुककरणं–सौभाग्यादिनिमित्तं परस्नपनकादिकरणम् । ठाणा० २७५ ।

**कोऊहल**–कौतुकं–अपत्याद्यर्थं स्नपनादि । उत्त० ४७६ ।

**कोऊहलपडिया**–कोऊहलप्रतिज्ञया–कौतुकेणेत्यर्थः । नि० चू० प्र० १८४ अ ।

**कोऊहल्ल**–कुतूहलं, नटादिषु कौतुकम् । दश० २६७ । कौतूहलम् । आव० ४१६ ।

**कोऊहल्लिलो**–कुतूहलवान् । ओघ० ९८ ।

**कोकंतिय**–कोकन्तिकः–लोमटकः, यो रात्रौ कौ कौ एवं रौति । प्रश्न० ७ । लोमटिकः, सनखपदश्चतुष्पदविशेषः । जीवा० ३८ । काकन्तिका–लोमटका ये रात्रौ को को इत्येवं रवन्ति । जं० प्र० १२४ । शृगालाकृतिर्लोमटको रात्रौ को को इत्येवं रारटीति । आचा० ३३८ ।

**कोकंतिया**–सनखपदचतुष्पदविशेषः । प्रज्ञा० ४५ । कोकन्तिकाः–लुङ्कडिकाः । जीवा० २८२ । लोमटकाः । ज्ञाता० ७० ।

**कोकणदे**–जलरुहविशेषः । प्रज्ञा० ३३ ।

**कोकासवड्ढई**–कोकाशवर्द्धकी–शिल्पकर्मविषये दृष्टान्तः । आव० ४०६ ।

**कोकासिअ**–कोकासिते–विकसिते । जं० प्र० २३६ ।

**कोकासियं**–कोकासितं–पद्मवद्विकसितम् । जीवा० २७३ । विकसितम् । प्रश्न० ८२ ।

**कोकिला**–लोमपक्षिविशेषः । जीवा० ४१ ।

**कोक्कंतिए**–कोकंतिया–लुङ्कडी । प्रज्ञा० २५४ ।

**कोक्कासो**–कोकाशः–शिल्पैरर्थोपार्जने कोकाशः । दश० १०७ । नामविशेषः । यन्त्रमयकापोतकारकः । व्य० द्वि० १२७ आ ।

**कोक्कुइय**–भाण्डा भाण्डप्राया वा । औप० ६६ । कौकुच्यम् । चेष्टाविशेषः । उत्त० ७०६ ।

**कोच्चितो**–शैक्षकः । व्य० द्वि० १४७ अ ।

**कोच्छरं**– । नि० चू० द्वि० १३४ अ ।

**कोच्छा**–कुत्सा–शिवभूत्यादयः । ठाणा० ३६० ।

**कोच्छुभो**–मणी । नि० चू० तृ० ८१ आ ।

**कोज्जय**–कुब्जकं, कुबो इति नाम्ना वृक्षविशेषः । जं० प्र० १६२ ।

**कोंटलय**–कौटलं ज्योतिषं निमित्तं वा । ओघ० १४६ ।

**कोटा**–ग्रीवा । प्रश्न० ५६ ।

**कोंटिबो**–उडवो । नि० चू० द्वि० ७७ आ ।

**कोटिक**–गणविशेषः । आचा० ८१ । दश० २४२ ।

**कोटिकादिः**–गणविशेषः । प्रश्न० १२६ ।

**कोटिमं**–उपरिबद्धभूमिकं गृहम् । व्य० द्वि० १०७ अ । उत्त० ७०६ ।

**कोट्टंब**–कौट्टम्बानि–गौडदेशोद्भवानि । व्य० द्वि० २०४ अ ।

**कोट्ट**–जं अडविमज्झे भिल्लपुलिंदचाउवन्नजणवयमिस्सं दुग्गं वसति वणिया च जत्थ ववहरंति तं कोट्टं भन्नति । नि० चू० द्वि० २१ अ । प्राकारः । उत्त० ६०५ । ओघ० २१० । अटव्यां चतुर्वर्णजनपदयुतं भिल्लदुर्गम् । बृ० द्वि० १०५ अ । प्राकारः । प्रश्न० १७ ।

**कोट्टकिरियं**–कुट्टनक्रिया–रौद्ररूपा चण्डिका, महिषकुट्टनक्रियावतीमित्यर्थः । भग० १६४ । तत्कुट्टनपरा कोट्टक्रिया । अनु० २६ ।

**कोट्टगं**–जत्थ लोगो अडवीए पउरफलाए गंतुं फलाइं सोसेति तं कोट्टगं भण्णति । नि० चू० द्वि० १२८ अ । कोट्टकं–पुलिंदपल्ली । बृ० प्र० १६५ आ । गंत्रीपोट्टलकादिभिरानीय नगरादौ विक्रीणाति । बृ० प्र० १४७ आ । लोकः प्रचुरफलायामटव्यां गत्वा फलानि यावत्पर्याप्तं गृहीत्वा यत्र गत्वा शोषयति, पश्चाद् गत्रीपोट्टलकादिभिरानीय नगरादौ विक्रीणाति तत् । बृ० द्वि० २६० अ ।

**कोट्टणि**–कोट्टन्यः–याः कोट्टग्रहणाय प्रतिकोट्टभित्तय उत्थाप्यन्ते ताः । जं० प्र० २०६ ।

**कोट्टपाल**–नगरं रक्खति जो सो णगररक्खिओ कोट्टपालो । नि० चू० प्र० १६५ अ ।



Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

**कोट्टबलिकरण**–कोट्टाय–प्राकाराय बलिकरणम् । कोट्टा–क्रीडा तेन बलिकरणं चन्दिकादेः पुरतो बस्तादेरिव उपहारविधानम् । प्रश्न० १४ ।

**कोट्टरं**–छिद्रम् । नि० चू० प्र० १६१ आ ।

**कोट्टवीर**–शिवभूतिशिष्यः । विशे० १०२२ । कोट्टवीरः–शिवभूतेर्लघुशिष्यः । उत्त० १८० ।

**कोट्टा**–कोट्टाः–क्रीडाः । प्रश्न० १७ ।

**कोट्टागा**–काष्ठतक्षकाः, वर्द्धकिनः । आचा० ३२७ ।

**कोट्टितिय**–कुट्टयन्तिका तिलादीनां चूर्णनिकारिका । ज्ञाता० ११७ ।

**कोट्टिबा**–गोभक्तदानस्थानम् । बृ० द्वि० १३३ अ ।

**कोट्टिवे**–जत्थ गोभत्तं दिज्जति । नि० चू० तृ० ४२ अ । उडुप । नि० चू० प्र० ४५ अ ।

**कोट्टिमं**–कुट्टिमम् । आव० ५५० ।

**कोट्टिमअकोट्टिमाइं**–कृत्रिमाकृत्रिमाणि । पउ० ९५–३८ ।

**कोट्टिमकारे**–शिल्पविशेषः । अनु० १४९ ।

**कोट्टिल्लं**–ह्रस्वमुद्गरविशेषः । विपा० ७१ ।

**कोट्टिल्लयं**–मुद्गरकः । विपा० ७२ ।

**कोट्टेइ**–कुट्टयति । आव० ३९६ ।

**कोट्ठ**–कोष्ठः–कुशूलः । जं० प्र० १५४ । कुशूलः । जं० प्र० १६ । गन्धद्रव्यविशेषः । जीवा० १९१ । जं०प्र० ६० । उपरितनगृहं, धान्यकोष्ठो वा । जं० प्र० २१० । गन्धद्रव्यम् । जं० प्र० ३५ । कोष्ठः–कुशूलः । भग० २७४ । बृ० द्वि० १६८ आ । ठाणा० १२४ । सूर्यं० ५ । कोष्ठकः, अपवरकः । जीवा० १६० । गङ्गासमुदायात्मकः । भग० ६७६ । धान्यभाजनानि । ठाणा० १७३ । कोष्ठान् आ–समन्तात् कुर्वते तस्मिन्निति । उत्त० ३५१ । अविनष्टसूत्रार्थधारणम् । नंदी० १७७ । पुलिंदपल्ली । नि० चू० द्वि० १४४ अ । कोष्ठं, बुद्धिभेदः । प्रज्ञा० ४२४ ।

**कोट्ठए**–श्रावस्तीनगर्यां चैत्यः । भग० ५५२, ६५६, ४८४ । आव० ३१२ । राज० १२६ । ज्ञाता० २५१ । निरय० २२ । श्रावस्तीनगर्यां चैत्यः । उपा० ५३ । वाणारसीनगर्यां चैत्यः । उपा० ३१, ३४ । आव० ७१४ ।

**कोट्ठओ**–वट्टमढो सुन्नओ । दश० चू० ८२ । अग्गिमालिंदओ । नि० चू० प्र० १९२ अ ।

**कोट्ठग**–कोष्ठकं–श्रावस्त्यां तिन्दुकोद्याने चैत्यविशेषः । उत्त० १५३ । कोष्ठकाः–अपवरकाः । प्रज्ञा० ८६ । बृ० प्र० ३१४ अ । जं० प्र० ७६ । अध्ययनापवरकः । बृ० द्वि० १०७ अ । कोष्टकः–चट्टानां शाला । व्य० द्वि० ४२० अ । आवासविशेषः । ओघ० ८२ ।

**कोट्ठतो**–कोष्ठकः । बृ० द्वि० ६२ अ ।

**कोट्ठपुड**–कोष्ठपुटः–गन्धद्रव्यपुटः । जीवा० १९१ । कोष्ठपुटे ये पच्यन्ते ते कोष्ठपुटाः–वासविशेषाः । ज्ञाता० २३२ । गन्धद्रव्यविशेषः । प्रज्ञा० ३०७ । कोष्ठं–गन्धद्रव्यं तस्य पुटाः । जं० प्र० ३५ । पुटैः परिमितानि यानि कोष्ठादिगन्धद्रव्याणि तान्यपि परिमेये परिमाणोपचारात् कोष्ठपुटानि । जीवा० १९२ ।

**कोट्ठबुद्धिणो**–कोष्ठबुद्धयः–यथा कोष्टके धान्यं प्रक्षिप्तं तदवस्थमेव चिरमप्यवतिष्टते न किमपि कालान्तरेऽपि गलति, एवं येषु सूत्रार्थौ निक्षिप्तौ तदवस्थावेव चिरमप्यवतिष्टतः ते कोष्ठबुद्धयः । बृ० प्र० १९३ आ ।

**कोट्ठबुद्धी**–कोष्ठक इव धान्यं या बुद्धिराचार्यमुखाद्विनिर्गतौ तदवस्थानौ च सूत्रार्थौ धारयति न किमपि तयोः कालान्तरे गलति सा कोष्ठबुद्धिः । प्रज्ञा० ४२४ । कोष्ठवत्–कुशूल इव सूत्रार्थधान्यस्य यथाप्राप्तस्याविनष्टस्याऽऽजन्मधरणाद् बुद्धिः–मतिर्येषां ते । औप० २८ ।

**कोट्ठसमुग्गयं**–कोष्ठसमुद्गकम् । जीवा० २३४ ।

**कोट्ठागार**–दब्भादितणट्ठाणं । नि० चू० प्र० २६५ अ । जत्थ सणसत्तरसाणि धण्णाणि कोट्ठागारो । नि० चू० प्र० २७२ आ । कोष्ठा–धान्यभाजनानि तेषामागारं–गृहं कोष्ठागारं धान्यगृहम् । ठाणा० १७३ । कोष्ठा–धान्यपल्यास्तेषामगारं–तदाधारभूतं गृहम् । उत्त० ३५१ ।

**कोट्ठारं**–कोष्ठागारम् । आव० ४३५ ।

**कोट्ठिया**–पुरिसप्पमाणा हीणाधिया वा चिक्खल्लमती । नि० चू० तृ० ५९ अ । कोष्ठिका–लोहादिधातुधमनार्थं मृत्तिकामयी कुशूलिका । उपा० २१ ।

**कुट्ठियाओ**–कोष्ठिकातः–मृन्मयकुशूलसंस्थानायाः । आचा० ३४४ ।

**कोडंड**–कुदंड–कारणिकानां प्रज्ञापराधान्महत्यपराधिनोऽप-



Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

रावे अल्पं राजग्राह्यं द्रव्यम् । भग० ५४४ ।

**कोडंब**–कोलम्बप्रान्तः, लोकेऽवनतं वृक्षशाखाग्रमुच्यते । ज्ञाता० २३६ ।

**कोडंबिय**– । नि० चू० प्र० ११८ अ ।

**कोड**–कुटिलः, क्रुद्धः । आव० ५३६ ।

**कोडल्लय**–णयवेसिय । नि० चू० द्वि० ९२ आ ।

**कोडालसगुत्तो**–कोडालसगोत्रः–ऋषभदत्तब्राह्मणस्य गोत्रः। आव० १७८ ।

**कोडालसगोत्त**–गोत्रविशेषः । आचा० ४२१ ।

**कोडि**–कोटिः–अस्रिः, विभागः । पिण्ड० ८३ । कोटयो–विभागाः सूक्ष्मपल्योपमापेक्षयाऽसंख्येयखण्डानि बादरपल्योपमापेक्षया तु कोटयः–सङ्ख्याविशेषाः । ठाणा० ९१ । विभागः । ठाणा० ४५२ ।

**कोडिगारा**–शिल्पार्यभेदः । प्रज्ञा० ५६ ।

**कोडिण्ण**–कौडिन्यः–शिवभूतेर्ज्येष्ठशिष्यः । उत्त० १८० । नगरविशेषः । ज्ञाता० ३०९ । कोडिन्यः–महागिर्याचार्यशिष्यः । आव० ३१६ । कौण्डिन्यः–बोटिकशिवभूतेरादिशिष्यः । आव० ३२४ ।

**कोडितगणे**–महावीरस्य नवमो गणः । ठाणा० ४५१ ।

**कोडिन्न**–कौण्डिन्यः–महागिरिसूरीणां शिष्यः । विशे० ९९० । शिवभूतेः प्रथमशिष्यः । विशे० १०२२ । उत्त० ३२१ । कोण्डिन्यः–मिथिलायां श्रीमहागिर्याचार्यशिष्यः । उत्त० १६३ ।

**कोडिन्ना**– । ठाणा० ३९० ।

**कोडिपडागा**–कोटिपताका । आव० ३४२ ।

**कोडियं**–गाढचम्पितम् । बृ० द्वि० २४३ आ ।

**कोडियसहियं**–कोटीभ्यां सहितं कोटीसहितम् । मिलितोभयप्रत्याख्यानकोटि, चतुर्थादिकरणमेव । आव० ८४० ।

**कोडिसहियं**–मीलितप्रत्याख्यानद्वयकोटि चतुर्थादि कृत्वाऽनन्तरमेव चतुर्थादेः करणम् । भग० २९६ ।

**कोडिसिला**–कोटीशिला । आव० १७६ ।

**कोडी**–कोट्यौ–अग्रे प्रत्याख्यानाद्यन्तकोणरूपे । उत्त० ७०६ । कोटि–पञ्चोत्तरं लक्षम् १०५००० । जीवा० ३२५ ।

**कोडीए**–कोट्या–अग्रभागेन । जं० प्र० ६८ ।

**कोडीकरण**–कोट्यैव कोटीकरणम् । दश० १६२ ।

**कोडीणं**–कोट्यः–अनेका कोटाकोटिप्रमुखाः सङ्ख्याः । जं० प्र० ९५ ।

**कोडीणा**– । ठाणा० ३९० ।

**कोडीमातसा**– । ठाणा० ३९३ ।

**कोडीवरिसं**–कोटिवर्षं, लाटजनपदे आर्यक्षेत्रम् । प्रज्ञा० ५५ । कोटीवर्ष–मूलगुणप्रत्याख्यानोदाहरणे म्लेच्छनगरम् । आव० ७१५ ।

**कोडीसहियं**–कोटीभ्यां–एकस्य चतुर्थादिरन्तविभागोऽपरस्य चतुर्थादेरेवारम्भविभाग इत्येवंलक्षणाभ्यां सहितं–मिलितं युक्तं कोटीसहितं मिलितोभयप्रत्याख्यानकोटेश्चतुर्थादिः करणमित्यर्थः । ठाणा० ४९८ । कोटीसहितं–कोट्यौ–अग्रे प्रत्याख्यानाद्यन्तकोणरूपे सहिते मिलिते यस्मिंस्तत् ।

**कोडुंबं**–कौटुम्बं–स्वराष्ट्रविषयम् । जीवा० १६६ ।

**कोडुंबिअ**–कौटुम्बिकाः–अधिकारिणः । जं० प्र० १८८ । कतिपयकुटुम्बप्रभवोऽवगलकाः । जं० प्र० १९० । कौटुम्बिकः–श्रेष्ठ्यादिः । ओघ० १२० । कौटुम्बिका महर्द्धिकाः । बृ० ६५ अ। कौटुम्बिकः–कतिपयकुटुम्बप्रभुः। जीवा० २८० ।

**कोडुंबित**–कौटुम्बिकः–कतिपयकुटुम्बप्रभुः । ठाणा ४६३ ।

**कोडुंबिय**–कौटुम्बिकः–कतिपयकुटुम्बप्रभवोऽवलगकाः । भग० ३१८ । औप० १४ । कौटुम्बिकाः–कतिपयकुटुम्बप्रभवो राजसेवकाः । भग० ११५ । कौटुम्बिकाः–ग्राममहत्तराः । प्रश्न० ९६ । भग० ४७४ । कौटुम्बिकाः–कतिपयकुटुम्बनायकाः । भग० ४६३ । नि० चू० प्र० ७८ आ ।

**कोडुं**–स्फुटम् । आव० ४२० । कौतुकं–मनोरथः आव० ४३२ ।

**कोढ**–कुष्ठं–पाण्डुरोगः, गलत्कोष्ठं वा । बृ० प्र० १७० अ । रोगविशेषः । ज्ञाता० १८१ ।

**कोढिउ**–कुष्ठी । आव० ६७४ ।

**कोढी**–कुष्ठमष्टादशभेदं तदस्यास्तीति कुष्ठी । आचा० २३३ ।

**कोणं**–कर्णम् । बृ० प्र० १०७ आ ।

**कोणंगुली**–कोणेऽङ्गुलिः । आव० ६७९ ।



Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

**कोण**-कोणः-वादनदण्डः । जीवा० १९३ । जं० प्र० ३८ । कोणः । आव० ८४२ ।

**कोणओ**-लगुडो । नि० चू० प्र० १०५ आ ।

**कोणा**-अश्रयः । जीवा० १२३ ।

**कोणालग**-कोणालकः-पक्षिविशेषः । प्रश्न० ८ ।

**कोणिए**-कूणिकः-चम्पानगर्यां राजा । भग० ३१६ । कोणिकः-चम्पानगर्यधिपतिः । अन्त २५ । चम्पानगर्यां राजा । प्रश्न० १ ।

**कोणिओ**-कोणिकः, राजविशेषः । विपा० ९० । श्रेणिकपुत्रः । दश० ५० । शिक्षायोगदृष्टान्ते श्रेणिकचेल्लणयोः पुत्रः । यः पूर्वभवे कुण्डीश्रमण आसीत् । आव० ६७८ ।

**कोणिक**-श्रेणिकपुत्रः । व्य० द्वि० ४२६ अ । चम्पायां राजा । ज्ञाता० ३ ।

**कोण्हुआ**-जम्बूकः । आव० ३५१ ।

**कोतव**-उदररोगनिष्पन्नं कौतवम् । अनु० ३५ । कोतवो-वरको । नि० चू० प्र० २५५ अ ।

**कोतालि**-गोट्ठी । नि० चू० तृ० १७ आ ।

**कोताली**-गोष्ठी । बृ० द्वि० ३१ आ ।

**कोतुविआ**-कुतुपेन बहिर्ग्रामे व्यवहारकृत् । बृ० द्वि० १९० आ ।

**कोत्तिया**-भूमिशायिनः । भग० ५१९ । निरय० २५ । औप० ९० ।

**कोत्थ**-जनपदविशेषः । भग० ६८० । उदरदेशः । ज्ञाता० ६८ ।

**कोत्थल**-वस्त्रकम्बलादिमयः । उत्त० ४५७ ।

**कोत्थलकः**-बस्तिः, अपाटितेनापनीतमस्तकेन निर्कषितचर्मान्तर्वर्त्तिसर्वास्थ्यादिकचवरेणापरचर्ममयस्थिगलकस्थगितापानछिद्रेण सङ्कीर्णमुखीकृतग्रीवान्तर्विवरेणाजापश्वोरन्यतरस्य शरीरेण निष्पन्नश्चर्ममयः प्रसेवकः कोत्थलापरपर्यायो इतिः । पिण्ड० १८ ।

**कोत्थलकारिया**-कोत्थलकारिका, भ्रमरीविशेषः । गृहकारिका । ओघ० ११७ ।

**कोत्थलकारी**-भ्रमरी । बृ० प्र० २७८ अ ।

**कोत्थलगारिअ**-कोत्थलकारिका-गृहकारिका । ओघ० ११८ ।

**कोत्थलगारिया**-कोत्थलकारिका-भ्रमरीविशेषः । आव० ६२५ ।

**कोत्थलवाहगो**-त्रीन्द्रियजन्तुविशेषः । जीवा० ३२ ।

**कोत्थुंभरि**-कुस्तुम्भर्य्यो-धान्यककणाः । जं० प्र० २४३ ।

**कोत्थूभो**-कौस्तुभो-वक्षोमणिः । प्रश्न० ७७ ।

**कोदंड**-धनुः । भग० २९० । उत्त० ३११ । कुदण्डस्तु कारणिकानां प्रज्ञाद्यपराधात् महत्यप्यपराधिनोऽपराधे अल्पं राजग्राह्यं द्रव्यम् । जं० प्र० १९४ । चापः । जं० प्र० २०६ ।

**कोदूसग**-कोद्रवविशेषः । भग० २७४ ।

**कोदूसा**-धान्यविशेषः । भग० ८०२ ।

**कोद्दूसा**-औषधिविशेषः । प्रज्ञा ३३ ।

**कोद्दव**-कोद्रवः-धान्यविशे । भग० ८०२ । दश० १९३ । सूत्र० ३०९ । धान्यविशेषः । तृणविशेषः । ठाणा० २३४ । औषधिविशेषः । प्रज्ञा० ३३ । कोद्रवः, धान्यविशेषः । तृणपञ्चके तृतीयोभेदः । आव० ६५२ ।

**कोद्दवकूरं**-कोद्रवतन्दुलम् । आव० २०० ।

**कोद्दवजाउलयं**-कोद्दवोभज्झी । ओघ० १९६ ।

**कोद्दवोदणसेइया**-कोद्रवौदनसेतिका । आव० ६९२ ।

**कोद्दवुभज्जी**-कोद्दवोभज्झी-कोद्दवजाउलयं । ओघ० १९६ ।

**कोद्दालकः**-एकोरूकद्वीपे वृक्षविशेषः । जीवा० १४५ ।

**कोद्दालिय**-कुद्दालिकः, भूखनित्रविशेषः । विपा० ५८ ।

**कोधे**-क्रोधे निश्रितमिति सम्बन्धात् क्रोधाश्रितं-कोपाश्रितं मृषेत्यर्थः । ठाणा० ४८९ ।

**कोप्पर**-कूर्परः । ओघ० ३१ । कूर्परम् । प्रज्ञा० ४७३ । स्कन्धावारः । आव० ६६७ ।

**कोप्परथणो**- । नि० चू० द्वि० ९४ अ ।

**कोमल**-श्रोत्रमनसां प्रह्लादकारि । व्य० प्र० २० अ । मनोज्ञम् । जीवा० १८८, २९५ । कोमलः-दृष्टिसुभगः । जीवा० ४७४ ।

**कोमारा**-मट्टिया, उल्लामट्टिया । नि० चू० प्र० २५५ आ ।

**कोमुइजोगजुत्तो**-कौमुदीयोगयुक्तः- कार्तिकपौर्णमास्यामुदितः । दश० २४६ ।

**कोमुइया**-कृष्णस्य प्रथमा भेरी । बृ० प्र० ५६ अ ।



Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

**कोमुइवारं**–कौमुदीवासरम् । आव० ८१६ ।
**कोमुई**–कौमुदी । ओघ० ९७ । कौमुदी–कार्त्तिकी पौर्णिमा । जं० प्र० ११५ ।
**कोमुतिआ**–कौमुदीकी–वासुदेवस्य देवतापरिगृहीता गोशीर्षचन्दनमयी तृतीया भेरी । आव० ९७ ।
**कोमुदि**–कौमुदी–कार्त्तिकी । प्रश्न० ८४ ।
**कोमुदिका**–वासुदेवस्य गोशीर्षश्रीखण्डमयी देवतापरिगृहीता तृतीया भेरी । विशे० ६१९ ।
**कोमुदितं**–उत्सववाद्यम् । ज्ञाता० १०० ।
**कोमुदियवारो**–कौमुदीमहः । आव० ५९२ ।
**कोमुदी**–कौमुदी । आव० ३५५ ।
**कोमुदीनिसा**–कौमुदीनिशा, कार्त्तिकपौर्णमासी । ज्ञाता० ३५ ।
**कोयव**–रूतपूरितः पटः, या लोके 'माणिकी' इति प्रसिद्धा । बृ० द्वि० २२० अ । कुतुपः । ठाणा० २३४ ।
**कोयवगो**–वरक्को । नि० चू० द्वि० ६१ अ । रूतपूरितपटः । ज्ञाता० २३२ ।
**कोयवाणि**–वस्त्रविशेषः । आचा० ३९३ ।
**कोयवि**–कौतपी–दुष्प्रतिलेखितदूष्यपञ्चके द्वितीयो भेदः । आव० ६५२ ।
**कोरंग**–कोरङ्कः–पक्षिविशेषः । प्रश्न० ८ ।
**कोरंट**–कोरण्टकः–पुष्पजातिविशेषः । जं० प्र० ३४ ।
**कोरंटक**–अग्रबीजः । दश० १९३ । गुल्मविशेषः । आचा० ३० । स्थलजम् । प्रज्ञा० ३७ । कोरण्टकः, पुष्पजातिविशेषः । जीवा० १९१ ।
**कोरंटगं**–कोरंटकं–भरुकच्छे उद्यानम् । व्य० प्र० १७३ आ ।
**कोरंटय**–गुल्मविशेषः । प्रज्ञा० ३२ ।
**कोरंटयगुम्मा**–कोरण्टकगुल्माः । जं० प्र० ९८ ।
**कोरंटयधाऊ**–पीतवर्णः । ( दे० ) ।
**कोरव**–कोरकं–मुकुलम् । ठाणा० १८५ । जं०प्र० ५२८ ।
**कोरव्व**–कौरव्यः–कौरव्यगोत्रः । जीवा० १२१ । कुलविशेषः । आव० १७९ । कुरवः–कुरूवंशप्रसूताः । औप० २७ । कुरवः–आर्यभेदः । ठाणा० ३५८ । कुरवः । भग० ४८९ । कुलार्यभेदविशेषः । प्रज्ञा० ५६ ।

**कोरव्वीया**– । ठाणा० ३९३ ।
**कोरिंट**–कोरिण्टं–कुसुमविशेषः । भग० ३१८ । कोरण्टकः–पुष्पजातिः । ज्ञाता० २३ ।
**कोरिंटक**–अग्रबीजाः । ठाणा० १८६ ।
**कोरिंटमल्लदामं**–कोरण्टकमाल्यदामं । प्रज्ञा० ३६१ ।
**कोलंबए**–कोलम्बः–शाखिशाखानामवनतमग्रं भाजनं वा । अनुत्त० ५ ।
**कोलंबो**–कोलम्बः–प्रान्तः । विपा० ५५ ।
**कोल**–कोलः–घुणः । आव० ६५६ । दश० १५५ । शूकरः । ज्ञाता० ७० । बृ० प्र० १४८ अ । बदरं । दश० चू० ८० । पिण्ड० १६१ । दश० १७६, १८५ । दरचूर्णम् । बृ० प्र० २९८ अ । उन्दराकृतिर्जन्तुविशेषः । प्रश्न० ७ । क्रोडः–शूकरः । प्रश्न० ७ । कुवलं–बदरम् । भग० २८५ ।
**कोलघरियाओ**–कुलगृहात्–पितृगृहादागताः कौलगृहिकाः । उपा० ४८ ।
**कोलगिणी**–कोलिकी । आव० ४२१ ।
**कोलचुण्णं**–बदरचुण्णं । दश० चू० ८० । बदरसक्तून् । दश० १७६ ।
**कोलजुत्ती**–कुलौचित्यः । व्य० प्र० २२४ अ ।
**कोलट्ठिय**–कुवलास्थिकम्–बदरकुलकः । भग० २८५ ।
**कोलपाणगं**–पाणकविशेषः । आचा० ३४७ ।
**कोलपाले**–धरणेन्द्रस्य द्वितीयलोकपालः । ठाणा० १९७ ।
**कोलवं**–कौलवं–तृतीयं करणम् । जं० प्र० ४९३ ।
**कोलवालं**–दवरकम् । आव० ४२७ ।
**कोलवासंसि**–कोला–घुणाः तेषामावासः । सम० ३९ ।
**कोलसुणए**–कोलशुनकः–मृगयाकुशलः श्वा । प्रज्ञा०२५४ । सूकरस्वरूपधारी । उत्त० ४६० ।
**कोलसुणक**–कोलश्वानः–महासूकरः । प्रश्न० ७ ।
**कोलसुणग**–सनखपदचतुष्पदविशेषः । प्रज्ञा० ४५ । कोलशुनकाः–महाशूकराः । जं० प्र० १२४ । पाटयित्वा भक्षणम् । नि० चू० द्वि० १२९ अ ।
**कोलसुणयं**–महासुकरं । आचा० ३३८ ।
**कोला**–घुणा । नि० चू० द्वि० ८३ अ । नि० चू० प्र० २५५ आ । घुणाः–तदावासभूते जीवप्रतिष्ठितः । आचा०



Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

३३७ ।

**कोलाओ**-कोलः । तं० ।

**कोलाल**-मृद्भाजनविशेषः । आव० ४८४ । कुलालाः-कुम्भकाराः । उपा० ४२ ।

**कोलालिए**-कौलालानि-मृद्भाण्डानि पण्यमस्येति कौलालिकः । अनु० १४९ ।

**कोलालिया**-कर्मार्यभेदविशेषः । प्रज्ञा० ५६ । कोलालिकाः-कुलालक्रयविक्रयिणः । बृ० द्वि० १७५ अ ।

**कोलावास**-कोला-घुणकीटकास्तेषामावासः । आचा० २९३ । घुणावासः । आचा० ४१० । कोला-घुणास्तदावासभूतः कोलावासः । आचा० ३३७ ।

**कोलाहल**-विलपिताऽऽक्रन्दितादिकलकलः । उत्त० ३०७ । बहुजनमहाध्वनिः । ज्ञाता० २२० । जीवा० १७३ । बोलः । प्रज्ञा० ९७ । आर्त्तशकुनिसमूहध्वनिः । भग० ३०६ । आर्त्तशकुनसमूहध्वनिः । जं० प्र० १६७ ।

**कोलाहलभूत**-कोलाहलः- विलपिताऽऽक्रन्दितादिकलकलः कोलाहल एव कोलाहलकः स भूत इति जातो यस्मिंस्तत् कोलाहलकभूतम् । उत्त० ३०७ ।

**कोलाहलभूए**-कोलाहलः-आर्त्तशकुनिसमूहध्वनिस्तं भूतः प्राप्तः कोलाहलभूतः । भग० ३०६ ।

**कोलाहा**-दर्वीकरअहिभेदविशेषः । जीवा० ३९ । प्रज्ञा० ४६ ।

**कोलिअतंतुयं**-कोलिकतन्तुकम् । ओघ० ११७ ।

**कोलिओ**-कृतिकर्मदृष्टान्ते द्वारिकायां वासुदेवभक्तो वीरकाभिधः कोलिकः । आव० ५१३ ।

**कोलिकपुटक**-वाद्यविशेषः । भग० २१६ ।

**कोलिग**-कोलिकः-जीवविशेषः । बृ० द्वि० १६४ अ ।

**कोलिगजालग**-कोलिकजालकानि-जालकाकाराः कोलिकानां लालातन्तुसन्तानाः । बृ० प्र० २७८ अ ।

**कोलिय**-कौलिकः-तन्तुवायः । नन्दी० १६५ ।

**कोलियकः**-लूता । ओघ० १२६ ।

**कोलियकण्णा**-कोलिककन्या विषभोजननिवृत्तौ दृष्टान्तः । आव० ५५६ ।

**कोलियगो**-कोलिकः । उत्त० १०० ।

**कोलियापुडिगो**-मक्कडसंताणओ । नि० चू० प्र० २५५ आ ।

**कोलुणं**-कारुण्यम् । नि० चू० द्वि० ५८ आ ।

**कोलेज्जाओ**-अधोवृत्तखाताकाराद् असंयतः । आचा० ३४४ ।

**कोल्लइर**-संगमस्थविरविहारभूमिः । नि० चू० द्वि० ६५ आ । कोल्लकिरं-क्रीडनधात्रीदोषविवरणे नगरम् । पिण्ड० १२५ ।

**कोल्लगाणुगो**-जो रयहरणणिसेज्जाए उवग्गाहियपादपुंछणे वा ठितो वा एति चिट्ठति वा । नि० चू० तृ० १३७ अ ।

**कोल्लयग्गामे**-वर्द्धमानजिनस्य प्रथमं पारणकस्थानम् । आव० १४६ ।

**कोल्लयर**-कुल्लयरं-नगरविशेषः । उत्त० १०८ ।

**कोल्लर**-हस्तिन उपरि कोल्लररूपा 'गेल्लि' या मानुषं गीलतीव । भग० १८७, ३९९ ।

**कोल्लाए**-सन्निवेशः । उपा० २, १४ । सन्निवेशः । महावीरस्वामिविहारभूमिः । भग० ६६२ ।

**कोल्लाकसन्निवेशं**-वर्द्धमानजिनस्य विहारभूमिः । आव० २०० ।

**कोल्लाग**-कोल्लाकः-सन्निवेशः । महावीरस्वामिविहारभूमिः । आव० १८८ ।

**कोल्लागसन्निवेस**-कोल्लागसन्निवेशः-व्यक्तसुधर्मगणधरयोर्जन्मभूमिः । आव० २५५ ।

**कोल्लुकपरंपर**-महाराष्ट्रप्रसिद्धकोल्लुकचक्रपरंपरन्यायः । बृ० प्र० ९० आ ।

**कोल्लुगा**-सिगाला । नि० चू० प्र० १७५ अ ।

**कोल्हुकं**-इक्षुयन्त्रम् । बृ० द्वि० १९९ आ ।

**कोल्हुगाणूगे**-क्रोष्टुकानुगः । आचार्याणां तृतीया उपमा । भिक्षोः तृतीया उपमा । व्य० प्र० १२१ आ ।

**कोव**-कोपः-क्रोधोदयात्स्वभावाच्चलनमात्रम् । भग० ५७२।

**कोवघर**-कोपगृहम् । विपा० ८३ ।

**कोवडिओ**-केतराती । दीणारो । नि० चू० प्र० ३३० अ ।

**कोवपिंड**-कोपपिण्डः-कोहप्रसादात् पिंडं लभते स कोपपिण्डः । नि० चू० द्वि० १०० अ ।

**कोविए**-कोविदः-पण्डितः । उत्त० ४८२ । लब्धशास्त्रपरमार्थः । उत्त० ४१९ ।



Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

**कोविओ**–कोविदः–संसारविमुखप्रज्ञतया पण्डितः । पिण्ड० ७२ ।
**कोवियप्पा**–कोविदात्मा-कोविदः-लब्धशास्त्रपरमार्थ आत्माऽस्येति । उत्त० ४२० ।
**कोविया**–खोडिया–नाशिता । नि० चू० द्वि० १०८ आ ।
**कोवेइ**–कोपयति । विशे० ६५६ ।
**कोशः**–घटस्यादौ आकारः । विशे० ६३८ ।
**कोशकं**– । आचा० ३५७ ।
**कोशकारकीटः**– । दश० २७३ ।
**कोशलजनपदः**–कोशलजनपदोऽप्यभिधीयते यत्र अयोध्या नगरीति । ज्ञाता० १२५ । पिण्ड० ६८ ।
**कोशला**–देशविशेषः । पिण्ड० ६८ ।
**कोशातकी**–तिक्तरसपरिणता । प्रज्ञा० १० । वल्लीविशेषः । आचा० ३० ।
**कोशिकारः**–कीटविशेषः । आचा० ७१ ।
**कोष्ठक**–श्रावस्तीनगर्यां तैन्दुकोद्याने चैत्यः । विशे० ६३५ ।
**कोष्ठ**–लक्षणहीनम् । अनु० १०२ । वाससमुदायः । भग० ७१३ । धान्यपल्यः । उत्त० ३५१ ।
**कोष्ठबुद्धिता**–ऋद्धिविशेषः । ठाणा० ३३२ ।
**कोसं**–कोषं–भाण्डागारं चर्मलताद्यनेकवस्तुरूपम् । उत्त० ३१६ ।
**कोस**–सरावं । दश० चू० ६६ । जहिं रयणादियं दव्वं सो । कोशः । नि० चू० प्र० ३४ आ । कोशः–आश्रयः । प्रश्न० ६४ । समुदायो । नि० चू० द्वि० ६२ आ । क्रोशः–गव्यूतम् । उत्त० ६८६ । कोशः–वारकादिभाजनम् । सूत्र० ११८ ।
**कोसंब**–एकास्थिकवृक्षविशेषः । भग० ७०५, ८०३ । प्रज्ञा० ३१ ।
**कोसंबगंडियं**–
**कोसंबवण**–कौशाम्बवनं–कृष्णस्य कालकरणस्थानम् । अन्त० १६ ।
**कोसंबाहारं**–आर्यसुहस्तिविहारभूमिः । द्रमकदीक्षास्थानम् । नि० चू० प्र० २४३ अ ।
**कोसंबि**–कौशाम्बी–यमुनातीरे नगरीविशेषः । विशे० ४६५ । वर्धमानस्वामिविहारभूमिः । भग० ५५६ । आव० २२१ । शतानीकराजधानी । भग० ५५६ । विपा० ६८ । आव० २२२ ।
**कोसंबिय**–कोशाम्बी. अज्ञातोदाहरणेऽजितसेनराजधानी । आव० ६६६ ।
**कोसंबी**–कौशाम्बी–नगरीविशेषः । उत्त० २१४, १६३, ३७६ । यज्ञदत्तद्विजस्थानम् । उत्त० १११ । वत्सदेशराजधानी । बृ० द्वि० १६७ आ । द्रमकप्रव्रज्यास्थानम् । बृ० द्वि० १५३ आ । वर्द्धमानस्वामिपारणकस्थानम् । आव० २२५ । दुर्गन्धायाः उत्पत्तिस्थानम् । उत्त० १२३ । नगरीविशेषः । ज्ञाता० २५३ । वत्थजणवए णगरी । नि० चू० तृ० १६ अ । भग० ५५६ । नगरीविशेषः । उत्त० ४४ । दश० ४६ । तापसश्रेष्ठिस्थानम् । उत्त० ६६ । वत्सजनपदे आर्यक्षेत्रम् । प्रज्ञा० ५५ । जितशत्रुराजधानी । उत्त० २८६, २८७ । धनपालराजधानी । विपा० ६५ । पद्मप्रभजन्मभूमिः । आव० १६० । शिक्षायोगदृष्टान्ते हारोत्पत्तिविषये नगरी । आव० ६७६ । भावप्रतिक्रमणदृष्टान्ते नगरी । आव० ४८५ । अज्ञातोदाहरणेऽजितसेनराजधानी । आव० ७०० । संपइस्स उप्पत्तिट्ठाणं । नि० चू० तृ० ४४ आ ।
**कोसंबीओ**–कौशाम्बीकः । आव० ६३ ।
**कोसकोट्ठागारकहा**–कोशो-भाण्डागारं, कोष्ठागारं–धान्यागारं, तत्कथा कोशकोष्ठागारकथा । ठाणा० २१० ।
**कोसकोट्ठारे**–कोशकोष्ठागारं, राज्ञः कोशकोष्ठागारसम्बन्धीविचारः । राजकथायाश्चतुर्थभेदः । आव० ५८१ ।
**कोसग**–कोशकः–चर्मपञ्चके चतुर्थो भेदः । ठाणा० २३४ । कोशः–चर्मपञ्चके चतुर्थो भेदः । आव० ६५२ । नखभंगरक्षकश्चर्मकोशः । बृ० द्वि० १०१ अ । अंगुलीनामंगुष्ठस्य वा छादकः स कोशकः । बृ० द्वि० २२२ आ ।
**कोसयं**–कोशः । आव० ६२५ ।
**कोसल**–देशविशेषः । उत्त० ३७५ । भग० ६८० । कोशलकः–कोशलदेशोत्पन्नः । व्य० द्वि० २१६ आ ।
**कसलग**–कोशलकः–कोशलदेशीयः । पिण्ड० १६७ ।
**कोसलपुरं**–सुमतिनाथजन्मभूमिः । आव० १६० ।
**कोसला**–कोशला–अयोध्या, तज्जनपदोऽपि कोशला ।



Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

भग० ३१७ । अयोध्या । जं० प्र० १३६ । कोशला-जनपदविशेषः । ज्ञाता० १३० । प्रज्ञा० ५५ । कोशला-अचलगणधरजन्मभूमिः । आव० २५५ ।

**कोसलाउरे**-कोशलपुरे-मायोदाहरणे नगरं, यत्र पूर्वभवे धनपतिधनापहभार्ये नन्दनेभ्यस्य श्रीमतिकान्तिमतिदुहितरौ जाते । आव० ३६४ ।

**कोसलिए**-कोशलदेशोत्पन्नत्वात् कौशलिकः । ठाणा० ३२७ । कोशलायां-अयोध्यायां भवः कौशलिकः । जं०प्र० १३६ । कोशलदेशे भवः कौशलिकः । सम० ६० ।

**कोसलियं**-कौशलिकं-देशविशेषः । उत्त० ३५४ ।

**कोसा**-कोशा, पाटलिपुत्रे गणिका । आव० ४२५ । वेश्या, यस्या गृहे स्थूलभद्रो द्वादशवर्षं यावत् स्थितः । आव० ६६५ ।

**कोसातकी**-तिक्तरसे दृष्टान्तः । उत्त० ६७६ ।

**कोसि**-कोशी-प्रतिमा । ज्ञाता० ५७ ।

**कोसिओ**-कौशिकनामा अश्ववणिक् । आव० २२० । कौशिकनामा ब्राह्मणविशेषः । आव० १७१ । कौशिकः-तापसपुत्रः । आव० १७६ ।

**कोसिकारकीड**-कोशिकारकीटः-आत्मवेष्टकः कीटविशेषः। प्रश्न० ६१ ।

**कोसिता**-कौशिकाः-षडुलकादयः । ठाणा० ३९० ।

**कोसियं**-कौशिकं-हस्तगोत्रम् । जं० प्र० ५०० ।

**कोसियगोत्ते**-कौशिकगोत्रम् । सूर्य० १५० ।

**कोसियज्जो**-कौशिकार्यः-आर्जवोदाहरणे चम्पायामुपाध्यायः । आव० ७०४ ।

**कोसी**-नदीविशेषः । ठाणा० ४७७ । कोशः-परिवारः । सूत्र० २७६ । कोशी-प्रतिमा । उपा० २४ ।

**कोसेज्ज**-कौशेयकं-कौशेयककारोद्भवं वस्त्रम् । प्रश्न० ७१ । वस्त्रम् । औप० १० । कौशेयं-त्रसरितन्तुनिष्पन्नम् । जं० प्र० १०७ । वेडयकारिणो । नि० चू० ४३ आ । वस्त्रविशेषः । जं० प्र० २०२ ।

**कोसेयं**-कौसेयं-त्रसरितन्तुनिष्पन्नं वस्त्रम् । जीवा० २६६ ।

**कोहंडा**-कूष्माण्डाः-पुंस्फलाः । अनु० १६२ ।

**कोह**-कारणेऽकारणे वाऽतिक्रूराध्यवसायः क्रोधः । आचा० १६१ । तत्रात्मीयोपघातकारिणी क्रोधकर्म्मविपाकोदयात् क्रोधः । आचा० १७० । क्रोधनं-क्रुध्यति वा येन सः क्रोधः-क्रोधमोहनीयसम्पाद्यो जीवस्य परिणतिविशेषः क्रोधमोहनीयकर्मैव । ठाणा० १९३ । अप्रीतिलक्षणः । उत्त० २६१ । क्रोधः-अप्रीतिपरिणामः । जीवा० १५ । क्रोधः-नोकर्मद्रव्यक्रोधः-चर्मकारचर्मकोथो नीलकोथादिश्च । विशे० ११७० । क्रोधः । आव० ८४८ । क्रोधः-सप्तम उत्पादनदोषः । पिण्ड० १२१ । षष्ठं पापस्थानकम् । ज्ञाता० ७५ । कोथः-कुथितत्वं शटितं वा । भग० १९८ ।

**कोहणिस्सिया**-क्रोधनिःसृता-क्रोधान्निःसृता, क्रोधाद्विनिर्गतेति । प्रज्ञा० २५६ ।

**कोहण**-क्रोधनः-सकृत् क्रुद्धोऽत्यन्तक्रुद्धो भवति । नवममसमाधिस्थानम् । सम० ३७ । क्रोधनः-यः सकृत्क्रुद्धोऽत्यन्तक्रुद्धो वा भवेत् । नवममसमाधिस्थानम् । आव० ६५३ ।

**कोहनिस्सिया**-क्रोधनिसृता-मृषाभाषाभेदः । दश० २०९ ।

**कोहविवेग**-क्रोधविवेकः-कोपत्यागः, तस्य दुरन्ततादिपरिभावनेनोदयनिरोधः । भग० ७२७ ।

**कोहसन्ना**-क्रोधोदयादावेशगर्भा प्ररूक्षनयनदन्तच्छदस्फुरणादिचेष्टैव संज्ञायतेऽनयेति क्रोधसंज्ञा । भग० ३१४ । क्रोधवेदनीयोदयात्तदावेशगर्भा पुरुषमुखवदनदन्तच्छदस्फुरणचेष्टा क्रोधसंज्ञा । प्रज्ञा० २२२ ।

**कोहा**-क्रोधा-क्रोधानुगता । आव० ५४८ ।

**कोहाड**-प्रहरणविशेषः । नि० चू० द्वि० ३१ आ ।

**कोहंडियाकुसुमेइ**-कुष्माण्डिकाकुसुमं-पुंस्फलीपुष्पं । जं० प्र० ३४ ।

**कोहिल्लो**- । ओघ० ९८ ।

**कोहेतु**:-को हेतुः-का उपपत्तिः । सूर्य० २२ । किं कारणम् । सूर्य० १३ ।

**कौकुच्यं**-दुष्टकायप्रचारसंयुक्तं हास्यं असभ्यो वाक्प्रयोगश्च । ( त० ७-२७ ) ।

**कौटलं**-अर्थशास्त्रम् । ज्योतिषं निमित्तं वा । ओघ० १४९ ।

**कौटिल्यं**-मायी । दश० २५४ ।

**कौटुंबिकः**-कर्षकः ।



Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

**कौतुकं**–थुथुकरणं, बन्धकडकादिबन्धनं, एतत् सर्वमपि कौतुकमुच्यते । बृ० प्र० २१५ अ ।
**कौतुका**– । भग० २३ ।
**कौमोदकी**–वासुदेवस्य गदा। उत्त० ३५० । गदाविशेषः। प्रश्न० ७७ । गदा, लकुटविशेषः । सम० १५७ ।
**कौलिकः**–कोकिलजातीयः पुरुषविशेषः । नंदी० १५५ ।
**कौलिकी**–कोकिलजातीया–भ्रामरम्, उत्पातिकीबुद्धेर्दृष्टान्तः । नंदी० १५५ ।
**कौशलिकतया**– । ठाणा० ४०१ ।
**कौशाम्बकानने**–वनविशेषः । ठाणा० ४३३ ।
**कौशिकः**– । दश० २१३ । दश० २१२ ।
**कौशेयकानि**–वस्त्रविशेषभूतानि । सम० १५८ ।
**कौसुंभ**–रागविशेषः । रञ्जनविशेषः । जं० प्र० १८८ ।
**क्खलियं**–स्खलितम् । विशे० ४०६ ।
**क्खायं**–ख्यातं, कथितं, प्रसिद्धम् । प्रज्ञा० ६८ ।
**क्रतु**–सयूपो यज्ञ एव । विशे० ७८५ ।
**क्रम**–गतिः, प्रवृत्तिः । विशे० २२० ।
**क्रमभङ्गः**–यथैको जीव एक एवाजीवेत्यादि । आव० ५६६ ।
**क्रमभङ्गकाः**–भङ्गस्य द्वितीयभेदः । ठाणा० ४७८ ।
**क्रयाणकः**–द्रव्यसमूहः । नंदी० १५० ।
**क्राकचव्यवहारः**–क्रकचेन काष्ठस्य तद्विषयं सङ्ख्यानं कल्प एव यत्पाट्यं क्राकचव्यवहारः । ठाणा० ४६७ ।
**क्रियानयः**–नयविशेषः । दश० ८० ।
**क्रियाविशालं**–कायिक्यादिक्रियाविशालं संयमक्रियाविशालं च । नंदी० २४१ ।
**क्रियासिद्धिः**–इहैव मोक्षावाप्तिलक्षणा । आचा० ४१६ ।
**क्रीडारथः**-क्रीडार्थं रथः । रथस्य प्रथमो भेदः । जीवा० १८६ ।
**क्रीत**–साध्वकल्यमशनादि । दश० २०३ । प्रश्न० १४४ ।
**क्रूरच्छाणि**– । नि० चू० प्र० ३२३ अ ।
**क्रूराणि**–क्रूराणि, निर्दयानि निरनुक्रोशानि । नि० चू० प्र० १६६ ।
**क्रोधकारणः**–गर्वः । आचा० १६४ ।
**क्रोधनत्वं**–अत्यन्तक्रोधनत्वम् । नवममसमाधिस्थानम् । प्रश्न० १४४ ।
**क्रोधादिपिण्डः**–क्रोधमानमायालोभैरवाप्तः क्रोधादिपिण्डः । आचा० ३५१ ।
**क्रोधादिमानं**–क्रोधादीनां मानम् । आचा० १६४ ।
**क्रौंचारिः**–कार्त्तिकेयः । आचा० २६ ।
**क्रौष्टुकी**–श्रीकृष्णस्य नैमित्तिकः । उत्त० ४६० ।
**क्वणितं**–शब्दितम् । आव० ६४६ ।
**क्वणिता**–काचिद्वीणा । जीवा० २६६ ।
**क्वथितं**–प्रधानम् । जीवा० २६८ ।
**क्वथितोदकं**–उष्णोदकम् । दश० २२८ ।
**क्वाथं**–फाणितम् । प्रज्ञा० ३६४ ।

## क्ष

**क्षणक्षयिभावप्ररूपकः**–सामुच्छेदः । आव० ३११ ।
**क्षणमात्रं**–पलमात्रम् । नंदी० १५५ ।
**क्षणिकं**– । ओघ० ७२ ।
**क्षणीभूतं**–स्तिमितम् । ओघ० १८४ ।
**क्षपकर्षिः**–भिक्षुविशेषः । उत्त० ४१८ ।
**क्षपणं**–अनारोपणम्, प्रस्थे चतुःसेतिकाऽतिरिक्तधान्यस्येव झाटनमित्यर्थः । ठाणा० ३२६ ।
**क्षपणोपसम्पत्**–चारित्रनिमित्तं क्वचित्क्षपणार्थम् । आव० २७१ ।
**क्षयनिष्पन्न**–तत्फलरूपो विचित्र आत्मपरिणामः, केवलज्ञानदर्शनचारित्रादिः । ठाणा० ३७८ ।
**क्षयोपशमं**–अर्द्धविध्यातानलोद्घट्टनसमतां नीतम् । आव० ७६ ।
**क्षान्तः**–क्षामितसमस्तप्राणिगणः । आचा० २६१ ।
**क्षात्रखानकः**–सन्धिच्छेदकः । प्रश्न० ४६ ।
**क्षारोदका**–आमलकोदकाः । पिण्ड० ६५ ।
**क्षाल**–निर्द्धमनः । ठाणा० २६४ ।
**क्षीरं**– । जीवा० १६१ ।
**क्षीरकाकोली**–साधारणवनस्पतिविशेषः । आचा० ५७ ।
**क्षीरपूरम्**– । जीवा० १६१ ।
**क्षीरबिडीलिका**–साधारणवनस्पतिकायिकभेदः । जीवा० २७ ।



Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

**क्षीररसा**–वापीनाम । जं० प्र० ३७१ ।
**क्षीरवरः**–द्वीपविशेषः । अनु० ६० ।
**क्षीराश्रवत्वं**–ऋद्धिविशेषः । ठाणा० ३३२ ।
**क्षीराश्रवः**–क्षीरवन्मधुरवक्ता । आचा० ६८ ।
**क्षीरिका**–साधारणवनस्पतिकायिकभेदः । जीवा० २७ ।
**क्षीरोदः**–क्षीररसास्वादः समुद्रः । अनु० ६० ।
**क्षुद्रिका**–सर्वतोभद्राप्रतिमायाः प्रथमो भेदः । ठाणा०२६२ ।
**क्षुद्रकीकण्टको**– । नि० चू० तृ० १०० आ ।
**क्षुद्रघण्टा**–घण्टिकाः, किङ्किण्यः । जं० प्र० ५२६ ।
**क्षुध** इति कर्म्मणः । नि० चू० तृ० ८५ अ ।
**क्षुभिताः**–आकुलाः । ओघ० ७१ ।
**क्षुरप्रसंस्थितं**–रसनेन्द्रियसंस्थानम् । भग० १३१ ।
**क्षुरिका**–शस्त्रविशेषः । जीवा० १६२ । नंदी० १६४ । आभरणविशेषः । पिण्ड० १२४ ।
**क्षुल्लककुमारः**–श्रमणविशेषः । सूत्र० ७२ ।
**क्षुल्लकभव**– । ठाणा० ८६ ।
**क्षुल्लहिमवत्**–हिमवद्वर्षधरपर्वते द्वितीयकूटम् । ठाणा०७२ ।
**क्षुल्लिका**–भद्रोत्तरप्रतिमायाः प्रथमो भेदः । ठाणा० २६३ ।
**क्षुल्लिकाविमानप्रविभक्तिः**– । ठाणा० ५१३ ।
**क्षेत्रं**–आर्यस्य द्वितीयभेदे प्रथमः । सम० १३५ ।
**क्षेत्रगणितं**–रज्जुगणितम् । ठाणा० २६३, ४६७ ।
**क्षेत्रग्रहणलक्षणैका**–सङ्ग्रहपरिज्ञासम्पत्तः, प्रथमो भेदः । उत्त० ४० ।
**गहभिण्णं**–ग्रहभिन्नं–ग्रहविदारितम् । विशे० १२९४ । मज्झेण जस्स गहो गतो तं गहभिण्णं । नि० चू० तृ० ६६ अ ।

**गहभिन्नं**–यस्य मध्येन ग्रहोऽगमत् तत् ग्रहभिन्नम् । व्य० प्र० ६२ अ ।

**गहमुसलं**–ग्रहमुशलम् । जीवा० २८२ । गृहमुशलं–ऊर्ध्वायता श्रेणिः । भग० १९६ ।

**गहयुद्ध**–ग्रहयुद्धं ग्रहयोरेकत्र नक्षत्रे दक्षिणोत्तरेण सम श्रेणितयाऽवस्थानम् । भग० १९६ ।

**गहरा**–लोमपक्षी विशेषः । प्रज्ञा० ४९ ।

**गहरो**–लोमपक्षीविशेषः । जीवा० ४ ।

**गहसंघाडओ**–ग्रहसङ्घाटकः- ग्रहयुग्मम् । जीवा० २८२ ।

**गहसमं**–प्रथमतो वंशतन्त्र्यादिभिर्यः स्वरो गृहीतस्तत्समं गीयमानं ग्रहसमम् । अनु० १३२ । ठाणा० ३९४ । गीतस्य तृतीयो भेदः । नि० चू० तृ० १ अ ।

**गहसिंघाडग**–ग्रहसिंघाटकं–ग्रहाणां सिङ्घाटकफलाकारेणावस्थानम् । भग० १९६ ।

**गहसुसंपउत्त**–यः प्रथमं वंशतन्त्र्यादिभिः स्वरो गृहीतस्तन्मार्गानुसारि ग्रहसुसंप्रयुक्तम् । जीवा० १९५ । प्रथमतो वंशतन्त्र्यादिभिर्यः स्वरो गृहीतस्तत्समेन स्वरेण गीयमानं ग्रहसुसंप्रयुक्तम् । जं० प्र० ४० ।

**गहा**–ग्रहाः–अङ्गारकादयो गृह्यन्ते । आव० ५९९ । ग्रहाः–ज्योतिष्कभेदविशेषः । प्रज्ञा० ६९ । ग्रहाः सूर्यादिकेत्वन्ता नव, सोमस्याज्ञोपपातवचननिर्देशवर्त्तिनोदेवाः । भग० १९५ ।

**गहाय**–गृहीत्वा–सम्प्रधार्य । उत्त० २०६ ।

**गहावसव्व**–गहापसव्यं–ग्रहाणामपसव्यगमनं, प्रतीपगमनम् । भग० १९६ ।

**गहिंति**–गमिष्यन्ति–ग्रहीष्यन्ति वा स्वीकरिष्यन्ति । उत्त० १९४ ।

**गहिअ**–गृहीतः–अनिक्षिप्तः । ओघ० ५८ ।

**गहिए**–धनिकः । बृ० तृ० ४९ आ ।

**गहिओ**–गृहीतः–अवधारितः । आव० ४१५ ।

**गहियं**–पडिबद्धं । दश० चू० १५१ । गृहीतम् । विशे० ४०५ । प्रश्न० ३० ।

**गहियगहणं**–गृहीतग्रहणं–गृहीतं ग्रहणं–ग्रहणकं येन सः । प्रश्न० ३० ।

**गहियट्ठा**–परस्मात् । भग० ५४२ । अर्थावधारणात् । गृहीतार्थम् । भग० १३५ ।

**गहियवलंजो**–सेज्जातरो खेत्तस्स अंतोबहिं वा गहियवलंजो । नि० चू० प्र० १५८ अ ।

**गहियाउपहरणे**–गृहीतायुधप्रहरणः–गृहीतानि आयुधानि शस्त्राणि प्रहरणनाय–परेषां प्रहारकरणाय येन सः । भग० ३१८ ।



Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

**गहियो**-विडम्बयितुं प्रारब्धः । बृ० तृ० ४७ आ ।
**गहिल्लगवेस**-ग्रहगृहीतवेषः भूतविष्ट इव विचित्रवेसवान् । दश० १६ ।
**गहो**-ग्रहः । आव० ३६७ । राहुलक्षणः । ३६ ।
**गां**-वृषभम् । आचा० ३८४ ।
**गाइयव्वं**-गातव्यम् । ओघ० १५७ ।
**गाउअं**-द्वे धनुःसहस्रे गव्यूतम् । अनु० १५७ ।
**गाउयं**-क्रोशद्वयं गव्यूतिः । ओघ० २३ । गव्यूतं-द्विधनुः सहस्रप्रमाणम् । प्रज्ञा० ४८ । जीवा० ४० । धनुःसहस्रद्वयप्रमाणम् कोशः । भग० २७५ ।
**गागरं**-स्त्रीपरिधानविशेषः । प्रश्न० ७० ।
**गागरा**-मत्स्यविशेषः । प्रज्ञा० ४४ ।
**गागरि**-गर्गरी । अनु० १५२ ।
**गागरी**-बृहद्वर्तुलघटिका । तं० ।
**गागलि**-शालमहाशालभागिनेयः । उत्त० ३२४, ३२१ । गाङ्गलिः-तापसविशेषः । दश० ५१ ।
**गागली**-पृष्टिचम्पायां यशोमतीपुत्रः । आव० २८६ ।
**गाढ**-निबिडम् । नंदी० ४६ । अत्यर्थम् । ओघ० १२७, ३२४ । गाढं-वाढम् । भग० ३७ ।
**गाढोकय**-गाढीकृतम्-आत्मप्रदेशैः सह गाढबद्धम् । भग० २५१ ।
**गाणंगणिए**-गणाद्गणं षण्मासाभ्यन्तर एव सङ्क्रामतीति गाणङ्गणिकः । उत्त० ४३५ ।
**गाणंगणितो**-णिक्कारणे गणातो अण्णं गणं संकमंतो गाणंगणिओ । नि० चू० तृ० ८० आ ।
**गाणंगणिया**-गाणंगणिकता-गणे गणे प्रविशतीत्येवं प्रवादलक्षणा । व्य० द्वि० ४६ अ ।
**गाणि**-गानम् । आव० ६७४ ।
**गातब्भंग**-गात्राभ्यङ्गः-तैलादिनाऽङ्गम्रक्षणम् । ठाणा० २४७ ।
**गातुच्छोलणाइं**-गात्रोत्क्षालनं-अङ्गधावनम् । ठाणा० २४७ ।
**गात्राणि**-ईषादीनि । जं० प्र० ५५ ।
**गाधेन**-उद्वेधेन । ठाणा० ४८० ।
**गामंतरं**-ग्रामादन्यो ग्रामः ग्रामान्तरम् । आव० १४ ।
**गामंतिय**-ग्रामस्यान्ते समीपे वसतीति ग्रामान्तिकः । सूत्र० ३१५ ।
**गाम**-ग्रसति बुध्यादीन् गुणानिति गम्यो वाऽष्टादशानां करणामिति ग्रामः । आचा० २८५ । ग्रामाः-सङ्घाताः । उत्त० ६१३ । ग्रसन्ति बुद्धयादीन् गुणानिति ग्रामाः। आचा० २५४। इन्द्रियग्रामो रूढेः । जनपदाश्रयः । ठाणा० ५१६ । समूहः । आव० ६५० । ग्रसति गुणान् गम्यो वाऽष्टादशानां कराणामिति ग्रामः । उत्त० ६०५ । ग्रामः-ग्रामशब्देन चात्र प्रतिश्रय उपलक्षितः । आचा० २६१ । ग्रसते बुद्धयादीन् गुणानिति ग्रामः । अनु० १४२ । ग्रसते बुद्धयादीन् गुणान् यदि वा गम्यः शास्त्रप्रसिद्धानामष्टादशानां कराणामिति ग्रामः । राज० ११४ । ग्रसतिबुद्धयादीन् गुणान् यदि वा गम्यः शास्त्रप्रसिद्धानामष्टादशानां कराणामिति ग्रामः । व्य० प्र० १६८ अ । करादियाण गम्मो गामो । नि० चू० द्वि० ७० आ । नि० चू० प्र० २२६ अ । ग्रामः-जनपदप्रायजनाश्रितः । प्रश्न० ३६ । दशकुलसाहस्रिको ग्रामः । ज्ञाता० ४४ । जनपदप्रायजनाश्रितः स्थानविशेषः । भग० ३६ । इन्द्रियग्रामः । उत्त० ११२ । इन्द्रियवर्गः । प्रश्न० ६३ । जनपदाध्यासितः । औप० ७४ । ग्रसति बुद्धयादीन् गुणान् गम्यो वा करादीनामिति ग्रामः । सन्निवेशविशेषः । आव० ५६३ । ग्रसति बुद्धयादीन् गुणानिति यदिवा गम्यः-शास्त्रप्रसिद्धानामष्टादशानां कराणामिति ग्रामः । जीवा० ४०,२७६ । सीमापर्यन्तः, प्रजासमध्यासितगृहाऽऽरामवापीदेवकुलादिरूपः, केवला प्रजा वा, प्रधानपुरुषो वा । विशे० ८६७ । ग्रसति बुद्धयादीन् गुणानिति ग्रामः, यदि वा गम्यः शास्त्रप्रसिद्धानामष्टादशकराणामिति ग्रामः । प्रज्ञा० ४७ । ग्रामः-इन्द्रियम् । दश० २६७ । शालिग्रामादिः । दश० २८१ । इन्द्रियसमूहः । भग० १०१ । समूहः । ज्ञाता० १ । ग्रसति बुद्धयादीन् गुणानिति ग्रामः । दश० १४७ ।
**गामउड**-गाममहत्तरो । नि० चू० प्र० २०६ अ । ग्राममहत्तरः । बृ० द्वि० २१२ आ ।
**गामउडपुत्तो**-ग्रामकूटपुत्रः । आव० २०२ ।
**गामकंटए**-इन्द्रियं तद्दुःखहेतुः कण्टकः स ग्रामकण्टकः । दश० २६७ । ग्रामः-इन्द्रियग्रामस्तस्य कण्टका इव



Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

कण्टकाः ग्रामकण्टकाः–प्रतिकूलशब्दादयः। उत्त० ११२। ग्रामकण्टकाः–नीचजनरूक्षालापाः। आचा० ३११।

**गामघाए–** । ज्ञाता० २३६।

**गामघाय–**ग्रामघातः। सूत्र० ३०६।

**गामतेणो–**गामतो हरंतो गामतेणो। नि० चू० द्वि० ३८ आ।

**गामथेरा–**ये ग्रामनगरराष्ट्रेषु व्यवस्थाकारिणो बुद्धिमन्त आदेयाः प्रभविष्णवस्ते तत्स्थविराः। ठाणा० ५१६।

**गामधम्म–**ग्रामधर्मः–विषयोपभोगगतो व्यापारः। आचा० ३३१। ग्रामा–जनपदाश्रयास्तेषां तेषु वा धर्म्मः समाचारो–व्यवस्थेति ग्रामधर्म्मः, अथवा ग्रामः–इन्द्रियग्रामो रूढेस्तद्धर्मो–विषयाभिलाषः। ठाणा० ५१५। ग्रामधर्मः–प्रतिग्रामं भिन्नः। दश० २२।

**गामधम्मतित्ति–**ग्रामधर्माः–शब्दादयः कामगुणास्तेषां तप्तिः–गवेषणं पालनं वा ग्रामधर्मतप्तिः, अब्रह्मणोऽष्टादशं नाम। प्रश्न० ६६।

**गामधम्मा–**ग्रामाः–इन्द्रियग्रामास्तेषां धर्माः–स्वभवा यथा स्वविषयेषु प्रवर्त्तनं ग्रामधम्माः। आचा० २१८। ग्रामधर्म्माः–विषयाः। आचा० २७६।

**गामपिंडोलगं–**ग्रामपिण्डोलकः–भिक्षयोदरभरणार्थं ग्राममाश्रितः तुन्दपरिमृजो द्रमकः। आचा० ३१४।

**गामभोइओ–**ग्रामभोजिकः। आव० ३५५।

**गाममहो–**गामे महा गाममहो यात्री इत्यर्थः। नि० चू० द्वि० ७० आ।

**गाममारी–**ग्राममारी। भग० १९७।

**गामरट्ठमयहरो–**ग्रामराष्ट्रमहत्तरः। आव० ७३८।

**गामरोग–**ग्रामरोगः। भग० १९७।

**गामवधो–**गामस्स वधो गामवधो ग्रामघातेत्यर्थः। नि० चू० द्वि० ७० आ।

**गामवाह–**ग्रामवाहः। भग० १९९।

**गामा–**ग्रामाः–वृत्त्यावृत्ताः कराणां गम्या वा। जं० प्र० १२१। ग्रामादीनां च जीवाजीवता प्रतीतैव, तत्र करादिगम्या ग्रामाः। ठाणा० ८६।

**गामाणुगामं–**एकस्माद् ग्रामादवधिभूतादुत्तरग्रामाणामनतिक्रमो ग्रामानुग्रामं ग्रामपरम्परा। ठाणा० ३१०। एक ग्रामाल्लघुपश्चाद् भावाभ्यां ग्रामोऽणुग्रामः। ठाणा० ३१०। मासकप्पो जत्थ कतो ततो जं गम्मइ तं गामाणुगामं। नि० चू० प्र० १९१ अ। ग्रामानुग्रामम्। आव० १४२।

**गामाणुगामो–**मासकप्पविहारगामाओ गच्छतो अण्णो अणुकूलो गामो गामाणुगामो। नि० चू० प्र० २१९ अ।

**गामायं–**ग्रामाकं नाम सन्निवेशः। आव० २०८।

**गामायारा–**ग्राम्याचाराः–विषयाः। आव० १३४।

**गामिए–**ग्राममहत्तरः। नि० चू० प्र० १४१ आ।

**गामिया–** ग्रामिकाः–ग्रामधर्म्माश्रिताः। आचा० ३०८।

**गामिल्लय–**ग्रामेयकः। आव० ४३५,।

**गामील्लए–**ग्रामेयकः। आव० ५५४।

**गामेयगा–**ग्रामेयकाः। उत्त० २६३।

**गामेल्लग–**ग्रामेयकः–ग्रामवास्तव्यः। दश० ५९। आव० १०३।

**गामेल्लगत्तणं–**ग्रामेयकत्वम्। आव० ७२१।

**गामेल्लया–**ग्रामवासीजनः। ओघ० ४६।

**गामेल्लयपारद्धो–**ग्रामेयकप्रारब्धः। आव० ३५१।

**गाय–**गात्रं–ईषादि। जीवा० २३१। कायः। दश० ११७। कायः–चिलातदेशनिवासीम्लेच्छविशेषः। प्रश्न० १४।

**गायकम्मं–**गात्रकर्म–हस्तादिगात्रचम्पनरूपमङ्गपरिकर्म। प्रश्न० १३७।

**गायगंठिभेय–**गात्रात्–मनुष्यशरीरावयवविशेषात् कट्यादेः सकाशाद् ग्रन्थिकार्षापणादिपोट्टलिकां भिदन्ति–आच्छिन्दन्तीति गात्रग्रन्थिभेदाः। ज्ञाता० २।

**गायदाहं–**जत्थ गाआ डज्झंति तं गायदाहं भण्णति। नि० चू० प्र० १९२ आ।

**गायाइं–**गात्राणि भरतशरीरावयवाः। जं० प्र० २७५।

**गारं–**अगारं गेहम्। ठाणा० ३७१।

**गारत्थ–**गृहस्थः–गृहधर्मवान्। दश० १०।

**गारत्था–**गिहत्था। नि० चू० प्र० ४६ आ।

**गारत्थिए–**गृहस्थाः–पिण्डोपजीविनो धिग्जातिप्रभृतयः। आचा० ३२४।

**गारत्थियवयण–**अगारं–गेहं तद्वृत्तयो अगारस्थिता-गृहिणः



Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

तेषां–यत्तदगारस्थितवचनम् । ठाणा० ३७० ।
**गारव**–गौरवं–आदरः । प्रश्न० ३५ । गौरवं–यद्गौरवनिमित्तं वन्दते तत्, कृतिकर्मणि चतुर्दशो दोषः । आव० ५४४ । गुरोर्भावः गौरवः । आव० ५७६ । गौरवः गमनपर्यायः । ठाणा० ४५३ । लब्धिमाहात्म्यम् । बृ० द्वि० २६० अ । परिवारर्धिधर्मकथाद्यष्टप्रकारोऽभिमानः । व्य० प्र० २५७ । गौरवः गर्वः । ठाणा० ४६६ ।
**गारवा**–गौरवाणि–ऋद्धिरससातगौरवरूपाणि । प्रश्न० ६७ ।
**गारविए**–गर्वेण लब्धिसम्पन्नोऽहमितिकृत्वा एकाकी भवति । ओघ० १५० ।
**गारी**–अगारी । ओघ० ६६ ।
**गालणं**–गालनं–छाणनम् । प्रश्न० २५ । घनमसृणवस्त्राद्दान्तेन गालनम् । आचा० ४२ ।
**गालणा**–यैरूपायैर्गर्भो द्रवीभूय क्षरति । विपा० ४२ ।
**गालियदहियस्स**–गालितस्य दध्नः । आव० ६२४ ।
**गालेमाणे**–गालयन्–अतिवाहयन् । भग० ४६२ ।
**गालो**–वेगलो । नि० चू० द्वि० ६८ आ ।
**गाव**–बलीवर्दसुरभयः । प्रश्न० ३७ ।
**गाविकुविय**–गोगवेषकः । भर० ।
**गाविमग्गो**–गोमार्गः । आव० ४१६ ।
**गावी**–गौ–त्रिपृष्ठवासुदेवनिदानकारणम् । आव० १६३टी. ।
**गासं**–ग्रासं–कवलम् । उत्त० ११७ ।
**गासेषणा**– । आचा० २८३ ।
**गाह**–गाथा । आव० ७६३ । ज्ञाता० ३८ । महान् निर्बन्धः । बृ० द्वि० २१ अ । ग्राहः–जलजन्तुविशेषः । प्रश्न० ७ । ग्राहः–स्थूलदेहो जलजन्तुविशेषः । आव० ८१६ ।
**गाहग**–ग्राहक आचार्यः, ग्राहयतीति ग्राहकः, ग्राहको नाम शिष्यः गृण्हातीति ग्राहकः । व्य० प्र० २५७ अ । ग्राहकं–प्रतिपाद्यस्य विवक्षितार्थप्रतीतिजनकम् । प्रश्न० १२० । ग्राहकः–शिक्षयिता गुरुः । उत्त० १४५ । गुरुः । आव० ३४१ ।
**गाहणगिरा**–ग्राहयतीति ग्राहिका, ग्राहिका चासौ गीश्च ग्राहकगीः । आव० २३७ ।
**गाहगसुद्धं**–ग्राहकशुद्धं–यत्र ग्रहीता चारित्रगुणयुक्तः । विपा० ६२ ।
**गाहण**–ग्राह्यते शिष्य एतदिति बाहुलकात् कर्मण्यनट् ग्राहणं–आचारादिसूत्रं आसेवना । व्य० प्र० २२६ अ ।
**गाहवतीओ**–सुकच्छमहाकच्छविजयोर्विभागकारिणी नदी । ठाणा० ८० ।
**गाहा**–गाथा–प्राक्तनपञ्चदशाध्ययनार्थस्य गानाद् गाथा, गाथा वा तत्प्रतिष्ठाभूतत्वादिति मेरुनामसूत्रे गाथा श्लोकश्च । सम० ३२ । गीयत इति गाथा, सा चेहार्थाद्धर्माभिधायिनी सूत्रपद्धतिः । उत्त० ३८५ । गीयते–शब्द्यते स्वपरसमयस्वरूपमस्यामिति गाथा सूत्रकृताङ्गस्य षोडशमध्ययनम् । उत्त० ६१४ । गाहा–घरं गिहं वा । व्य० द्वि० २८३ अ । गाहा गेहं तत्र ऋतौ–ऋतुबद्धे काले वर्षाकाले वा पर्युषितः । व्य० द्वि० २८३ अ । गाथा–सूत्रकृताङ्गाद्यश्रुतस्कंधे षोडशमध्ययनम् । आव० ६५१ । गृह्णन्ति ग्राहाः जलचरविशेषाः । उत्त० ६६६ । गाथा–सूत्रकृताङ्गस्य षोडशमध्ययनम् । उत्त० ६१४ । संस्कृतेतरभाषानिबद्धा आर्या । जं० प्र० १३७ । प्रतिष्ठा निश्चितिश्च । आव० ८०४ । गीयत इति गाथा–छन्दोविशेषरूपा । उत्त० ३३४ । गृहम् । बृ० द्वि० ८६ अ । ग्राहाः–जलचरपञ्चेन्द्रियतिर्यग्योनिकायां तृतीयो भेदः । प्रज्ञा० ४३ । विक्षिप्ताः सन्त एकत्रमीलिता अर्था यस्यां सा गाथा, अथवा सामुद्रेण छन्दसा वा निबद्धा वा गाथा । गीयते–पठ्यते मधुराक्षरप्रवृत्त्या गायन्ति वा तामिति गाथा । सूत्र० २६२ ।
**गाहावइ**–गृहपतिः–गृहस्वामी । बृ० द्वि० ८६ अ । गृहपतिः–गृही । भग० २२८ । गृहपतिः–ऋद्धिमद्विशेषः । उपा० १ । गृहपतयः–कुटुम्बनायकाः । भग० ५०२ ।
**गाहावइकरंडग**–गृहपतिकरण्डकः–श्रीमत्कौटुम्बिककरण्डकः । ठाणा० २७२ ।
**गाहावइकुंडे**–गाहावत्या अन्तरनद्याः कुण्डं–प्रभवस्थानं ग्राहावतीकुण्डनाम कुण्डम् । जं० प्र० ३४५ ।
**गाहावइकुलं**–गृहपतिकुलं–पाटकं रथ्यां ग्रामादिकं वा । आचा० ३३७ । गृहपतिकुलं–गृहिगृहम् । भग० ३७४ ।
**गाहावइदीवे**–ग्राहावतीद्वीपः । जं० प्र० ३४६ ।



Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

**गाहावइरयण**–गृहपतिरत्नं–कौटुम्बिकरत्नम् । जं० प्र० २४३ ।

**गाहावई**–गृहपतिः–माण्डलिको राजा । भग० ७०० । गृहस्थः । पिण्ड० ४ । गृहपतिः । आचा० ३३५ । गृहस्य पतिः–गृहपतिः, सामान्यतः प्राकृतपुरुषः । सूत्र० ३६४ । ग्राहाः–तन्तुनामानो जलचरा महाकायाः सन्त्यस्यामिति ग्राहावती महानदी । जं० प्र० ३४६ ।

**गाहावतिरयणे**–गृहपतिः–कोष्ठागारनियुक्तः । ठाणा० ३६८ ।

**गाहाविया**–कृष्टा । आव० ६८७ ।

**गाहासोलसग**–गाथाषोडशकादीनि स्थितिसूत्रेभ्य आरात्सप्त सूत्राणि, तत्र सूत्रकृताङ्गस्य प्रथमश्रुतस्कन्धे षोडशाध्ययनानि तेषां च गाथाभिधानं षोडशमिति गाथाभिधानमध्ययनं षोडशं येषां तानि गाथाषोडशकानि । सम० ३२ । गाथाषोडशकः–गाथाख्यं षोडशमध्ययनं यस्मिन् श्रुतस्कन्धे सः, सूत्रकृताङ्गस्याद्यः श्रुतस्कन्धः । सूत्र० ८।

**गाहासोलसमे**–प्राक्तनपञ्चदशाध्ययनार्थस्य गानाद्गाथा, सूत्रकृताङ्गस्य षोडशमध्ययननाम । सम० ३१ ।

**गाहिंति**–प्रज्ञापयन्ति । बृ० द्वि० १६४ आ ।

**गाहिज्जंति**–ग्राह्यन्ते । आव० १०१ ।

**गाहिंति**–ग्राहयति । आव० ३४३ ।

**गाहिया**–ग्राहिका–अक्लेशेनार्थबोधिका । औप० ७८ ।

**गाहीकया**–गाथीकृताः–पिण्डीकृताः । सूत्र० २६२ ।

**गाहेंति**–भावयंति । नि० चू० प्र० ३३८ आ ।

**गाहेहिति**–ग्राहयिष्यन्ति–प्रापयिष्यन्ति स्थलेषु स्थापयिष्यन्तीत्यर्थः । भग० ३०६ ।

**गिज्झंति**–गृध्यन्ति प्राप्तस्यासन्तोषेणाप्राप्तस्यापरापरस्याकाङ्क्षावन्तो भवन्तीति । ठाणा० २६३ ।

**गिज्झ**–गृद्धः–प्रतिबद्धः । दश० २६८ ।

**गिज्झवओ**–ग्राह्यवाक्यः । आदेयवाक्यः । आव० २३६ ।

**गिज्झह**–गृध्यत–गृद्धिं प्राप्तभोगेष्वतृप्तिलक्षणां कुरुत । ज्ञाता० १४६ ।

**गिज्झियव्वं**–गर्द्धितव्यं–अप्राप्तेष्वाकाङ्क्षाकार्या । प्रश्न० १५६ ।

**गिज्झु**–ग्राह्यः–संवेद्यः । उत्त० ४०२ ।

**गिणिभमेत्तं**–उदाहरणं । नि० चू० प्र० २६६ आ ।

**गिण्हमाणे**–बाह्यादावङ्गे गृण्हन् । ठाणा० ३२७ । गृण्हन्–ग्रीवादाववलम्बयन् । ठाणा० ३५३ ।

**गिण्हित्तए**–ग्रहीतुं–आदातुं विधातुमित्यर्थः । ज्ञाता० १४६ ।

**गिण्हियव्वे**–गृह्यते–उपादीयते कार्यार्थिभिरिति ग्रहीतव्यः कार्यसाधक इति । उत्त० ६८ ।

**गिद्ध**–गृध्रः–पक्षिविशेषः, गृद्धो वा मांसलुब्धः शृगालादिर्वा । भग० १२० । गृद्धः–प्राप्ताहारे आसक्तोऽतृप्तत्वेन वा तदाकाङ्क्षावान् । भग० ६५० । विशेषाकाङ्क्षावान् । भग० २६२ । आकाङ्क्षावान् । ज्ञाता० ८५ । मूर्छितः । विपा० ३८ । मूर्च्छितः, कांक्षावान् । आव० ५८७ । गृद्धं–प्राप्तातृप्तिः । ठाणा० १४५ ।

**गिद्धपट्ठ**–गृध्रैः स्पृष्टं–स्पर्शनं यस्मिंस्तद् गृध्रस्पृष्टं, यदिवा गृध्राणां भक्ष्यं पृष्ठमुपलक्षणत्वादुदरादि च तद्भक्ष्यकरिकरभादिशरीरानुप्रवेशेन महासत्वस्य मुमूर्षोर्यस्मिंस्तत् गृध्रपृष्ठम् । ठाणा० ६३ ।

**गिद्धपट्ठठाण**–गृध्रपृष्ठस्थानानि–यत्र मुमूर्षवो गृध्रादिभक्षणार्थं–रुधिरादिदिग्धदेहा निपत्यासते । आचा० ४११ ।

**गिद्धपिट्ठ**–गार्द्धपृष्ठं–अपरमांसादिहृदयन्यासाद् गृद्धादिनाऽऽत्मव्यापादनम् । आचा० २६० । गृध्रैः स्पृष्टं–स्पर्शनं यस्मिंस्तत् गृध्रस्पृष्टम्, यदिवा गृध्राणां भक्ष्यं पृष्ठमुपलक्षणत्वादुदरादि च मर्तुर्यस्मिंस्तद् गृध्रपृष्ठम् । उत्त० २३४ ।

**गिद्धपिट्ठमरणं**–गृध्रपृष्ठमरणं, मरणस्य चतुर्दशो भेदः । सम० ३३ । उत्त० २३० ।

**गिद्धाइभक्खणं**–गृद्धाः प्रतीतास्ते आदिर्येषां शकुनिकाशिवादिनां तैर्भक्षणम् गम्यमानत्वादात्मनः तदनिवारणादिना तद्भक्ष्यकरिकरभादिशरीरानु प्रवेशेन च गृध्रादिभक्षणम् । उत्त० २३४ ।

**गिद्धापिट्ठ**–गृध्रस्पृष्टं गृध्रैः स्पर्शनं कडेवराणां मध्ये निपत्य गृध्रैरात्मनो भक्षणमित्यर्थः । ज्ञाता० २०५ ।

**गिद्धि**–गृद्धिः–गाद्धर्यं ममत्वं वा । सूत्र० १७१ ।

**गिद्धी**–गृद्धिः–अभिकाङ्क्षा । ठाणा० ४४७ ।

**गिम्ह**–ग्रीष्मः–उष्णकालः । ओघ० २१२ । ग्रीष्मः–



Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

ज्येष्ठादिः । भग० ४६२ । ग्रीष्मः-उष्णकालः । भग० २११ । ग्रीष्मः-षष्ठः ऋतुः । सूर्य० २०९ । वैशाख-ज्येष्ठौ । ज्ञाता० १६१ । ग्रीष्मकालः-उष्णकाल इत्यर्थः । सूर्य० ६१ ।

**गिम्हा**-ग्रीष्मा-उष्णकालमासाः । जं० प्र० १५० ।

**गिरा**-गीः-वाणी । बृ० द्वि० २५५ आ ।

**गिरि**-गिरयः-गृणन्ति शब्दायन्ते जननिवासभूतत्वेनेति गिरयः-गोपालगिरिचित्रकूटप्रभृतयः । भग० ३०७ । गिरिशब्देन क्षुद्रगिरयो ग्राह्याः । जं० प्र० २२३ । गिरयः-दुर्गादिकरणार्थं जनावासयोग्याः पर्वताः । जं० प्र० २१० । गृणन्ति-शब्दायन्ते जनं निवासभूतत्वेनेति गिरयः । जं० प्र० १६८ । गिरिः-महापाषाणः । औप० ८८ ।

**गिरिउडे**- । नि० चू० १९२ आ ।

**गिरिकडग**-गिरिकटकः-पर्वतनितम्बः । ज्ञाता० २३८ ।

**गिरिकण्णइ**-वल्लीविशेषः । प्रज्ञा० ३२ ।

**गिरिगिह**-गिरिगृहं-पर्वतोपरि गृहम् । ठाणा० २९४ । प्रश्न० १२७ । भग० २०० । आचा० ३६६ ।

**गिरिजण्णयं**-अवरण्हसंखडी । नि० चू० द्वि० १५ अ ।

**गिरिजत्ता**-गिरियात्रा-गिरिगमनम् । ज्ञाता० ४६ ।

**गिरिजन्नो**-गिरियज्ञः-उस्सूरं मत्तवालसंखडी वा । गिरि-यज्ञः-कोंकणादिदेशेषु सायाह्नकालभावीप्रकरणविशेषः । बृ० द्वि० ९५ आ ।

**गिरिणगरं**-गिरिनगरं नगरविशेषः । आव० ५२ । विशे० ४१३ । गिरिनगरं-परदारगमने पुरम् । आव० ८२३ ।

**गिरिणयरं**-गिरिसमीपे नगरं गिरिनगरम् । अनु० १४९ ।

**गिरितडगं**-गिरितटकं सन्निवेशविशेषः । उत्त० ३७९ ।

**गिरिनदी**- । ज्ञाता० २५ ।

**गिरिपक्खो**-गिरिपक्षः-पर्वतपार्श्वः । औप० ८८ ।

**गिरिपडणे**-पर्वतपातः । ज्ञाता० २०२ ।

**गिरिपुरं**-नगरविशेषः । उत्त० ३७९ ।

**गिरिप्पवात**-गिरिप्रपातः । आव० ३५० ।

**गिरिफुल्लिगा**-नगरीविशेषः । नि० चू० द्वि० १०० आ ।

**गिरिफुल्लिय**-गिरिपुष्पितम्, मानपिण्डदृष्टान्ते नगरम् । पिण्ड० १३३, १३४ ।

**गिरिमह**-पर्वतमहः । आचा० ३२८ ।

**गिरिराया**-सर्वेषामपि गिरीणामुच्चैस्त्वेन तीर्थकर-जन्माभिषेकाश्रयतया च राजा गिरिराजः, मेरुनाम । जं० प्र० ३७५ । गिरिराजः, । सूर्य० ७८ ।

**गिरिविडकादि**-आभरणविशेषः । आचा० ३९४ ।

**गिरिसरिउवला**-गिरिसरिदुपला-गिरिसरित्पाषाणाः । आव० ७५ ।

**गिरिसरित्परिरयः**- । आव० ५५२ ।

**गिरिसिद्धो**-गिरिसिद्धः । दश० ४४ ।

**गिरो**-जत्थ पव्वए आरूढेहिं अहो पवायट्ठाणं दीसइ सो गिरी भण्णइ । नि० चू० द्वि० ५२ अ ।

**गिला**-ग्लानिः । व्य० प्र० १८५ अ ।

**गिलाइ**-ग्लायति ग्लानो भवति । भग० १२६ । ग्लानिः-खेदः । भग० २३२ ।

**गिलाए**-ग्लातिः-खेदः । भग० २१९ ।

**गिलाण**-ग्लानः । आव० ७८४ । ग्लानः-पञ्चमः कुडङ्गः । आव० ८५६ । अनीरुजः । आव० ८४३ । क्षीणहर्षः, अशक्त इत्यर्थः । ज्ञाता० १८० । अपगतप्रमोदः । सूत्र० १३७ । ग्लानो नाम रोगाभिभूतः । दश० ३१ । मन्दः । ओघ० १४ । जरादिगहितो विमुक्को वा । नि० चू० प्र० १४ आ । विकृष्टतपसा कर्त्तव्यताऽशक्तो वाता-दिक्षोभेण वा ग्लानः । आचा० २८१ । मन्दोऽपगतहर्षो वा । उत्त० २४६ ।

**गिलाणभत्तं**-गिलाणस्स दिज्जंति तं गिलाणभत्तं । नि० चू० प्र० २७२ आ । ग्लानभक्तं-ग्लानस्य नीरोगतार्थं भिक्षुकदानाय यत् कृतं तत् भक्तम् । भग० २३१ । भग० ४६७ । ग्लानः सन्नारोग्याय यद् ददाति तत् ग्लानभक्तम् । ज्ञाता० ५२ । औप० १०१ । ग्लानो रोगोपशान्तये यद्ददाति ग्लानेभ्यो वा यद् दीयते तत् । ठाणा० ४६० ।

**गिलायं**-ग्लानं-पर्युषितम् । बृ० प्र० ३१२ आ ।

**गिलायंति**-ग्लायन्ति-श्राम्यन्ति । ठाणा० १३५ ।

**गिलासणि**-भस्मको व्याधिः । आचा० २३५ ।

**गिलासिणि**-रोगविशेषः । नि० चू० द्वि० १४८ अ ।

**गिल्लि**-वाहनविशेषः । उत्त० ४३८ । भग० २३७ ।



Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

हस्तिन उपरि कोल्लररूपा या मानुषं गिलतीव । अनु० १५६ । जीवा० २८१ । पुरुषद्वयोत्क्षिप्ता डोलिका । जं० प्र० १२३ ।

**गिल्ली**–पुरुषद्वयोक्षिप्ता झोल्लिका । सूत्र० ३३० । भग० २३७ ।

**गिल्लीओ**–हस्तिन् उपरि कोल्लराकाराः । भग० ५४७ ।

**गिहंतरं**–गिहं चेव अंतरं गिहं । दश० चू० ५१ ।

**गिहंतरनिसिज्जा**–गृहान्तरनिषद्या–गृहमेव गृहान्तरं गृहयोर्वा अपान्तरालं तत्रोपवेशनम् । दश ११७ ।

**गिह**–गृहं–पाशकल्पाः पुत्रकलत्रादयः । दश० ७७३ । गृहं–शरणं, लयनम् । जीवा० २६६ । सकुड्डंगिहं । नि० चू० प्र० २६५ अ । वणरायमंडियं भवणं तं चेव वणविवज्जियं गिहं । नि० चू० द्वि० ७० अ । गृहं–अस्मद्गृहकल्पम् । जीवा० २७६ । गृहं–अपवरकादि–मात्रम् । ठाणा० २६४ । अवस्थितप्रासादरूपम् । उत्त० ३८६ । गृहं सामान्यवेश्म । उत्त० ३०८ ।

**गिहकम्म**–गृहनिष्पत्त्यर्थं कर्म गहकर्म इष्टकामृदानयानादि । उत्त० ६६५ ।

**गिहत्थ**–गहस्थः–गृहलिंगे तिष्ठतीति गहस्थः । व्य० द्वि० २७ आ ।

**गिहत्थसंसट्ठं**–गृहस्थसंसृष्टम् । आव० ८५४ ।

**गिहदुवारं**–अग्गदारं पावेसितं तं गिहदुवारं भण्णति । नि० चू० प्र० १६२ अ ।

**गिहमुहं**–अग्गिमालिंदयो छद्दारुआलिंदो एते दो वि गिहमुहं । नि० चू० प्र० १६२ अ ।

**गिहवइ**–गृहपतिः धनाभिपः । आव० २६४ । गृहपतिः अवग्रहे तृतीयो भेदः । आचा० ४०२ । गृहपतिः–सामान्यमण्डलाधिपतिः । बृ० प्र० १०८ अ ।

**गिहवती**–शय्यादाता । ठाणा० ३४० ।

**गिहवास**–गृहमेव वा पारवश्यहेतुतया पाशः गृहपाशः । उत्त० ६६४ । गृहवासं–गृहावस्थानम् । उत्त० ६६४ ।

**गिहापत्तणं**–गृहेष्वागमनं गृहापतनम् । जीवा० ३४४ ।

**गिहाययणं**–गृहेषु तेषामायातनं गमनं गृहायतनम् । जीवा० २७६ ।

**गिहि**–गृही–भद्रकः । ओघ० ५७, १०५ । असंयतः । दश० २३६ । सकलत्रः । दश० २६० ।

**गिहिचेतियं**–पडिमा । नि० चू० द्वि० ६६ आ ।

**गिहिजोग**–गृहियोगः–गृहसम्बन्धं तद्बालग्रहणादिरूपः गृहिव्यापारो वा प्रारम्भरूपः । दश० २३१ । गिहीहिं समं जोगं–संसग्गि, गिहिकम्मं जोगो वा । दश० चू० १२२ ।

**गिहिणिसेज्जा**–पलियंकादी । नि० चू० द्वि० ६५ अ ।

**गिहिधम्म**–गृहस्थधर्मं एव श्रेयानित्याभिसंधाय तद्यथोक्तचारिणो गृहिधर्म्माः । अनु० २५ । गृहिधर्म एव श्रेयानित्यभिसन्धेर्देवातिथिदानादिरूपगृहस्थधर्मानुगताः । औप० ६ । गृहिधर्मा–गृहस्थधर्म एव श्रेयानित्यभिसन्धाय तद्यथोक्तकारी । ज्ञाता० १६५ ।

**गिहिधम्मचिंतए**– । ज्ञाता० १६५ ।

**गिहिभायणं**–गृहिभाजनं स्थाल्यादिः । सम० ३६ ।

**गिहिमत्तो**–घंटीकरगादि । नि० चू० द्वि ६४ आ । गृहिमात्रं–गृहस्थभाजनम् । दश० ११७ ।

**गिही**–गृद्धिः–अभिष्वङ्गलक्षणा । आव० ६५८ । अधाभद्रकः । नि० चू० प्र० १४७ अ ।

**गिहेलुगं**–गिहेलुकः–उम्बरः । आचा० ३६७ ।

**गीअं**–गीतिका–पूर्वार्द्धसदृशाऽपरार्धलक्षणा आर्या । जं० प्र० १३८ ।

**गीइयं**– । ज्ञाता० ३८ ।

**गीई**–गीतेन सूत्रेण केवलेन सम्यक् पठितेन गीतमस्यास्तीति गीति । बृ० प्र० ११२ अ ।

**गीतजसे**– । ठाणा० ४०६ ।

**गीतत्थो**–गृहीतार्थः । नि० चू० प्र० ७६ आ ।

**गीतयशसः**–गन्धर्वभेदविशेषः । प्रज्ञा० ७० ।

**गीतरतयः**–गन्धर्वभेदविशेषः । प्रज्ञा० ७० ।

**गीतरती**–गन्धर्वेन्द्रः । उत्त० ४२५ । ठाणा० ८५ ।

**गीतिया**–गीतिका–गानविशेषः । आ० ५५७ ।

**गीय**–गीतं–स्वरग्रामानुगतगीतिकानिबद्धम्, शब्दितम् । उत्त० २८७ । गीतं–गानमात्रम् । भग० ३२३ । ज्ञाता० ३८ । रागगीत्यादिकम् । जं० प्र० ३६ ।

**गीयजसे**–गीतयशः–उत्तरनिकाये अष्टमो व्यन्तरेन्द्रः । भग० १५८ । ठाणा० ८५ ।



Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

**गीयत्थ**–गीतार्थः–वस्त्रपात्रपिंडैषणाध्ययनादिच्छेदसूत्राणि च सूत्रतोऽर्थतस्तदुभयतो वा येन सम्यगधीतानि स गीतार्थः। व्य० प्र० २४ आ। स्वयं व्यवहारमवबुद्धचते प्रतिपद्यमानो वा प्रतिपद्यते व्यवहारं सः गीतार्थः। व्य० प्र० ६ आ। सूत्रार्थतदुभयविदः, अन्यथा हेयोपादेयपरिज्ञानयोगात् ते एतादृशा एवंविधा गीतार्था गणावच्छेदिनः। व्य० प्र० १७२ अ।

**गीयरइपिय**–गीतरतिप्रियः-गीतेन या रती-रमणं क्रीडा सा प्रिया येषां गीतरतयो वा लोकाः प्रिया येषां ते। औप० ६२।

**गीयरई**–गीतरतिः–दक्षिणनिकाये अष्टमो व्यन्तरेन्द्रः। भग० १५८।

**गीयसद्द**–गीतशब्दं–पञ्चमादिहुङ्कृतिरूपम्। ठाणा० ४०६।

**गीया**–गीतार्था–वृषभाः। व्य० प्र० २५१।

**गुंगुयंता**–कान्दिशीकाः। उत्त० १७६।

**गुंजंत**–गुञ्जन्तः शब्दविशेषं विदधानाः। जीवा० १८८। शब्दायमानाः। ज्ञाता० २७।

**गुंज**–गुञ्जा–रक्तिका। जं० प्र० ३४।

**गुंजद्धराग**–गुञ्जा तस्या अर्धरागो गुञ्जार्धरागः। प्रज्ञा० ३६१।

**गुंजा**–गुञ्जा–भम्मा। आचा० ७४। आतोद्यविशेषः। प्रश्न० ५१। चणोठिया। अनु० १५५।

**गुंजालिका**–सारिण्येव वक्रा। अनु० १४६।

**गुंजालिकाः**–दीर्घा गम्भीराः कुटिलाः श्लक्ष्णाः जलाशयाः। आचा० ३८२।

**गुंजालिया**–गुञ्जालिकाः वक्रसारिण्यः। भग० २३८। औप० ९३। वक्रा नदी। प्रज्ञा० २६७। वक्रसारणी। प्रश्न० ६०। वक्रसारिणी। ज्ञाता० ६७। नद्य एव वक्रा गुञ्जालिकाः। प्रज्ञा० ७२। अन्नेऽन्ने कवाडसंजुत्ताओ गुंजालिया भन्नंति। नि० चू० द्वि० ७० आ।

**गुंजालियाओ**–सारण्यस्ता एव वक्राः गुञ्जालिकाः। जं० प्र० ४१।

**गुंजावाए**–गुञ्जा–भम्मा तद्वत् गुञ्जन् यो वाती स गुञ्जावातः। आचा० ७४। यो गुञ्जन्–शब्दं कुर्वन् वाति गुञ्जावातः। जीवा० २६। प्रज्ञा० ३०।

**गुंजावाता**–ये गुञ्जतो वान्ति। उत्त० ६९४।

**गुंजावाय**–गुञ्जन् सशब्दं यो वाति स गुञ्जवातः। भग० १९६।

**गुंजिए**–गुञ्जितं–निर्घातविकारो गुञ्जावद्गुञ्जितो महाध्वनिः। आव० ७३६।

**गुंजितं**–निर्घातः–तस्सेव विकारो गुंजावत्। गुंजमानो महाध्वनिः। नि० चू० तृ० ७० आ।

**गुंजीवल्ली**–वल्लीविशेषः। प्रज्ञा० ३२।

**गुंज्जित**–गुंजावत् गुंजमानो महाध्वनिर्गुंजितम्। व्य० द्वि० २४१ आ।

**गुंठा**–मायाविनः। व्य० प्र० २५५। गुंठा–माया। व्य० प्र० २५६।

**गुंठो**–वाहणा गुंठादि गुंठो घोडगो। नि० चू० तृ० ३७ आ। घोटको महिषो वा। बृ० द्वि० १२५ आ।

**गुंडिज्जइ**–गुण्डयते। आव० ६२५।

**गुंडिय**–गुण्डित–परिकरिता। प्रश्न० ४७। गुण्डितः। ज्ञाता० ६१।

**गुंतरुक्ख**– । भग० ८०३।

**गुंद**–वृक्षफलविशेषः। आव० ८२८।

**गुआर**– । जं० प्र० १९४।

**गुग्गुलभगवं**–गुग्गुलभगवान्। आव० ७१२।

**गुग्गुलमार**– । आव० ७१२।

**गुच्छ**–वृन्ताकीप्रभृतिः। जीवा० २६; १८८। गुच्छः–वृन्ताकीसल्लकीकर्पास्यादिकः। आचा० ३०। पत्रसमूहः। भग० ३७। जं० प्र० २५। गुच्छाः–वृन्ताकीप्रभुतयः। भग० ३०६। जं० प्र० ३०। जीवा० २६।

**गुच्छगलइअंगुलिओ**–अङ्गुलिभिर्लातो-गृहीतो गोच्छको येन सोऽयमङ्गुलिलातगोच्छकः। उत्त० ५४०।

**गुच्छय**–गोच्छकं–पात्रकोपरिवर्त्युपकरणम्। उत्त० ५४०।

**गुच्छा**–वृन्ताक्यादयः। औप० ८। गुच्छाः–वृन्ताकीप्रभृतयः। प्रज्ञा० ३०। ज्ञाता० २८। पल्लवसमूहाः। ज्ञाता० २८।

**गुच्छिय**–सञ्जातगुच्छम्। भग० ३७।

**गुज्झ**–गुह्यं–रहस्यम्। विपा० ४०। लज्जनीयव्यवहार-



Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

गोपितम् । ज्ञाता० १२ । गुह्यं गोपनीयत्वात्, अब्रह्मणस्य चतुर्विंशतितमं नाम । प्रश्न० ६६ । गुह्यः–बहिर्जनाप्रकाशनीयः । राज० ११६ । गुह्यं–लज्जनीयव्यवहारगोपनम् । भग० ७३६ ।

**गुज्झक्खिणी**–स्वामिनी । बृ० तृ० १७१ आ ।

**गुज्झगं**–गुह्यकम् । ओघ० १६० ।

**गुज्झगा**–गुह्यकः भवनवासिनः । दश० २४६ ।

**गुज्झगो**–गुह्यकः–देवः । आव० ६३४ । देवविशेषः । पिण्ड १३१ । वैमानिकः । आव० ८१३ ।

**गुज्झदेसो**–गुह्यदेशः । जीवा० २७० ।

**गुज्झाणुचरिअ**–गुह्यानुचरितं सुरसेवितमित्यर्थः । दश० २२३ ।

**गुट्ठ**–स्तम्बः । उपा० २२ ।

**गुट्ठी**–गोष्ठी–दत्तवासुदेवनिदानकारणम् । आव० १६३ टी ।

**गुडधाना**– । ठाणा० ११८ । सूर्य० २९३ ।

**गुडपर्पटिका**– । सूर्य० २९३ ।

**गुडसत्थं**–गुडशस्त्रं–नगरविशेषः । आव० ४११ ।

**गुडा**–तनुत्राणविशेषः । प्रश्न० ४७ । महाँस्तनुत्राणविशेषः । विपा० ४६ ।

**गुडिया**– । नि० चू० प्र० ३ आ ।

**गुडेणं**– । नि० चू० प्र० ३४८ आ ।

**गुण**–गुण्यते–भिद्यते विशेष्यतेऽनेन द्रव्यमिति गुणः । आचा० ९९ । आत्मा वा शब्दाद्युपयोगानन्यत्वाद् गुणः । आचा० ९९ । रसना । आचा० ३६३ । स्वभावः–यथोपयोगस्वभावः । सम० ११२ । गुणशब्दोंऽशपर्यायः । अनु० १११ । ज्ञानादिः रूपादिश्च । अनु० १०५ । ज्ञानम् । उत्त० ७० । आचा० ८० । अनु० २६९ । प्रशस्तता । ज्ञाता० १२ । कटिसूत्रम् । ज्ञाता० ३५ । कान्तिलक्षणः । ज्ञाता० ३५ । क्षान्त्यादिः । आव० ४९ । विविधार्थसंवादनलक्षणः । सम० १२४ । उत्तरगुणो भावनादिरूपः । प्रज्ञा० ३९९ । स्वाध्यायध्यानादिः । आव० २६५ । कडीसुत्तयं । नि० चू० प्र० २५४ आ । निरवद्यानुष्ठानरूपः । आचा० ३३ । सौभाग्यादिकः । भग० ११९ । गुणः–गुणव्रतम् । भग० १३६ । प्रियभाषित्वादिः । ज्ञाता० ४३ । सौन्दर्यादिः । ज्ञाता० २२० । संयमगुणः । भग० १३६ । कार्यं दाक्षिण्यादिः । भग० १४८ । दर्शनज्ञाने । विशे० २ । निर्जराविशेषः । ज्ञाता० ७३ । गुणः–शब्दादिकः । आचा० ६२ । गुणः–ज्ञानादिः । सूर्य० ५ । अनन्तगमपर्यायवत्त्वमुच्चारणं वा । सूत्र० ७ । मूलोत्तरगुणभूतः । सूत्र० ४०० । उपकारः । प्रश्न० ३६ । गुणव्रतम् । औप० ८२ । सहवर्त्ती । औप० ११७ । पर्यायः विशेषः धर्मश्च । प्रज्ञा० १७९ । रक्तसूत्ररूपः । जीवा० २०५ । क्षान्त्यादिः । जीवा० २७४ । सुरूपादिः । आव० ५८५ । प्रशस्तत्वम् । प्रश्न० ७४ । वर्णादिः सहभावी धर्म्म एव । प्रश्न० ११७ । ऐहिकामुष्मिकोपकाराः । प्रश्न० १२३ । निर्विभागो भागः । जं० प्र० १२९ । धर्म्मः । ठाणा० ३३४ । गुणाः–संयमगुणाः । निरय० २ । गुण्यन्ते संख्यायन्त इति गुणाः–पिण्डविशुद्ध्याद्युत्तरगुणरूपाः । विशे० २ । गुणाः–रूपादयः । उत्त० ५५७ । गुणं–गुणव्रतम् । भग० ३२३ ।

**गुणओ**–गुणतः–कार्यतः–कार्यमाश्रित्येत्यर्थः । ठाणा० ३३३ ।

**गुणकरणं**–गुणानां करणं गुणकरणं, गुणानां कृतिः । आव० ४६६ । तपकरणं–अनशनादि संयमकरणं च पश्चाश्रवविरमणादि गुणकरणमुच्यते । उत्त० २०५ ।

**गुणकरो**–गुणकरः–गुणाः–ज्ञानादयस्तत्करणशीलः, भावकरविशेषः । आव० ४९९ ।

**गुणकल्पना**– । आचा० ५५ ।

**गुणकारोत्ति**–गुणकारस्तेन यत्सङ्ख्यानं तत्तथैवोच्यते । तच्च प्रत्युपन्नमिति लोकरूढम्, अथवा यावतः कुतोऽपि तावत एव गुणकराद्याहृच्छिकादित्यर्थः । ठाणा० ४९७ ।

**गुणचंद**–गुणचन्द्रः–चन्दावतंसकराज्ञः प्रियदर्शनाराज्यो ज्येष्ठः पुत्रः । आव० ३६६ । आधाकर्मानुमोदनायां श्रीनिलयनगरे राजा । पिण्ड० ४९ । आधाकर्मपरिभोगे शतमुखपरे श्रेष्ठी । पिण्ड० ७४ । गोचरविषयोपयुक्ततायां सागरदत्तश्रेष्ठिपुत्रः । पिण्ड० ७८ । उत्कृष्टमालापहृतविवरणे साधुः । पिण्ड० १०९ । मानपिण्डोदाहरणे क्षुल्लकः । पिण्ड० १३४ । प्रज्ञा० ४४१ ।

**गुणचूड**ः–गोचरविषयोपयुक्ततायां सागरदत्तश्रेष्ठीपुत्रः । पिण्ड० ७८ ।

**गुणट्ठीए**–गुणार्थी–रन्धनपचनप्रकाशातापनाद्यग्निगुणप्रयो-



Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

जनत्वात् । आचा० ५३ ।

**गुणतत्तिला**-गुणग्राहका । नंदी० ६४ ।

**गुणदेशः**-गुणोद्देशा । प्रश्न० १०२ ।

**गुणना**-परावर्तना । बृ० प्र० २३३ अ ।

**गुणनिकाकाले**- । ठाणा० २५७ ।

**गुणनिप्फन्नं**-गुणनिष्पन्नम् । ज्ञाता० ४१ ।

**गुणनी**- । नंदी० १६६ ।

**गुणभावणा**-गुणभावना । आव० ४८४ ।

**गुणभूई**-गुणभूतिः-अचिन्त्या गुणसम्पत् । आव० २३७ ।

**गुणभूतत्वम्**- । दश० ५७ ।

**गुणमह्**-गुणैर्महान्-उपशमकः । आव० ८३ ।

**गुणमित्रः**-आधाकर्मण अभोज्यतायां उग्रतेजसः पुत्रः । पिण्ड० ७१ ।

**गुणयारो**-गुणकारः । सूर्य० ११४ ।

**गुणरयणं**-गुणरत्नं तपःकर्मः । अनु० १ । गुणरत्नसंवत्सराभिधस्तपोविशेषः, तपोविशेषः । अन्त० ३, १८ ।

**गुणरयणचच्चिका**-गुणरत्नचाकचिक्याः-गुणरत्नमण्डिताः । चउ० ।

**गुणरयणसंवच्छरं**-गुणानां-निर्जराविशेषाणां रचनं-करणं संवत्सरेण सत्रिभागवर्षेण यस्मिंस्तपसि तद् गुण-रचनसंवत्सरम्, गुणा एव वा रत्नानि यत्र स तथा गुणरत्नः संवत्सरो यत्र तद् गुणरत्नसंवत्सरं तपः । भग० १२५ । ज्ञाता० ७३ ।

**गुणवंतो**-गुणवन्तः-पिण्डविशुद्ध्याद्युत्तरगुणोपेताः । आचा० ३५० ।

**गुणवती**-गुणचन्द्रस्य राज्ञी । पिण्ड० ४६ ।

**गुणविरियं**-जं ओसहीण तित्तकडुयकसायअंबिलमहुर-गुणताए रोगावणयणसामत्थं एतं गुणविरियं । नि० चू० प्र० १६ अ ।

**गुणव्वत**-गुणव्रतः-दिग्व्रतोपभोगपरिभोगव्रतलक्षणः । ठाणा० २३६ ।

**गुणशतकलितः**-प्रश्रयादिगुणोपेतः सूरिः । आचा० ३ ।

**गुणशेखरः**-गोचरविषयोपयुक्ततायां सागरदत्तश्रेष्ठिपुत्रः । पिण्ड० ७८ ।

**गुणश्रेणिः**- । प्रज्ञा० ६०८ ।

**गुणश्रेणिरचना**- । भग० १८ ।

**गुणसंकर**-गुणसमुदायरूपः । ज्ञाता० १६८ ।

**गुणसङ्क्रमः**- । उत्त० ५८० ।

**गुणसमिय**-गुणयुक्तोऽप्रमत्ततया यतिः गुणसमितः । आचा० २१७ ।

**गुणसमृद्धं**-महाबलराजधानी । पिण्ड० ४७ ।

**गुणसागरः**-गोचरविषयोपयुक्ततायां गुणचन्द्रपुत्रः । पिण्ड० ७८ ।

**गुणसिद्धी**-गुणसिद्धिः--अन्वर्थसम्बन्धः । दश० ७१ ।

**गुणसिलं**-गुणशिलं राजगृहे चैत्यविशेषः । उत्त० १५८ । उपा० ४८ । विपा० ८६ । गुणशिलं राजगृहनगरे चैत्यम् । भग० ६, ३२३, ३७६, ५०२, ७३६, ७५० । ज्ञाता० ३६ । आव० ३२५ । अनुत्त० १७७ । अन्त० १८ । गुणशिलः--वर्धमानस्यामिनः समवसरणस्थानम् । उद्यानविशेषः । व्य० प्र० १७४ अ ।

**गुणसिलयं**-राजगृहे चैत्यम् । आव० ३१४ ।

**गुणसिला**-गुणशिला-स्कन्दकचरित्ते राजगृहनगरे चैत्यम् । भग० ११२ ।

**गुणसेढीयं**-गुणश्रेणी--क्षपणोपक्रमविशेषरूपा । सामान्यतः किल कर्मबह्वल्पमल्पतरमल्पतमं चेत्येवं निर्जरणाय रचयति, यदा तु परिणामविशेषात् तत्र तथैव रचिते कालन्तर-वेद्यमल्पं बहू बहुतरं बहुतमं चेत्येवं निर्जरणाय तदा सा गुणश्रेणीत्युच्यते । औप० ११३ ।

**गुणसेन**-गोचरविषयोपयुक्ततायां सागरदत्तश्रेष्ठिपुत्रः । पिण्ड० ७८ ।

**गुणस्थानक**- । ठाणा० ५३ ।

**गुणा**-सौभाग्यादयः, अथवा लक्षणव्यञ्जनयोर्ये गुणाः । ठाणा० ४६१ । चारित्रविशेषरूपाः । सम० ४६ । शेषमूलगुणाः उत्तरगुणाश्च । सम० १२७ । ज्ञानादयः । सम० १२४ । प्रभावाः । सम० १२५ । साधनभूता उपकारकाः । उत्त० ४१६ । पिण्डविशुद्ध्यादयः । उत्त० ५६७ । विपा० ४५ । सन्तः मुनयः पदार्था वा । आव० ७६० । रसादिकाः संयमगुणा वा । आव० ८५० । कार्याणि । प्रश्न० ७४ । शुक्लादयः । विशे ३५६ । गुणव्रतानि । सम० १२० । भग० ३६८ । महर्द्धिप्राप्त्यादयः शक्रत्वा-



Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

दिदर्शनात् । सम० १५७ । । पर्यवाः धर्म्माः विशेषा वा । भग० ८८९ । गुणाः-करुणादयः । औप० ३३ । क्षान्त्यादयः । जं० प्र० ११३ । गुणाः-सप्तविंशतिरनगारगुणाः । प्रश्न० १४५ । गुणास्तु पुद्गलानुवर्त्तिनः पर्यायाः । विशे० ३६२ ।

**गुणागुणे**-ऋजुता । आचा० ८६ ।

**गुणाणं विराहणा**-गुणानां विराधना हिंस्यप्राणिगतगुणानां हिंसकजीवचारित्रगुणानां वा विराधना-खण्डना । प्रश्न०६।

**गुणालयं**-गोचरविषयोपयुक्ततायां सागरदत्तस्य वास्तव्यपुरम् । पिण्ड० ७८ ।

**गुणिता**-अधीता । ओघ० ५३ ।

**गुणत्तर**-भवस्थकेवलिसुहं । नि० चू० तृ० २४ आ ।

**गुणत्तरतरं**-मोक्खसुहं । नि० चू० तृ० २४ आ ।

**गुणत्तरधरो**-गुणेषूत्तराः-प्रधाना गुणोत्तराः ज्ञानादयस्तान् धारयतीति गुणोत्तरधरः । उत्त० ३५७ ।

**गुणुद्देसो**-गुणोद्देशः-गुणदेशः । प्रश्न० १०२ ।

**गुण्यते**-भिद्यते । आचा० ९९ ।

**गुत्त**-गुप्तं-युक्तम् । प्रश्न० १३४ । वृत्त्या फलहकेन वा वृत्तम् । बृ० द्वि० १८१ आ । गुप्तः-अभेदवृत्तिः । भग० १९४ । प्राकाराद्यावृता । भग० ३१३ । न स्वामिभेदकारिणः । पराप्रवेश्या । जीवा० २६० । गुप्तिभिः-वसत्यादिभिः । जं० प्र० १४८ । तिसृभिर्गुप्तिभिर्गुप्तः । सूत्र० २९८ । संमूढः । ओघ० ११९ । प्रविष्टः । नि० चू० प्र० १७२ आ । गां त्रायत इति गोत्रं-साधुत्वम् । सूत्र० ४१३ । प्राकारवेष्टितत्वाद् गुप्तम् । ठाणा० ३१२ । गोत्रं-कुलम्, नामानि । ठाणा० २९४ ।

**गुत्तदुवारा**-गुप्तद्वारा-कपाटादियुक्तद्वारा । भग० ३१३ ।

**गुत्तदुवारे**-द्वाराणां स्थगितत्वाद् गुप्तद्वारम् । ठाणा० ३१२ ।

**गुत्तपालिय**-गुप्तपालिकाः-तदन्यतो व्यावृत्तमनोवृत्तिका मण्डलिकाः । भग० १९४ । गुप्ता-पराप्रवेश्या पालिः-सेतुर्यस्य सः । जीवा० २६० ।

**गुत्तबंभचारी** वसत्यादिनवब्रह्मचर्यगुप्तियोगात् । ज्ञाता० १०३ ।

**गुत्ता**-गुप्ता-पराप्रवेश्या । राज० ११३ । वृत्त्या कुड्येन वा परिक्षिप्ता । बृ० प्र० ३१० अ ।

**गुत्तागुत्तिंदिय**-गुप्तागुप्तेन्द्रियः-गुप्तानि शब्दादिषु रागादिनिरोधाद् अगुप्तानि च आगमश्रवणेर्यासमित्यादिष्वनिरोधादिन्द्रियाणि येषां ते । औप० ३५ ।

**गुत्तिंदिय**-गुप्तेन्द्रियः शब्दादिषु रागादिरहितः इत्यर्थः । औप० ३५ ।

**गुत्ति**-रक्षा । बृ० द्वि० १२९ आ । गोपनं गुप्तिः-सम्यग्योगनिग्रहः । प्रवचनविधिना मार्गव्यवस्थापनमुन्मार्गगमननिवारणं गुप्तिः । उत्त० ५१४ ।

**गुत्तिसेण**-गुप्तिसेनः । सम० १५३ ।

**गुत्ती**-गुप्तिः-प्रविचाराप्रविचाररूपा । आव० ५७२ । सूत्र० २४४ । मनोगुप्त्यादिः वसत्यादिर्वा । प्रश्न० १३४ । अशुभानां मनःप्रभृतीनां निरोधः, अहिंसायास्त्रिचत्वारिंशत्तमं नाम । प्रश्न० ९९ ।

**गुत्तीओ**-गुप्तयः मनोवाक्कायलक्षणा अनवद्यप्रविचाराप्रविचाररूपाः । प्रश्न० १४२ ।

**गुत्तीतो**-गुप्तयः-रक्षाप्रकाराः । ठाणा० ४४५ । गोपनानि गुप्तयः-मनःप्रभृतीनामशुभप्रवृत्तिनिरोधनानि शुभप्रवृत्तिकरणानि चेति । सम० ९ । गोपनं गुप्तिः-मनःप्रभृतीनां कुशलानां प्रवर्तनमकुशलानां च निवर्त्तनमिति । ठाणा० ११२ ।

**गर्द**-अपानम् । नंदी० १५२ ।

**गुपिलं**-गहनम् । नंदी० ४२ ।

**गुप्ति**-विधानतो ज्ञात्वाऽभ्युपेत्य सम्यग्दर्शनपूर्वकं त्रिविधस्य योगस्य निग्रहः । तत्त्वा० ९-४ ।

**गुप्फ**-गुल्फः-घुटिकः । जं० प्र० ११० ।

**गुब्भंग**-मृगीपदम् । नि० चू० प्र० २११ अ ।

**गुम्मं**-गुल्मं-वृन्दमात्रम् । औप० ५९ । वंशजालिप्रभृतिः । ज्ञाता० ३६ । समूहः-समुदायः । बृ० द्वि० २९० अ । गुच्छैकदेशः-उपाध्यायाधिष्ठितः । औप० ४५ । गुल्मः-नवमालिकाप्रभृतिः । भग० ३०६ । प्रज्ञा० ३० । जीवा० २६ । गुल्मः-नवमालिकादिः । औप० ८ । जीवा० १८८ । जं० प्र० ३० । लतासमूहः । विशे० ९०४ ।

**गुम्मइअ**-गुल्मितं-घूर्णितचेतनम् । बृ० प्र० २३१ आ ।



Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

गुल्मयितं-मूढम् । औप० ६४ ।
**गुम्मा-**गुल्मा नाम ह्रस्वस्कन्धबहुकाण्डपत्रपुष्पफलोपेताः । जं० प्र० ६८ । गुल्मा-पुष्करिणी नाम । जं० प्र० ३६० ।
**गुम्मिय-**गुल्मेन-समुदायेन चरन्तीति गौल्मिकाः । व्य० प्र० १३५ अ । गुल्मं-स्थानं तद्रक्षपाला गुल्मिकाः । ओघ० ८० । स्थानकरक्षपालाः । ओघ० ८२ ।
**गुम्मी-**शतपदी त्रीन्द्रियजन्तुविशेषः । उत्त० ६९६ ।
**गुमुगुमती-**गुमगुमायमाना । आव० ५१४ ।
**गुरु-**स्वप्रयोजननिष्ठः । उत्त० ६३१ । पूज्यास्तीर्थकृद्गण-भृदादयः । उत्त० २३१ । यथावच्छास्त्राभिधायकाः । उत्त० ६२२ । अधोगमनहेतुः । ठाणा० २६ । स्पर्शस्य चतुर्थो भेदः । ४७३ । गुरूणां-मात्रादिकानां । जं० प्र० १६९ । गुणाति शास्त्रार्थमिति गुरुः-धर्मोपदेशदाता । आव० ११९ । धर्मोपदेशकः । ज्ञाता० १२३ । पिता-महादिलक्षणः । आव० ५१६ । आचार्यः । दश० ४५ । सारोपेतम् । दश० २६३ । तीर्थकरादिः । पिण्ड० ११४ । गृणन्ति तत्त्वमिति गुरवः-तीर्थकरगणधरादयः । विशे० ३ । मातापितृधर्म्माचार्याः । ठाणा० ३९९ । गौर-वार्हः । उत्त० ४४ । वैद्यः । बृ० द्वि० १४१ अ । गुरुः-धर्माचार्यः । उत्त० १५२ । आचार्यः । बृ० तृ० ९५ अ । धर्मज्ञो धर्मकर्त्ता च सदा धर्मप्रवर्त्तकः । सत्त्वे-भ्यो धर्मशास्त्रार्थदेशको गुरुरुच्यते । प्रज्ञा० १९३ । आय-रियो । नि० चू० द्वि० १६४ अ । दीक्षाद्याचार्यः । भग० ७२७ । चैत्यसाधुः । उपा० १३ ।
**गुरुअब्भुट्ठाणं-**गुर्वभ्युत्थानम् । आव० ८५३ ।
**गुरुअमुई-**गुर्वमोची-निष्ठुरं निर्भर्त्सितोऽपि गुरुणाममोचन-शीलः । बृ० प्र० १२१ आ ।
**गुरुई-**गुर्वी-गुरुका । ज्ञाता० १५९ ।
**गुरुए-**गुरुकः-भगवत्याः प्रथमशतके गुरुकविषयो नवम उद्देशः । भग० ६ ।
**गुरुओ-**गुरुकर्मा । सूत्र० १९७ ।
**गुरुक-**गुरुकः-षण्मासः । व्य० प्र० ६ । ठाणा० १४५ । बृ० प्र० ४९ अ ।
**गुरुकुलं-**गुरोः कुलं गुरुकुलं-गुरुसान्निध्यम् । आचा० २०३ ।
**गुरुगतराग-**गुरुतरकः-चतुर्मासपरिमाणः । व्य० प्र० १८७ अ ।
**गुरुगती-**भावप्रधानत्वान्निर्देशस्य गोरवेण ऊर्ध्वाधस्ति-र्यग्गमनस्वभावेन या परमाण्वादीनां स्वभावतो गतिः सा गुरुगतिः । ठाणा० ४३४ ।
**गुरुगो-**गुरुको नाम व्यवहारो मासो मासपरिमाणः । व्य० प्र० १८७ अ ।
**गुरुजणं-**गुरुजनः-गुणस्थसुसाधुवर्गः । आव० ५१९ ।
**गुरुतप्पओ-**गुरुतल्पकः-दुर्विनीतः । प्रश्न० ३६ ।
**गुरुनिओगविणयरहिया-**गुरुषु मात्रादिषु नियोगेन-अव-श्यंतया यो विनयस्तेन रहिताः गुरुनियोगविनयरहिताः । भग० ३०८ ।
**गुरुनिग्गहो-**गुरुनिग्रहः । आव० ८११ ।
**गुरुपरिओसगए-**गुरुपरितोषगतः-गुरुपरितोषजातः । आव० २६९ ।
**गुरुपरिभासिय-**गुरून् परिभाषते विवदते गुरुपरिभाषिकः । उत्त० ४३४ ।
**गुरुपरिसंस्थापनम्-** । दश० २८४ ।
**गुरुपर्वक्रमलक्षणः** केवलश्रद्धानुसारिणः प्रति । प्रज्ञा० २ ।
**गुरुमहत्तरएहिं-**गुर्वोः-मातापित्रोर्महत्तराः-पूज्याः, अथवा गौरवार्हत्वेन गुरुवो महत्तराश्च वयसा वृद्धत्वाद्ये ते गुरुमहत्तराः । ठाणा० ४६३ ।
**गुरुयत्ता-**गुरुकता-विस्तीर्णता । भग० २१५ ।
**गुरुलहुपज्जव-**गुरुलघुद्रव्याणि-बादरस्कन्धद्रव्याणि-औदा-रिकवैक्रियाहारकतैजसरूपाणि तत्पर्यवाः । जं० प्र० १३० ।
**गुरुलहुफासपरिणामे-** । सम० ४१ ।
**गुरुवायणोवगयं-**गुरुप्रदत्तया वाचनया उपगतं-प्राप्तं गुरुवाचनोपगतं न तु कर्णाघाटकेन शिक्षितम् । अनु० १६ ।
**गुरुविषयं-**गुराविदं करणं गुरुकरणम् । आव० ४७१ ।
**गुरुसम्भारियत्ता-**गुरोः सम्भारिकस्य च भावो गुरु-सम्भारिकता गुरुता सम्भारिकता चेत्यर्थः । अतिप्रकर्षा-वस्था । भग० ४५६ ।
**गुरूणां-**आलोचनार्हाणामाचार्यादीनाम् । उत्त० २३३ ।
**गुर्जरः-**देशविशेषः । अनु० १३९ ।
**गुलं-**गुडम् । अनु० १५४ । गुल्मं-लतासमूहः । भग०



Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

३७ ।
**गुलइय**–गुल्मवान् । औप० ७ ।
**गुलकडं**– । नि० चू० प्र० १६६ आ ।
**गुलगुलाइअ**–गुलगुलावित रूपेण । जं० प्र० १४४ ।
**गुलदव**–गुलद्रवं नाम यस्यां कवल्लिकायां गुड उत्काल्यते तस्यां–यत्तप्तमतप्तं वा पानीयं तद्गुडोपलिप्तं द्रवं गुडद्रवम् । बृ० प्र० २५३ अ ।
**गुलपाणिय**–गुलो जीए कवल्लीए कड्ढिज्जति तत्थ जं पाणीयं कयं तत्तमतत्तं वा तं गुलपाणियं भण्णति । नि० चू० प्र० २०४ अ ।
**गुलया**–द्वीन्द्रियजन्तुविशेषः । प्रज्ञा० ४१ ।
**गुललावणिका**–गुडपर्पटिका । ठाणा० ११८ ।
**गुललावणिया**–गुडलावणिका–गुडपर्प्पटिका गुडधाना वा । सूर्य० २९३ । भग० ३२६ । प्रश्न० १६३ ।
**गुलवंजणी**–मोदती । नि० चू० तृ० ६४ अ ।
**गुलिका**–तुवरवृक्षचूर्णगुटिका । बृ० द्वि० १०० आ, १०२ अ । पिटकं बुसपुञ्जो वा पिण्डका वा । बृ० द्वि० ९४ आ ।
**गुलिगा**–लोलगा । नि० चू० द्वि० १४ आ ।
**गुलिय**–गुटिका । आव० २९६ ।
**गुलियविरेयणपीओ**–पीतविरेचनगुलिकः । उत्त० ३७९ ।
**गुलिया**–गुटिका–द्रव्यवटिकाः । विपा० ४१ । द्रव्यसंयोगनिष्पादितगोलिकाः । ज्ञाता० १८३ । आव० ६७६ । हरितालिकासारनिर्वर्त्तिता गुटिका । जं० प्र० ३४ । वक्कलाणि । बृ० द्वि० १०२ आ । गुटिका वटिका । उत्त० १४३ । मुखे प्रक्षेपकस्य स्वरूपपरावर्त्तादिकारिका गुटिका । पिण्ड० ९६ । गुलिकाः–पीठिकाः । मनोगुलिकापेक्षया प्रमाणतः क्षुल्लाः । जीवा० ३६३ । नीली । ज्ञाता० १०१ । पीठिकाः । जीवा० ३५९ । गुलिकाः–वर्णद्रव्यविशेषः । औप० ११ ।
**गुलियासहस्सं**–गुलिकासहस्रम् । जीवा० २३३ ।
**गुलुकः**–गुल्फः । जीवा० २७० ।
**गुलुम्मातितो**–सञ्ज्ञाभिलाषी । नि० चू० प्र० ३४८ आ ।
**गुलू**–गुरुः–आचार्यः । बृ० द्वि० २८३ अ ।
**गुल्फपादः**– । आचा० ३८९ ।
**गुल्मं**–स्थानम् । ओघ० ८? ।
**गुल्मः**–रोगविशेषः । बृ० प्र० १७० अ ।
**गुल्मकं**–लतासमूहः । जं० प्र० २५ ।
**गुल्मिका**–गोत्तिपालाः । ओघ० २२३ ।
**गुवंति**–गुप्यन्ति–व्याकुलीभवन्ति । भग० ६७० ।
**गुवल**–गुप्तः । नि० चू० द्वि० ४० आ ।
**गुविते**–गुप्येत–व्याकुलो भवेत् क्षुभेद् । ठाणा० १६२ ।
**गुविलं**–व्याप्तम् । महाप० ।
**गुविला**–गम्भीरा । बृ० तृ० २१ अ ।
**गुविलो**–गहणो । नि० चू० तृ० १४९ अ ।
**गुहा**–कन्दरा । भग० २३७ । प्रश्न० २० । सुरङ्गाः । जं० प्र० २०६ । लयनम् । उत्त० ४९३ । तिमिश्रागुहादयः । नंदी० २२८ । उष्ट्रिकाकृतिर्नरकविशेषः । सूत्र० १३० ।
**गुहालयन**– । आचा० २२६ ।
**गुह्यापवरकः**–मन्त्रगृहादि रहःस्थानम् । दश० १६६ ।
**गूढं**–मांसलत्वादनुद्धतम् । जीवा० २७० । अनुपलक्षम् । प्रश्न० ८० ।
**गूढगब्भा**–गूढगर्भा । आव० २१२ ।
**गूढदंत**–जंबुद्वीपे भरतक्षेत्रे आगामिष्यति उत्सर्पिण्यां तृतीयश्चक्रवर्त्ती । सम० १५४ । गूढदन्तः–अनुत्तरोपपातिकदशानां द्वितीयवर्गस्य चतुर्थमध्ययनम् । अनुत्त० २ । अन्तरद्वीपविशेषः । जीवा० १४४ ।
**गूढदंता**–गूढदन्तनामा अन्तरद्वीपविशेषः । प्रज्ञा० ५० ।
**गूढदंतदीवे**–अन्तरद्वीपविशेषः । ठाणा० २२६ ।
**गूढमुत्तोलि**–गूथगोणीं । तं० ।
**गूढसामत्थो**–गूढसामर्थ्यः । आव० ६४९ ।
**गूढसिरागं**–गूढशिराकं–अलक्ष्यमाणशिराविशेषम् । प्रज्ञा० ३७ ।
**गूढा**–गूढाः–बहिःसंवृत्तिमन्तः । उत्त० ५२६ ।
**गूढावत्ते**–गूढश्चासावावर्त्तश्चेति गूढावर्त्तः । ठाणा० २८८ ।
**गूथं**–वर्चः । ओघ० १२३ ।
**गूहग**–विष्ठा । तं० ।
**गूहणं**–किंचिकहणं । दश० चू० १२४ । सति बलपरक्कमे अकरणं गूहणं । नि० चू० प्र० १८ अ । गूहनं–किञ्चित्कथनम् । दश० २३३ ।



Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

**गूहे**-गूहयेत् । दश० २३२ ।
**गुंजनं**- । जं० प्र० २४४ ।
**गृहकोलिका**-गृहगोधिका । दश० २३० ।
**गृहजातः**-दासः । उत्त० २६५ ।
**गृहजामाता**-गृहस्थाता दुहितृपतिः । नंदी० १६२ ।
**गृहणैषणा**- । आचा० २८३ ।
**गृहपतिः**-माण्डलिको राजा । आव० १५६ । गृहस्थः । आचा० ३२१ ।
**गृहपतिरत्न**- । जं० प्र० २१६ ।
**गृहपत्यवग्रहः**-अवग्रहपञ्चके तृतीयो भेदः । आचा० १३४ । माण्डलिकावग्रहः । आव० १५६ ।
**गृहिव्यापारः**-गृहियोगः-प्रारम्भरूपः । दश० २३१ ।
**गृहशाला**- । उत्त० ६०५ ।
**गृहस्थो**-भिक्षां प्रयच्छन्ती गृहस्थी । ओघ० १६२ ।
**गृहस्थोपसम्पत्**-उपसम्पत्तौ प्रथमो भेदः । आव० २६७ । यत्पुनरवस्थाननिमित्तं गृहिणामनुज्ञापनं सा गृहस्थविषया । बृ० प्र० २२२ अ ।
**गृहाचारः**-गार्हस्थ्यं-आगारधर्मः । उत्त० ५७८ ।
**गृहीतव्यः**-निश्रेतव्यः । व्य० प्र० २०५ अ ।
**गृहे**-गृहलिंगे । व्य० द्वि० २७ आ ।
**गेंदुए**-गेन्दुकः-पुष्पलम्बूसकः । जं० प्र० २७५ ।
**गेंदुकदवरकः**- । ठाणा० २८६ ।
**गेंदुग**- । नि० चू० द्वि० ७१ आ ।
**गेज्जं**-गद्यं-यत्र स्वरसञ्चारेण गद्यं गीयते । जं० प्र० ३६ ।
**गेण्हितुं**-गृहीत्वा । आव० ८२७ ।
**गेद्धावरंखी**-भोयणकाले परिवेसणाए इतो बाहित्ति भणितो ताहे गेद्धो इव रिखंतो भायणं उड्डेति । नि० चू० द्वि १०१ अ ।
**गेधो**-सदोसुवलद्धेवि अविरमो गेधी । नि० चू० द्वि० ७१ आ ।
**गेयं**-गन्धर्व्यो रीत्या बद्धं गानयोग्यम् । जं० प्र० २५६ । गोयत इति गेयं—तंतिसमं तालसमं वण्णसमं गहसमं लयसमं च कव्वं । तु होइ गेयं पंचविहं गीयसन्नाए । दश० ८७ । ठाणा० ३६७ ।
**गेरुअ**-गैरिका-धातुः । दश० १७० ।
**गेरुआ**-परिवायया । नि० चू० द्वि० ६८ अ ।
**गेरुक**-मृत्तिकाभेदः । आचा० ३४२ ।
**गेरुय**-गौरिकः-मणिविशेषः । प्रज्ञा० २७ । गेरुअः-मणिभेदः । उत्त० ६८६ ।
**गेलन्न**-ग्लानत्वम् । ओघ० ८६ । ग्लान्यं-ग्लानत्वम् । ठाणा० ३१३ ।
**गेल्लि**-हस्तिन उपरि कोल्लररूपा या मानुषं गिलतीव । भग० १८७ ।
**गेविज्जं**-ग्रैवेयकं-ग्रीवा बन्धनम् । प्रश्न० १६ । ग्रैवेयं ग्रीवाभरणविशेषः । जं० प्र० १०५ । ग्रीवात्राणं ग्रीवाभरणं वा । जं० प्र० २१६ । ग्रैवेयकं-कण्ठलम् । औप० ५५ । ग्रैवेयं-ग्रीवाभरणम् । जीवा० २५६ ।
**गेविज्जगा**-ग्रैवेयकाः । प्रज्ञा० ६६ ।
**गेविज्जन**-लोकपुरुषस्य ग्रीवास्थाने भवानि ग्रैवेयकानि । ठाणा० १७६ ।
**गेविज्जा**-ग्रैवेया-देवावासास्तन्निवासिनो देवा अपि । उत्त० ७०२ ।
**गेवेज्ज**-ग्रैवेयकं-ग्रीवाभरणम् । भग० १६३ । लोकपुरुषस्य ग्रीवाविभागे भवानि विमानानि । अनु० ६२ ।
**गेहं**-गृहम् । उत्त० ३२० ।
**गेहसंठिया**-गेहस्येव वास्तुविद्योपनिबद्धस्य गृहस्यैव संस्थितं संस्थानं यस्याः सा गेहसंस्थिता । सूर्य० ६६, ७० ।
**गेहागारा**-गेहाकाराः भवनत्वेनोपकारिणः । सम० १८ । गेहाकारा-नामद्रुमगणाः । जं० प्र० १०६ । ठाणा० ५१७ ।
**गेहागारो**-गेहाकारः द्रुमविशेषः । जीवा० २६६ । गृहाकारः-षष्ठः कल्पवृक्षः । आव० १११ ।
**गेहावणसंठिय**-गृहयुक्त आपणो गृहापणो-वास्तुविद्याप्रसिद्धस्तस्येव संस्थितं-संस्थानं यस्या सा गृहापणसंस्थिता सूर्य० ६६ ।
**गेहावणाइ**-गेहेषु आयतनानि आपतनानि वा उपभोगार्थमागमनानि । जं० प्र० ११६ ।
**गेहावणो**-गृहयुक्त आपणो वास्तुविद्याप्रसिद्धः गृहापणः सूर्य० ६६ ।
**गेहि**-गृद्धिः-अप्राप्तार्थाकाङ्क्षा । प्रश्न० ६७ । अप्राप्तस्य



Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

प्राप्तिर्वाञ्छा । प्रश्न० ४४ । विषयाभिकाङ्क्षा । उत्त० २६४ ।

**गेहिए**–गेहकः–भर्त्ता । उत्त० १३७ ।

**गेही**–गृद्धिः–प्राप्तार्थेष्वासक्तिः । भग० ५७३ ।

**गैरिकः**– । जीवा० २३ ।

**गोंड**–म्लेच्छविशेषः । प्रज्ञा० ५५ ।

**गोंफा**–गुल्फौ–घुण्टकौ । प्रश्न० ८० ।

**गो**–पुरित्थगतो लोगं तं गच्छतीति । दश० चू० १०३ । गोशब्देन गावोबलिवर्दाः । बृ० प्र० १५७ आ । गो–गाविओ । नि० चू० द्वि० १३७ अ ।

**गोअ**–गोत्रं–गुणनिष्पन्नाभिधानम् । औप० ५७ ।

**गोअम**–विचित्रपादपतनादिशिक्षाकलापयुक्तवराटकमालिकादिचर्चितवृषभकोपायतः कणभिक्षाग्राहिणो गोतमाः । अनु० २५ । गौतमः । आचा० ३५६ । गौतमः–आगम प्रसिद्धो गणधरविशेषः । आव० ४१३ ।

**गोअरे**–सामायिकत्वाद् गोरिव चरणं गोचरः । दश० १८ ।

**गोउरं**–गोभिः पूर्यत इति गोपुरं–पुरद्वारम् । जीवा० २७९ । प्रतोली कपाटो वा, पुरद्वारम् । प्रश्न० ८ । गोपुरं–नगरप्रतोली पुरद्वारम् । भग० २३८ ।

**गोउलं**–घोसं । नि० चू० द्वि० ७० आ ।

**गोकण्णो**–गोकर्णः–अन्तरद्वीपविशेषः । जीवा० १४४ । द्विखुरचतुष्पदविशेषः । प्रश्न० ७ । जीवा० ३८ ।

**गोकन्न**–द्विखुरचतुष्पदविशेषः । प्रज्ञा० ४५ ।

**गोकन्नदीवे**–अन्तरद्वीपविशेषः । ठाणा० २२६ । गोकर्णनामान्तरद्वीपः । प्रज्ञा० ५० ।

**गोकर्ण**–मृगभेदः । शृङ्गवर्णादिविशेषः । जं० प्र० १२४ ।

**गोकलिंज**–डल्ला । जं० प्र० ५८ । गोकलिञ्जं नाम यत्र गोभक्तं प्रक्षिप्यते । राज० १४१ । गवां चरणार्थं यद्वंशदलमयं महद्भाजनं तद्गोकलिञ्जं डल्लेति । उपा० २० ।

**गोकिलिञ्जरं**– । जीवा० २१३ ।

**गोकुलं**–परग्रामदूतीत्वदोषविवरणे ग्रामविशेषः । पिण्ड० १२७ ।

**गोक्षुरकं**–त्रिकण्टकम् । ओघ० १२४ ।

**गोखीरफेणो**–गोक्षीरफेनः । जीवा० २७२ ।

**गोग्गहणे**– । ज्ञाता० २२६ ।

**गोघायको**–गोघातकः । आव० ३९१ ।

**गोचरः**–विषयः । आव० ५८९ ।

**गोच्छं**–भाजनवस्त्रविशेषः, वक्ष्यमाणलक्षणं प्रमार्जयति । ओघ० ११७ ।

**गोच्छओ**–गोच्छकः–पात्रवस्त्रप्रमार्जनहेतुः कम्बलशकलरूपः । प्रश्न० १५६ । कंबलमयो बद्धपात्रोपरि । बृ० द्वि० २३७ अ ।

**गोच्छकः**–यः पात्रकस्योपरि दीयते सः । ओघ० १९९ ।

**गोच्छिया**–जातगुच्छाः । ज्ञाता० ५ ।

**गोजलोया**–द्वीन्द्रियजन्तुविशेषः । प्रज्ञा० ४१ । जीवा० ३१ ।

**गोजिब्भा**–गोजिव्हा । प्रज्ञा० ३६७ ।

**गोजूंति**–गोचरं । नि० चू० द्वि० १४४ अ ।

**गोज्ज**–नर्त्तकः । दश० ४९ ।

**गोज्झपेक्खिया**–नृत्यविशेषप्रेक्षिका । आव० ९२ ।

**गोट्ठं**–गोष्ठं–गोकुलम् । आव० ७१९ ।

**गोट्ठामाहिल**–गोष्ठमाहिलः यः स्पृष्टाबद्धप्ररूपकः । उत्त० १५३ । सप्तमो निण्हवः । विशे० १००२ । विनयकरणभीरुः कुशिष्यः । विशे० ६१४ । अर्थाज्ञाविराधनायां दृष्टान्तः । नंदी० २४८ । गोष्ठामाहिलः यस्माद बद्धिका उत्पन्नाः स आचार्यः । आव० ३१२ । गोष्ठमाहिलः–गच्छप्रधानः श्रावकः । आव० ३०८ । नि० चू० प्र० ३३५ आ ।

**गोट्ठि**–समवयसां समुदायो गोष्ठी । दश० २२ । जनसमुदायविशेषः । ज्ञाता० २०६ ।

**गोठ**–गोष्ठः–गोष्ठामाहिलः–अभिनिवेशे दृष्टान्तः । व्य० द्वि० १७९ अ ।

**गोट्ठिदासी**–गोष्ठादासी । आव० २०१ ।

**गोट्ठिधम्मो**–गोष्ठीधर्मः–गोष्ठीव्यवस्था । दश० २२ ।

**गोट्ठिलए**–गोष्ठीकः । आव० ९२ । विपा० ५५ ।

**गोट्ठी**–गोष्ठी–जनसमुदायः । ज्ञाता० २०६ । आव० ८२२, ८२४ । उत्त० ११२ । महत्तरादिपुरुषपञ्चकपरिगृहीता । बृ० द्वि० २०० अ ।

**गोडंडेणालिया**– । नि० चू० प्र० ४६ आ ।



Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

**गोड**–गोडः–चिलातदेशनिवासीम्लेच्छविशेषः । प्रश्न० १४ ।

**गोडु**–मौल्यं–गौल्यरसोपेतं मधुररसोपेतमितियावत् । भग० ७४८ ।

**गोण**–बलीवर्दः । बृ० प्र० २४७ आ । ओघ० ६७ । आव० २२६ । गौणं–गुणनिष्पन्नम् । प्रश्न० ६ । गोणाः–गावः । जं० प्र० १२४ । प्रश्न० ७ । गोणः–गौः । प्रज्ञा० २५२ । गौः । ओघ० २०१ । नि० चू० प्र० २ अ । गवः । आव० १६०, ८२६ ।

**गोणपोतलओ**–गोपेतः । आव० १६८ ।

**गोणपोयए**–गोणपोतकौ–गोपुत्रकौ । उपा० ४६ ।

**गोणलक्खण**– । ज्ञाता० ३८ ।

**गोणसं**–गोनसं–सर्प्पजातिविशेषम् । व्य० प्र० २३ अ ।

**गोणस**–गोणसः–निष्फणाहिविशेषः । प्रश्न० ७ ।

**गोणसखइयं**–गोनसभक्षितम् । आव० ७६४ ।

**गोणसहा**–गोधरेकः । उत्त० ६६६ ।

**गोणसा**–मुकुली–अहिभेदविशेषः । प्रज्ञा० ४६ ।

**गोणा**–बलीवर्दाः । उत्त० ५४८ । गोणा–द्विखुरचतुष्पदविशेषः । जीवा० ३८ । प्रज्ञा० ४५ । गावः । प्रश्न० ३८ ।

**गोणाई**–गवादीनि । ओघ० १४२ ।

**गोणादिचमढणा**–बलीवर्दादिपादप्रहारादिः । ओघ० ८१ ।

**गोणी**–गौः । विशे० ६१८ । आव० ६६ ।

**गोण्णं**–गुणादागतं गौणं, व्युत्पत्तिनिमित्तं द्रव्यादिरूपं गुणमधिकृत्य यद्वस्तुनि प्रवृत्तं नाम तद् गौणनाम । पिण्ड० ४ । गुणनिष्पन्नम् । बृ० तृ० २४८ अ ।

**गोण्णनाम**–गुणैर्निष्पन्नं गौणं तच्च तन्नामं च गौणनाम । आचा० १६६ ।

**गोतम**–भक्तिकर्तव्यतायां दृष्टान्तः । व्य० द्वि० १७२ आ ।

**गोतमगोत्ते**–गौतमगोत्रम् । सूर्य० १५० ।

**गोतमा**–गोतमस्यापत्यानि गौतमाः क्षत्रियादयः । ठाणा० ३६० । गौतमः–प्रथमो गणधरः । अनुत्त० ३ । ज्ञाता० ११४ । लघुतराक्षमालार्चितविचित्रपादपतनादिशिक्षाकलापवद्वृषभकोपायतः कणभिक्षग्राही । ज्ञाता० १६५ ।

**गोतित्थं**–गोतीर्थं–तडागादिष्विव प्रवेशमार्गरूपो नीचो नीचतरो भूदेशः । जीवा० ३०८ । क्रमेण नीचो नीचतरः प्रवेशमार्गः । जीवा० ३२३ । प्रज्ञा० ४१३ । गवांतीर्थं–तडागादाववतारमार्गो गोतीर्थं, ततो गोतीर्थमिव गोतीर्थं–अवतारवतीभूमिः । ठाणा० ४८० ।

**गोतित्थसंठाणसंठिए**–गोतीर्थसंस्थानसंस्थितः–क्रमेण नीचैर्नीचैस्तरमुद्वेधस्य भावात् । जीवा० ३२५ ।

**गोतिपाला**–गुल्मिकाः । ओघ० २२३ ।

**गोत्त**–गूयते–शब्द्यते उच्चावचैः शब्दैर्यत् तद् गोत्रं–उच्चनीचकुलोत्पत्तिलक्षणः पर्यायविशेषः, तद्विपाकवेद्यं कर्मापि गोत्रम्; यद्वा कर्मणोऽपादानविवक्षा गूयते शब्द्यते उच्चावचैः शब्दैरात्मा यस्मात् कर्म्मणः उदयाद् गोत्रम् । प्रज्ञा० ४५४ । प्रकाशकाद्यपुरुषाभिधानस्तदपत्यसन्तानो गोत्रम् । जं० प्र० ५०० । सञ्ज्ञा । आव० २७६ । अभिधानम्, कर्मविशेषः । ठाणा० ४५५ । गां–वाचं त्रायते–अर्थाविसंवादनतः पालयतीति, समस्तागमाधारभूतः । सूत्र० २३५ । गोत्रशब्दो नामपर्यायः । उत्त० १८१ । गौतमगोत्रादि । ज्ञाता० २२० । प्रकाशकाद्यपुरुषाभिधानतस्तदपत्यसंतानो गोत्रम् । सूर्य० १५० । गोत्रं–संज्ञा । विशे० ८७४ ।

**गोत्ता**–इतराणि त्वितराणि नामानि । ठाणा० ३८६ । तथाविधैकैकपुरुषप्रभवा मनुष्यसन्तानाः उत्तरगोत्रापेक्षया । ठाणा० ३६० ।

**गोत्तासए**–गोत्रासकः–हस्तिनापुरे भीमकूटग्राहिदारकः । विपा० ५० ।

**गोत्थुभ**–गोस्तुभः–लवणसमुद्रमध्ये पूर्वस्यां दिशि नागराजावासपर्वतः । भग० १४४ ।

**गोथुभत्ति**–कौस्तुभाभिधानो यो मणिविशेषः । सम० १५८ ।

**गोथूभा**–गोस्तूपा–दक्षिणपश्चिमरतिकरपर्वतस्यापरस्यांशक्रदेवेन्द्रस्य नवमिकाऽग्रमहिष्या राजधानी । ठाणा० २३१ । जीवा० ३६५ । पूर्वदिग्भाव्यञ्जनपर्वतस्य अपरस्यां दिशि पुष्करिणीविशेषः । जीवा० ३६४ । पाश्चात्याञ्जनपर्वतस्य पाश्चात्यायां पुष्करिणीविशेषः । ठाणा० २३० ।

**गोथूभे**–गोस्तुभः–प्राच्यां लवणसमुद्रमध्यवर्त्तिनो वेलन्धरनागराजनिवासभूतपर्वतस्य पौरस्त्याच्चरमान्तादपसृत्य वडवामुखस्य महापातालकलशस्य पाश्चात्यश्चरमान्तो येन



Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

व्यवधानेन भवति । सम० ७१ । वेलन्धरनागराजस्य आवासपर्वतः । देवविशेषः । ठाणा० २२६ । श्रेयांसनाथस्य प्रथमः शिष्यः । सम० १५२ ।

**गोथूभो**–गोस्तूपः–भुजगेन्द्रस्यावासपर्वतः । जीवा० ३११ । प्रथमो वेलन्धरनागराजः, भुजगेन्द्रो भुजगराजः । जीवा० ३११ ।

**गोदत्ता**–ब्रह्मदत्तस्याष्टाग्रमहिषीणां मध्ये द्वितीया । उत्त० ३७९ ।

**गोदासे**–गणविशेषः । ठाणा० ४५१ ।

**गोदुहू**–गोदोहिका । ठाणा० २९९ ।

**गोदोहिका**–गोर्दोहनं गोदोहिका । ठाणा० ३०२ ।

**गोदोहिकासनं**–आसनविशेषः । उत्त० ६०७ ।

**गोदोहिया**–गोदोहिका । आव० २२७ ।

**गोदोहियाए**– । आचा० ४२४ ।

**गोदोही**–गोदोहिका । आव० ६४८ ।

**गोधंमो**–अनाचारः । नि० चू० प्र० ११३ आ ।

**गोध**–अलसः । उत्त० २६२ । व्यवहारी । दश० ५६ ।

**गोधणं**–गोधनं–गवादिद्रव्यम् । आव० ८२५ ।

**गोधा**–गोधा । प्रश्न० ८ । म्लेच्छविशेषः । प्रज्ञा० ५५ ।

**गोधिका**–वाद्यविशेषः । ठाणा० ३९५ ।

**गोधूमजंतगं**–गोधूमयन्त्रकम् । उत्त० २२३ ।

**गोधूमो**–गोधूमः–धान्यविशेषः । आव० ८५५ ।

**गोधेरकः**–गोणसहा । उत्त० ६९९ ।

**गोनिषद्यिका**–यस्यां तु गोरिवोपवेशनं सा । ठाणा० २९९ । उपवेशनविशेषः । बृ० तृ० २०० अ ।

**गोपालओ**–गोपालकः–अज्ञातोदाहरणे प्रद्योतलघुपुत्रः । आव० ६९९ ।

**गोपालगिरिः**–गिरिदिशेषः । जं० प्र० १६८ । भग० ३०७ ।

**गोपालघटः**– । उत्त० ५५९ ।

**गोपुच्छसंठाणसंठिया**–गोपुच्छस्येव संस्थानं गोपुच्छसंस्थानं तेन संस्थिता गोपुच्छसंस्थानसंस्थिता–ऊर्ध्वीकृतगोपुच्छाकारा । जीवा० १७८ ।

**गोपुट्ठए**–गोपृष्ठाद्यत्पतितम् । भग० ६८० ।

**गोपुर**–प्राकारद्वारम् । जीवा० २५८ । गोपुरं–पुरद्वारम् । सूर्य० ९९ । औप० ३ । प्रश्न० ८ । जीवा० २६९ । प्रतोली । ज्ञाता० २२२ । प्रतोलीद्वाराणां परस्परतोऽन्तराणि । अनु० १५९ । गोभिः पूर्यन्त इति गोपुराणि प्रतोलीद्वाराणि । उत्त० ३११ ।

**गोपुरसंठिओ**–गोपुरसंस्थितः । जीवा० २७९ ।

**गोपुरसंठिया**–गोपुरस्येव–पुरद्वारस्येव संस्थितं संस्थानं यस्याः सा गोपुरसंस्थिता । सूर्य० ६९ ।

**गोपेन्द्रवाचकः**–द्रव्यानुयोगे परपक्षनिवर्तकः । दश० ५३ ।

**गोप्पतं**–गोष्पदं–तत्कल्पं देशविरत्यादिकमल्पतमम् । ठाणा० २७९ ।

**गोप्पहेलिया**–गोप्रहेल्या । आचा० ४११ ।

**गोफण**–गोफणः–प्रस्तरप्रक्षेपकोदवरकगुम्पितः शस्त्रविशेषः । आव० ६१३ ।

**गोफणा**–चम्मदवरगमया । नि० चू० प्र० १०५ आ । चर्मदवरकमयी । बृ० तृ० ६८ अ ।

**गोबर**–गोमयः । बृ० प्र० २७० आ ।

**गोबहुल**–शरवणसन्निवेशे ब्राह्मणविशेषः । भग० ६६० । गोबहुलः–प्रचुरगोमान् शरवणसन्निवेशे ब्राह्मणविशेषः । आव० १९९ ।

**गोब्बरगाम**–गूर्बरग्रामः–मगधाविषये ग्रामः । आव० ३५५ । गोर्बरग्रामः–ग्रामविशेषः । आव० २१२ । वइरिसगामासन्नं । बृ० तृ० २१७ आ । सन्निवेशः, इन्द्राग्निवायुभूतिगणधराणां जन्मभूमिः । आव० २५५ ।

**गोभत्तं**–गोभक्तं छगणादि । आव० ९१ ।

**गोभत्तकलंदयं**– । नि० चू० द्वि० ९१ आ ।

**गोभूमी**–सदा गावश्चरति यत्र तेन गोभूमिः । आव० २११ ।

**गोमंडलं**–गोवर्गः । बृ० प्र० १५७ आ ।

**गोमए**–गोमयं–छगणम् । भग० २१३ ।

**गोमड**–गोमृतः–मृतगोदेहः । जीवा० १०६ ।

**गोमयं**–गोकरिसो गोमयं । नि० चू० प्र० २६५ आ ।

**गोमयकीडगो**–गोमयकीटकः–चतुरिन्द्रियजन्तुविशेषः । जीवा० ३२ ।

**गोमयकीडा**–चतुरिन्द्रियजन्तुविशेषः । प्रज्ञा० ४२ ।

**गोमाणसिआ**–गोमानस्यः–शय्यारूपाः स्थानविशेषाः । जं० प्र० ३२६ ।



Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

**गोमाणसिया**–गोमानस्यः शय्याः । जीवा० २०४, ३५६ । राज० ६२ । गोमानसिकाः शय्यारूपाः–स्थानविशेषाः । जीवा० २३० ।

**गोमाणसीओ**–शय्याः । जं० प्र० ४६ ।

**गोमाणसी**-गोमानुषी–शय्यारूपा । जीवा० ३६३ ।

**गोमायुः**–शृगालः । प्रज्ञा० २५४ । आचा० १६७ ।

**गोमायुपुत्ते**– । भग० ६५६ ।

**गोमिज्जए**–गोमेजकः–मणिभेदः । प्रज्ञा० २७ । उत्त० ६८६ ।

**गोमिनि**–गोमिनि–नानादेशापेक्षया गौरवकुत्सादिगर्भमामन्त्रणवचनम् । दश० २१६ ।

**गोमिय**–गोमिकः–गोमान् । प्रश्न० ३८ । गोम्मिक–गौल्मिकः–गुप्तिपालः । प्रश्न० ५६ ।

**गोमिया**–सुंकिया । नि० चू० प्र० १४० अ । दंडपासिया । नि० चू० १६४ अ । ठाणइल्ला । नि० चू० द्वि० ११ आ ।

**गोमुत्तिअदड्ढ**–गोमूत्रदग्धः–गोमूत्रसहितं स्थानम् । ओघ० ५४ ।

**गोमुत्तियवूहो**–गोमूत्रिकाव्यूहः–गोमूत्रिकाकारसैन्यविन्यासविशेषः । प्रश्न० ४७ ।

**गोमुत्तिया**–गोचर्यामभिग्रहविशेषः । नि० चू० तृ० १२ अ । उत्त० ६०५ ।

**गोमुह**–गोमुखनामा अन्तरद्वीपः । प्रज्ञा० ५० । गोमुखः अन्तरद्वीपविशेषः । जीवा० १४४ ।

**गोमुहदीव**–अन्तरद्वीपविशेषः । ठाणा० २२६ ।

**गोमुहिए**–गोमुखवदुरःप्रच्छादकत्वेन कृतानि गोमुखितानि । ज्ञाता० २३७ ।

**गोमुही**–गोमुखी–काहिला–यस्या मुखे गोशृङ्गादिवस्तु दीयत इति । अनु० १२६ । काहला । ठाणा० ३६५ ।

**गोमूत्रिका**–यस्यां तु वामगृहाद्दक्षिणगृहे दक्षिणगृहाच्च वामगृहे भिक्षां पर्यटति सा गोमूत्राकारत्वात् गोचरभूमिरपि । बृ० प्र० २५७ अ । प्रज्ञा० ४७३ ।

**गोमूत्रिकाबन्धः**–मुद्रिकाबन्धः । ओघ० १४५ ।

**गोमेज्ज**–गोमेयकः–रत्नविशेषः । जीवा० २०४ ।

**गोमेज्जए**–गोमेज्जकः । जीवा० २३ । गोमेदकः–पृथिवीभेदः । आचा० २६ ।

**गोमेयकं**–रत्नविशेषः । उत्त० ४५१ ।

**गोम्मिए**–गौल्मिकः- शुल्कपालः । बृ० द्वि० २२८ अ ।

**गोम्मिय**–गुप्तिपालकः । प्रश्न० ३७ ।

**गोम्मिया**–बद्धस्थाना आरक्षकाः । बृ० द्वि० १०६ आ। बद्धस्थाना मार्गरक्षकाः । बृ० द्वि० ८३ अ । गुल्मेन समुदायेन चरन्तीति गौल्मिकाः स्थानरक्षपालः । बृ० द्वि० २६० अ० । गौल्मिकाः ये राज्ञः पुरुषाः स्थानकं बद्ध्वा पन्थानं रक्षन्ति । बृ० द्वि० ८३ अ ।

**गोम्ही**–कर्णशृगाली । अनु० २१४ । कण्णसियाली । नि० चू० प्र० १६३ अ । त्रीन्द्रियजन्तुविशेषः । प्रज्ञा० ४२ । जीवा० ३२ । कर्णसियालिया । प्रज्ञा० ४२ ।

**गोय**–गास्त्रायत इति गोत्रं–मौनं वाक्संयमः, जन्तूनां जीवितम् । सूत्र० २४६ । गीयते–शब्द्यते उच्चावचैः शब्दैः कुलालादिव मृद्द्रव्यमत आत्मेति गोत्रम् । उत्त० ६४१ । गुणनिष्पन्नम् । भग० ११५ । अन्वर्थिकम् । भग० ५६१ । गोत्रं-गुणनिष्पन्नः । निरय० ७ । गोत्रं–अन्वर्थः । राज० १३ । सरीरं । दश० चू० ५६ । गोत्रं–आन्वर्थिकीसञ्ज्ञा । विपा० ४२ ।

**गोयम**–प्रथमो गणधरः । नि० चू० द्वि० ७७ अ । स्थविरविशेषः । नि० चू० प्र० २०७ आ । गौतमं–रोहीणिगोत्रम् । जं० प्र० ५०० । गौतमः–अन्तकृद्दशानां प्रथमवर्गस्य प्रथममध्ययनम् । अन्त० १ । कुमारविशेषः । अन्त० २ । भक्तिबहुमाने तृतीयभङ्गे दृष्टान्तः । नि० चू० प्र० ८ अ । ह्रस्वोबलिवर्दस्तेन गृहीतपादपतनादिविचित्रशिक्षेण जनचित्ताक्षेपदक्षेण भिक्षामटन्ति ये ते गौतमः । औप० ८६ । एषणासमितिदृष्टान्ते धिग्जातीयश्चक्रकरः । आव० ६१६ । प्रतीच्यां दिशि लवणसमुद्राधिपसुस्थितनामदेवावासभूतो द्वीपविशेषः । प्रज्ञा० ११४ । गोव्रतिका गृहीतशिक्षं लघुकायं वृषभमुपादाय धान्याद्यर्थं प्रतिगृहमटन्ति ते गौतमाः । सूत्र० १५४। नि० चू० प्र० ३५२ आ ।

**गोयमकेसिज्जं**–उत्तराध्ययनेषु त्रिशत्तमध्ययनम् । सम० ६४ ।

**गोयमदीव**–गौतमद्वीपः–द्वीपविशेषः । सम० ७६ ।



Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

**गोयमसामी**–गौतमस्वामी,प्रथमो गणधरः, । आव० ६५ । ज्ञाता० १७०, १७१, १७८, २२६ । अन्त० २२ ।

**गोयर**–गोचरः–भिक्षाग्रहणविधिलक्षणः । सम० १०७ । नंदी० २१० । भिक्षाटनम् । ज्ञाता० ६१ । गोचरः–भिक्षाटनम् । भग० १२२ । गोरिव चरणं गोचरः । उत्त० ११६ । गोरिव चरणं गोचरः–उत्तमाधममध्यम-कुलेष्वरक्तद्विष्टस्य भिक्षाटनम् । दश० १६३ ।

**गोयरग्गपविट्ठो**–गोरिव चरणं गोचरस्तस्याग्र्यं–प्रधानं तस्मिन् प्रविष्टः गोचराग्रप्रविष्टः । उत्त० ११६ ।

**गोयरचरिया**–गोश्चरणं गोचरः चरणं–चर्या गोचर इव चर्या गोचरचर्या–भिक्षाचर्या । आव० ५७५ ।

**गोयरतिअ**–गोचरत्रिकं–त्रिकालभिक्षाटनम् । ओघ० ६५ ।

**गोयारिया**–गोचरचर्या । नि० चू० प्र० ६ अ ।

**गोयावरी**–गोदावरी–नदीविशेषः । व्य० प्र० १६३ अ ।

**गोरक्खरा**–एकखुरचतुष्पदविशेषः । प्रज्ञा० ४५ ।

**गोरखुरो**–गोरखुरः–एकखुरचतुष्पदः । जीवा० ३८ ।

**गोरव**–गौरवं–अशुभाध्यवसायविशेषः । प्रश्न० ६२ । ऊर्ध्वाधस्तिर्यग्गमनस्वभावः । ठाणा० ४३४ ।

**गोरस**–गोरसं–गोभक्तादि । आव० ६१ । गोरसः । आव० ३४३ । सूत्र० २६३ ।

**गोरसकुंड**–गोरसकुण्डः । आव० ६४१ ।

**गोरसदवो**–गोरसद्रवः–दध्यादिपानकम् । पिण्ड० १५० ।

**गोरसधोवणं**–गोरसधावनम् । आव० ६२४ ।

**गोरहत्ति**–गोरहकः–कल्होटकः । आचा० ३६१ ।

**गोरहग**–गोरथकः–कल्होडः । दश० २१७ । कल्होडकः । बृ० द्वि० १३८ आ ।

**गोरहसंठितो** पासातो । नि० चू० द्वि० ६६ आ ।

**गोरा**–नदीपाषाणशृङ्गिका । बृ०तृ० १६२ आ । गोधूमा । नि० चू० तृ० ३७ आ ।

**गोरी**–गौरी–कृष्णवासुदेवस्य राज्ञी । अन्त० १८ । अन्तकृद्दशानां पञ्चमवर्गस्य द्वितीयमध्ययनम् । अन्त०१५ । चत्वारिमहाविद्यायां प्रथमा । आव० १४४ । बलकोट्टज्येष्ठभार्या । उत्त० ३५४ ।

**गोरीपाडलगोरा**–गौरी या पाटला पुष्पजातिविशेषस्तद्वद्ये गौरास्ते गौरीपाटलागौराः । ज्ञाता० २३१ ।

**गोरूग**– । नि० चू० प्र० २२६ आ ।

**गोरूवं**–गौः । आव० १८६ ।

**गोरे**–गोधूमः । बृ० द्वि० १२६ अ ।

**गोल**–देशान्तरेऽवज्ञासंसूचकः । आचा० ३८८ । गोलः–तत्तद्देशप्रसिद्धितो नैष्ठुर्यादिवाचकोऽयं शब्दः श्वा वा । दश० २१५ । साधोरुपमानम् । दश० १६ । गोले–नानादेशापेक्षया गौरवकुत्सितादिगर्भमान्त्रणवचनमिदम् । दश० २१६ । ज्ञाता० १६७ । वृत्तपिण्डः । ठाणा० २७२ । गोलकः–वर्तुलः पाषाणादिमयः । अनुत्त० १४ ।

**गोलगो**–गोलकः–जन्तुमयो वर्त्तूलाकारः । आव० ४१६ । आव० ४२२ ।

**गोलछाया**–गोलमात्रस्य छाया गोलच्छाया । सूर्य० ६५ ।

**गोलपुंजछाया**–गोलानां पुञ्जो गोलपुञ्जो गोलोत्कर इत्यर्थः, तस्य छाया गोलपुञ्जच्छाया । सूर्य० ६५ ।

**गोलय**–गोलकः–वृत्तोपलः । जं० प्र० ३२६ । पिण्डकः । उत्त० ५३० ।

**गोलव्वायणं**–गोलव्यायनं–अनुराधागोत्रम् । जं० प्र० ५०० ।

**गोलव्वायणसगोत्ते**– । सूर्य० १५० ।

**गोलांगूल**–गोलाङ्गूलं–वानरः । भग० ५८२ ।

**गोलाकारे**–गोलाकारः–वृत्ताः । सूर्य० २६७ ।

**गोलावलिछाया**–गोलनामावलिर्गोलावलिस्तस्याः छाया गोलावलिच्छाया । सूर्य० ६५ ।

**गोलिका**:–भण्डिकाः । ठाणा० ४१६ ।

**गोलिकातणा**– । ठाणा० ३६० ।

**गोलिगि**–महियविक्कया । नि० चू० तृ० ४५ अ ।

**गोलियधणुयं**–गोलिकधनुः । उत्त० २४५ ।

**गोलिया**–गोलिका–गन्धप्रधाना शाला । व्य० द्वि० २४८ आ । मथितविक्रायकाः । बृ० द्वि० १५४ आ ।

**गोलियालिंगं**–अग्नेराश्रयविशेषः । जीवा० १२३ ।

**गोलोममेत्तो**–अहस्तप्राप्या–गोलोममात्रा । नि० चू० प्र० ३५४ अ ।

**गोलोमा**–द्वीन्द्रियजन्तुविशेषः । जीवा० ३१ । प्रज्ञा० ४१ ।

**गोल्लविसओ**–गोल्लविषयः–गोल्लदेशः । आव० ४३३ । गौडविषयः–गौडदेशः । आव० ८३० ।



Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

**गोल्ला-** । ठाणा० ३६० ।

**गोल्हाफलं-**बिम्वफलम् । प्रश्न० ८१ । जीवा० २७२ ।

**गोवग्गो-**गोपः । आव० ३६० ।

**गोवग्गं-**गोरूपाणि । ठाणा० ५०२ ।

**गोवच्छय-**गोवत्सः । उत्त० ३०३ ।

**गोवती-**गोपतिः-गवेन्द्रः । ज्ञाता० १६१ ।

**गोवतीते-**गोव्रतिकः-गोश्चयानुकारी । ज्ञात० १६५ ।

**गोवल्लं-**गोवल्लायनं-पूर्वाफाल्गुन्या गोत्रम् । जं०प्र०५००।

**गोवल्लायणसगोत्ते-**पूर्वाफाल्गुनीनक्षत्रस्य गोत्रम् । सूर्य० १५० । जं० प्र० ५०० ।

**गोवाटादि-**कर्दमः । ठाणा० २१६ ।

**गोवालो-**यो गाः पालयति गोपालः । उत्त० ४६५ । गोपालः । आव० ४१८ ।

**गोवलकंचु-**गोवालकञ्चुकम् । बृ० द्वि० १०६ अ ।

**गोवालकंचुगो-**गोवालकञ्चुकः । बृ० द्वि २१७ अ ।

**गोवालगमाया-**गोपालकमाता शिवा, शृगालिनी । आव० ६७५ ।

**गोवालवुयं-** । नि० चू० प्र० २१२ आ ।

**गोवाला-**गोपालाः-राजा । नंदी० १५१ ।

**गोवालियाओ-** । ज्ञाता० २०४ ।

**गोवाली-**गोपाली-संवरोदाहरणे श्रीपार्श्वस्वामिसाध्वी । आव० ७१४ । वल्लीविशेषः । प्रज्ञा० ३२ ।

**गोविंद-**गोविन्दः । आव० ७१३ । भिक्षुविशेषः । नि० चू० द्वि० ३६ अ । श्रावकविशेषः । व्य० द्वि० १७६ अ ।

**गोविंददत्त-**गोपेन्द्रदत्तः-सद्व्यवहारकाचार्यः । तगरायामाचार्यस्याष्टमः शिष्यः । व्य० प्र० २५६ अ ।

**गोविंदनिज्जुत्ति-**हेतुशास्त्रभेदः । बृ० तृ० १४२ अ ।

**गोविंदवायगो-**मिच्छादिट्ठी व्रतेसु ठवित्तो पच्छा समत्तपडिवत्तस्स सम्मं आउट्टस्स मूलं । नि० चू०तृ० १२६ अ । नि० चू० तृ० ८३ अ । गोविन्दवाचकः-मूलप्रायश्चित्ते दृष्टान्तः । व्य० प्र० १०३ आ । वाचकविशेषः । नि० चू० प्र० २६३ आ ।

**गोविही-** । ठाणा० ४६८ ।

**गोवृषः-**बलीवर्दविशेषः । बृ० प्र० २१३ अ ।

**गोव्रतिकाः-**गोचर्यानुकारिणः । अनु० २५ ।

**गोशालः-**आजीविकमतप्रवर्त्तकः । नंदी० २३६ ।

**गोशालकः-**जिनोपसर्गकारीनिह्नवः । विपा० ६४ । सूत्र० ३८६ । ज्ञाता० १६२ । उत्त० ४७ ।

**गोशीर्षं-**चन्दनविशेषः । सम० १३८ ।

**गोशीर्षचन्दनं-**चन्दनविशेषः । ज्ञाता० १२८ ।

**गोसंखी-**गोशङ्खी-कौटुम्बिक आभीराणामधिपतिः । आव० २१२ ।

**गोसंखो(स)डी-**उज्जूहिगा । नि० चू० द्वि० ७१ अ ।

**गोसंधिओ-**गोसन्धिकः-गोष्ठाधिपः । आव० ८६३ ।

**गोस-**गोषः-प्रत्यूषः । आव० ७८१ । प्रातः । व्य० प्र० २३६ ।

**गोसाल-**मङ्खलिपुत्रः । भग० ६५६, ६६० । आव० १६६ ।

**गोसालसिस्सा-**आजीवगा । नि० चू० द्वि० ६८ अ ।

**गोसाला-**गोणादि जत्थ चिट्ठंति सा गोसाला । नि० चू० प्र० २६५ अ ।

**गोसीस-गोशीर्षं-**उत्तमचन्दनविशेषः । प्रश्न० १३५ । चन्दनविशेषः । जीवा० २२७ । गोशीर्षनामकचन्दनम् । प्रज्ञा० ८६ ।

**गोसीसचंदणं-**गोशीर्षचन्दनम् । आव० ११६ ।

**गोसीसावलिसंठिते-**गोशीर्षावलिसंस्थितं-गोः शीर्षं गोशीर्षं तस्यावली-तत्पुद्गलानां दीर्घरूपा श्रेणिः तत्समं संस्थानम् । सूर्य० १२६ ।

**गोसे-**प्रातः । व्य० प्र० २३५ । उदियमादिच्चे । नि० चू० तृ० ७७ अ० ।

**गोसो-**प्रत्यूषः । आव० ३५१ ।

**गोस्तूपा-**समुद्रमध्यवर्त्तिनः पर्वतविशेषाः । प्रश्न० ६६ ।

**गोष्ठानि-**घोषा । ठाणा० ८८ ।

**गोष्ठामाहिलः-**मिथ्यादर्शनशल्ये दृष्टान्तः । आव० ५७६ । स्वाग्रहग्रस्तः कश्चित् । सूत्र० २३३ । गोष्ठामाहिलः । आचा० २०६ ।

**गोह-**राजपुरुषः । उत्त० १७६ । गोधः-आरक्षः । आव० २६६, ३१६ । उत्त० १६२ । अधमः । आव० ४१५ । गोहः-जारः । ओघ० ४६ । दण्डिकः-आरक्षकः । आव० ६६२ । कर्मकरः । दश० १८१ । प्राकृतः । आव० ३०१ । उपपतिः । नंदी० १४५ । गोधः ।



Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

दश० ८६ ।

**गोहा**–गोधा । उत्त० ६९९ । गोधा–भुजपरिसर्पतिर्यग्-योनिकः । जीवा० ४० ।

**गोहिआ**–चर्मावनद्धवाद्यविशेषः । दर्दरिकेत्यपरनाम्ना प्रसिद्धा । अनु० १२९ ।

**गोहिका**–भाण्डानां कक्षाहस्तगतातोद्यविशेषः । आचा० ४१२ ।

**गोहुम**–गोधूमः–धान्यविशेषः । ज्ञाता० २३१ । दश० १९३ । औषधिविशेषः । प्रज्ञा० ३३ ।

**गोहे**–गोधा–सरीसृपविशेषः । भग० ३६५ । गोधा । आव० ६६ । व्यवहारी । दश० ५६ ।

**गोहेहिं**– । नि० चू० प्र० ३४४ आ ।

**गौतमः**–रागद्वेषादिसहभावविरहितो गणधरविशेषः । उत्त० २४१ । गौतमस्यापत्यम् ।

**गौतमस्वामी**–प्रथमगणधरः । आचा० २१ ।

**गौतमादिः**–सूत्रत आत्मागमवान् । आव० ५७ ।

**गौरखरः**– । उत्त० २७० ।

**गौरवं**–ऋद्धा नरेन्द्रादिपूज्याचार्यत्वादिलक्षणया । सम०९ ।

**गौरीपुत्राः**–भिक्षाकाः । जं० प्र० १४२ ।

**गौर्गलिः**–असञ्जातकिणस्कन्धः । आचा० ८७ ।

**ग्रन्थ**–ग्रन्थ-काव्यं धर्मार्थकाममोक्षलक्षणपुरुषार्थनिबद्धं संस्कृतप्राकृतापभ्रंशसंकीर्णभाषानिबद्धं, गद्यपद्यगेयचौर्णपदबद्धं वा । जं० प्र० २५९ । विशे० ४१६ ।

**ग्रन्थविच्छेदविशेषः**–वस्तु । नंदी० २४१ ।

**ग्रहगृहीतः**–उन्मत्तः–हृतः । पिण्ड० १६३ ।

**ग्रहणकं**–सूचकम् । उत्त० २४२ ।

**ग्रहणकुलिपकम्**– । बृ० प्र० ६१ आ ।

**ग्रहणवाक्यम्**– । विशे० ५६३ ।

**ग्रहणशिक्षा**–प्रथमा शिक्षा । नंदी० २१० । ग्रहणाभ्यासः । आव० ८३३ । बृ० प्र० ६४ ।

**ग्रहणा**–शिक्षा आसेवनात्मिका । उत्त० २८२ ।

**ग्रहणावग्रहे**– । आचा० ४०२ ।

**ग्रहदण्डाः**–दण्डाकारव्यवस्थिता ग्रहा–ग्रहदण्डाः ते चानर्थोपनिपातहेतुतया प्रतिषेध्या न स्वरूपतः । जीवा०२८२ ।

**ग्रहगर्जितानि**–ग्रहचारहेतुकानि गर्जितानि, इमानि स्वरूपतोऽपि प्रतिषेध्यानि । जी० २८२ ।

**ग्रहापसव्यं**– । जीवा० २८२ ।

**ग्रहोपरागः**– । उत्त० २२९ ।

**ग्रामकूटः**–ग्रामे महत्तरः । नि० चू० प्र० १७६ आ ।

**ग्रामणीः**–आधाकर्मपरिहरणे वणिग् । पिण्ड० ७२ ।

**ग्रामभोगिकः**–ग्रामनगरपतिः । ओघ० ४६ । ठक्कुरः । आव० २३८ ।

**ग्रामरक्ष**–त्रिकचत्वारादिव्यवस्थितं शक्तिकुन्तादिहस्ता उपचरन्ति । आचा० ३०८ ।

**ग्रामेण**–जनसमूहेन । सम० ५३ ।

**ग्रामेयकः**–ग्राम्यः । नंदी० १४९ ।

**ग्राहः**–अभिलाषः । आव० ८१४ ।

**ग्राहणाकुशलः**–यो बह्वीभिर्युक्तिभिः शिष्यान् बोधयति, व्याख्याप्रायोग्यः सूरिः । आचा० ३ ।

**ग्राह्यवाक्यः**–सर्वत्रास्खलिताज्ञः, व्याख्याप्रायोग्यः सूरिः । आचा० २ ।

**ग्रीवा**–लोकपुरुषस्य त्रयोदशरज्जूपरिवर्त्तीप्रदेशः । उत्त० ७०२ । कोटा । प्रश्न० ५६ । आचा० ३८ ।

**ग्रीवाग्रहः**–ग्रीवाग्रहणं–प्रतिमल्लेनापरमल्लस्य गलग्रहणम् । वि० १३० ।

**ग्रैवेयकाणि**–लोकपुरुषग्रीवास्थाने भवानि विमानानि । आव० ४० ।

## घ

**घंघसालगिहे**–घङ्घशालागृहे । पिण्ड० १०५ ।

**घंघशाला**–शालाविशेषः । आचा० ३०९, ४०२ । सम० ३८ । घङ्घशाला–अनाथमण्डपम् । ओघ० २०० । बृहच्छाला । आव० ६५४ । घट्टनं धर्मकथनं वा तत्राव्यतिरिक्ता बहुकार्पटिकासेविता वसतिर्घंघशाला । व्य० द्वि० २५ अ ।

**घंचनघोलना**–न्यायविशेषः । विशे० ५३७ ।

**घंटए**–पिबेत् ( ग० )

**घंटलोह**–घंटालोहः–यस्मिन्नेव दिने यत्र लोहे घंटाकृता तल्लोहं तस्मिन्नेव दिने विनष्टम् । व्य० द्वि० २०२ अ ।

**घंटा**–सियालो । बृ० प्र० ११६ अ । किङ्किण्यपेक्षया



Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

किञ्चिन्महत्यो घण्टाः । जीवा० १८१ । जं० प्र० २३ ।
**घंटाजालं**–किङ्किण्यपेक्षया किञ्चिन्महती घण्टा तज्जालम् । जीवा० १८१ ।
**घंटापासगा**–घण्टापार्श्वा-घण्टैकदेशविशेषाः । जं०प्र० ५३ ।
**घंटापासो**–घण्टापार्श्वः । जीवा० २०७ ।
**घंटि**– । नि० चू० द्वि० ६४ आ ।
**घंटिआ**–घण्टिकाः–घण्टावादकाः । जं० प्र० १८२ । घण्टिका–घर्घरिकाः । जं० प्र० १०६ ।
**घंटिकयक्षः**–कुलदेवता । बृ० प्र० २१५ अ ।
**घंटिक्करग**–स्थालः । नि० चू० द्वि० ६१ अ ।
**घंटिया**–घण्टिकाः । प्रश्न० १५६ । भूषणविधिविशेषः । जीवा० २६६ । क्षुद्रघण्टाः । जं० प्र० ५२६ ।
**घंटियाजाल**–घण्टिकाजालं किङ्किणीवृन्दम् । भग० ४७८ ।
**घंतु**–घातुकः–हननशील इति । उत्त० ४३६ ।
**घंसण**–चन्दनस्येव घर्षणम् । आव० २७३ । विशे०८४३ ।
**घंसिका**–अनुरङ्गा यानविशेषः । बृ० द्वि० १२५ आ ।
**घंसित्ता**–घृष्ट्वा । आव० ८३१ ।
**घंसियगा**–घर्षितकाश्चन्दनमिव दृषदि । औप० ८७ ।
**घओदए**–घृतोदकं–बादरः अप्कायिकविशेषः । प्रज्ञा० २८ ।
**घट**– । आव० २८० ।
**घटकः**–भाजनविधिविशेषः । जीवा० २६६ ।
**घटकारः**–स्वविज्ञानप्रकर्षप्राप्तः । नंदी० १६५ ।
**घटखर्प्पर**–कपालः । आचा० ३११ ।
**घटना**–अप्राप्तानां संयमयोगानां प्राप्तये घटना । भग० ४८४ ।
**घटाभोज्यं**–महत्तरानुमहत्तरादिर्बहिरावासितः । व्य० द्वि० ३६२ अ ।
**घटिकालय**– । ठाणा० १२२ ।
**घटिकालयादीनि**–येष्वतिसम्पीडिताङ्गा दुःखमाकृष्यमाणाः–बहिर्निष्क्रामन्ति जन्तवः । उत्त० २४७ ।
**घटिज्जंताणं**– । राज० ५२ ।
**घट्टइ**–सर्वदिक्षु चलति, पदार्थान्तरं वा स्पृशति । भग० १८३ । घट्टते–परस्परं संघट्टमाप्नोति । जीवा० ३०७ ।
**घट्टए**–लिप्तपात्रमसृणताकारकः पाषाणः । बृ० द्वि० २५३ अ ।
**घट्टग**–घट्टकः येन पाषाणकेन पात्रं नवलेपं मसृणं क्रियते । ओघ० १४४ । पाषाणकः–येन पात्रकं लेपितं सद् घृष्यते । ओघ० १३० । घट्टकः । ठाणा० ३३६ ।
**घट्टगरइतं**–घट्टकेन रचितं–मसृणितं–घृष्टम् । ओघ०१४५ ।
**घट्टण**–घट्टनं खञ्जगतिः । प्रज्ञा० ३२६ । आव० ७६१ । चालकम् । दश० १५२ । पिण्ड० १७१ । चलनम् । ओघ० १३६ । आहननम् । ओघ० ५२ । घट्टनं–मिथश्चालनम् । दश० २२८ । सजातीयादिना चालनम् । दश० १५४ । घट्टनानि–जालादीनि चलनानि । ओघ० १८१ । आव० ५४० ।
**घट्टणता**– । ठाणा० २८० ।
**घट्टणया**–वङ्कगतेः प्रथमो भेदः । घट्टनता । प्रज्ञा० ३२८ । घट्टनता–अक्षिण रजः प्रविष्ठं मर्दित्वा दुःखयितुमारब्धम्, स्वयमेवाक्षिण गले वा किञ्चित्सा लुकादि उत्थितं घट्टयति । आव० ४०५ ।
**घट्टणा**–घट्टना–चलनम् । ओघ० २२ ।
**घट्टनता**–अक्षिकणुकादेः । आचा० २५५ ।
**घट्टना**–कदर्थना । आचा० २६३ ।
**घट्टयंतं**–वस्त्वन्तरं स्पृशन्तम् । ठाणा० ३८५ ।
**घट्टिओ**–घट्टितः–मुद्रितः । दश० ६२ ।
**घट्टित**–घट्टितः–प्रेरितः । प्रश्न० ५६ । सुष्ठुतरं परितापितः । बृ० तृ० ८१ आ ।
**घट्टितघट्टनं**–घट्टितानि–संबद्धानि घट्टनानि जालादीनि चलनानि यस्य सः । आव० ५४०, ५४६ । ओघ० १८१ ।
**घट्टिय**–घट्टितः–सुविहितोपायः । धीवरादिकृत उपायः । पिण्ड० १७१ । घट्टितः–स्पष्टः । प्रश्न० ६० । परस्परं घर्षयुक्ता । जं० प्र० ३७ ।
**घट्टे**–घट्टयति अङ्गुल्या मसृणानि करोति । ओघ० १४३ ।
**घट्टेइ**–घट्टयति स्पृशति । ओघ० २११ । हस्तस्पर्शनेन घट्टयति । ज्ञाता० ६६ ।
**घट्टेउं**–घट्टयित्वा–तिरस्कृत्य । ओघ० १६२ ।
**घट्टं**–घृष्टं पाषाणादिना उपरि घर्षिते । सूर्य० २६३ । जीवा० १६० ।
**घट्ठा**–घृष्टानीव घृष्टानि खरशाणया पाषाणप्रतिमावत् । सम० १३८ । प्रज्ञा० ८७ । घृष्टा इव घृष्टा खर-



Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

शाणया पाषाणवत्। जं० प्र० २०। येषां–जङ्घे श्लक्ष्णीकरणार्थं फेनादिना घृष्टे भवतस्तेऽवयवावयविनोरभेदोपचारात् घृष्टाः। अनु० २६। घृष्टा इव घृष्टा खरशाणया प्रतिमेव। औप० १०। घृष्टा–जङ्घासु दत्तफेनका। ओघ० ५५। घृष्टा। ठाणा० २३२।

**घड**–घटकारः–कर्म्मजायां बुद्धौ दृष्टान्तः। नंदी० १६५। घटा–समुदायरचना। भग० २१५।

**घडओ**–घटः। आव० ४२३। घटकः। आव० ५५६।

**घडक**–घटकः। अनु० १५२।

**घडणं**–घटनं–अप्राप्तसंयमयोगप्राप्तये यत्नः। प्रश्न० १०९।

**घडण**–घटकः–लघुर्घटः। जं० प्र० १०१।

**घडणजयणप्पहाणो**–घटनं–संयमयोगविषयं चेष्टनं यतनं–तत्रैवोपयुक्तत्वं ताभ्यां प्रधानः–प्रवरः घटनयतनप्रधानः। उत्त० ५२२।

**घडणा**–घटना–परस्परादिघर्षणा। विशे० ५३७।

**घडदास**–घटदास। आचा० ३८८।

**घडदासी**–घटदासी–जलवाहिनी। सूत्र० २४५।

**घडभिंगारो**–घटभृङ्गारः–जलपरिपूर्णः कलशभृङ्गारः। औप० ६९।

**घडमुह**–घटमुखं, घटकमुखमिव मुखं तुच्छदशनच्छदत्वात्। भग० ३०८।

**घडमुहपवत्तिए**–घटमुखेनेव कलशब्दनेनेव प्रवर्त्तितः-प्रेरितः घटमुखप्रवर्त्तितः। सम० ८५।

**घडा**–गोष्ठी। बृ० द्वि० १८८ आ। गोट्ठी। नि० चू० प्र० १५६ आ। महत्तरानुमहत्तरादिगोष्ठीपुरुषसमवायलक्षणा। बृ० तृ० ९ आ। घटा–समुदायः। भग० ८३।

**घडाविओ**–योजितः। आव० ६८८।

**घडिगा**–घटिका–मृन्मयकुल्लडिका। सूत्र० ११८।

**घडिगापोद्दवत्**– । नि० चू० द्वि० ४१ आ।

**घडितव्वं**–घटितव्यं–अप्राप्तेषु योगः कार्यः। ठाण० ४४१।

**घडिय**–घटितं–संयोगो जातः। आव० ८२४। कूपितम्। दश० ११५।

**घडियनाती**–घटितज्ञातिः–दृष्टाभाषितः। व्य०द्वि०८५ अ।

**घडियल्लय**–घटितः। आव० ४१०।

**घडियव्वं**–अप्राप्तानां संयमयोगानां प्राप्तये घटना कार्या। भग० ४८४। अप्राप्तप्राप्तये घटना कार्या। ज्ञाता० ६०।

**घडीमत्तयं**–घटीमात्रकं–घटीसंस्थानं मृन्मयभाजनविशेषः। बृ० द्वि० २६ आ।

**घडेंति**–घटयन्ति संयोजयन्ति। जं० प्र० ३९४।

**घडेमि**–घटयामि। आव० ४२०।

**घणंगुले**–घनाङ्गुलम्। अनु० १७३। प्रतरश्च सूच्या गुणितो दैर्घ्येण विष्कम्भतः पिण्डतश्च समसङ्ख्यं घनाङ्गुलम्। अनु० १५८।

**घणं**–अन्यान्यशाखाप्रशाखानुप्रवेशतो निबिडा। जीवा० १८७। घनं–वादित्रविशेषः। जं० प्र० ४१२। घनम्। आव० २०८, ८३८। घनं–कांस्यतालादि। जीवा० २६६। निविडा। ओघ० ३०। निश्छिद्रम्। ज्ञाता० २। घनं–कंसकादि। जीवा० २४७। देवविमानविशेषः। सम० ३७। कोट्टगपुडगादिगंधा। नि० चू० तृ० १ अ। कलुषः। बृ० द्वि० १३८ अ। घनः–यस्य राशेर्यो वर्गः स तेन राशिना गुण्यते ततो घनो भवति। प्रज्ञा० २७५। निविडप्रदेशोपचयः। सूर्य० २८६। घनाकारं वादित्रम्। सूर्य० २६७। व्याप्तः। प्रज्ञा० ३६। घनः–सङ्ख्यानं यथा द्वयोर्घनोऽष्टौ। ठाणा० ४९६। घनः–बहुलत्तरः। जीवा० २०७। स्त्यानीभूतोदकः पिण्डीभूतो वा। जीवा० ९१। घनं–कांश्यतालादिकम्। भग० २९७। जं० प्र० १०२। चतुःषष्टिपदात्मकं तपः घनतपः। उत्त० ६०१।

**घणकडियकडिच्छा**–अन्योऽन्यं शाखानुप्रवेशाद् बहलनिरन्तरच्छायः। भग० ६२८।

**घणकडियकडिच्छाए**–अन्योऽन्यं शाखानुप्रवेशाद् बहुल निरन्तरच्छायः। औप० ६।

**घणकरणं**–घनकरणं–यथायोगं निधत्तिरुपतया निकाचनारूपतया वा व्यवस्थापनम्। पिण्ड० ४१।

**घणकुड्डा**–घनकुड्या–पक्वेष्टकादिमयभित्तिकाः। बृ० प्र० ३१० आ।

**घणगणियभावणा**–घनगणितभावना। जीवा० ३२५।

**घणघणाइय**–घनघनायितः घणघणायितरूपः। जं० प्र० १४४।

**घणदंतदीवे**–अन्तरद्वीपविशेषः। ठाणा० २२६।



Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

**घणदंता**-घनदन्तनामा अन्तरद्वीपः । प्रज्ञा० ५० ।
**घणदन्तो**-घनदन्तः-अन्तरद्वीपविशेषः । जीवा० १४४ ।
**घणमुइं**-जस्स मुइंगस्स घणसद्दसारित्थो सद्दो सो घणमुइं । नि० चू० द्वि० १७१ आ ।
**घणमुइंग**-मेघसदृशध्वनिर्मुरजः । जं० प्र० ६३ ।
**घणमुयंगो**-घनमृदङ्गः-घनसमानध्वनिर्यो मृदङ्गः । जीवा० २१७ । पटुना पुरुषेण प्रवादितः घनसमानध्वनिर्यो मृदङ्गः । जीवा० १६२ ।
**घणवट्टे**-सर्वतः समं घनवृत्तम् । भग० ८६१ ।
**घणवाए**-घनवातः-घनपरिणामो वातो रत्नप्रभापृथिव्याद्यधोवर्त्ती । जीवा० २६ । घनवातो-घनपरिणामो रत्नप्रभापृथिव्याद्यधोवर्त्ती । प्रज्ञा० ३०, ७७ ।
**घणवाय**-घनवातः-अत्यन्तघनः पृथिव्याद्याधारतया व्यवस्थितः हिमपटलकल्पः । आचा० ७४ ।
**घणवायवलय**- । प्रज्ञा० ७७ ।
**घणवाया**-रत्नप्रभाद्यधोवर्तिनां घनोदधिनां विमानानां वाऽऽधारा हिमपटलकल्पा वायवो घनवातः । उत्त० ६६४ ।
**घणविज्जुया**- । भग० ५०४ । ठाणा० ३६१ ।
**घणसंताणिया**-घनसत्तानिका-घनतन्तुका । ओघ० ११८ ।
**घणसंमद्दे**-घनसम्मर्दः-यत्र चन्द्रः सूर्यो वा ग्रहस्य नक्षत्रस्य वा मध्ये गच्छति स योगः । सूर्य० २३३ ।
**घणोदधिवलए**-घनोदधिवलयः-वलयाकारघनोदधिरूपः । जीवा० ६५ ।
**घत्तह**-यतध्वम् । तं० ।
**घत्तामो**-क्षिपामः-दिशो दिशि विकीर्णसैन्यं कुर्म्मः । जं० प्र० २३३ ।
**घत्तिय**-प्रेरितः । ओघ० १३७ ।
**घत्तिया**-दूरमुत्सारिताः । पउ० २८-६०६ ।
**घत्तिहामि**-यतिष्ये । विपा० ८३ ।
**घत्तेह**-प्रक्षिपत । जं० प्र० २४० ।
**घत्थं**-ग्रस्तं-अभिभूतम् । आव० ५८८ ।
**घत्थे**-गृहीताः । पिण्ड० ४७ ।
**घत्थो**-ग्रस्तः । मर० ।
**घन**-घनतपः । उत्त० ६०१ । स्त्यानो हिमशिलावत् । ठाणा० १७७ । वाद्यकशब्दविशेषः । ठाणा० ६३ । हस्ततालकं सालादि । आचा० ४१२ ।
**घनकडियकडच्छाए**-कटः सञ्जातोऽस्येति कटितः-कटान्तरेणोपरि आवृत इत्यर्थः कटितश्चासौ कटश्च कटितकटः घना-निबिडा कटितकटस्येवाधो भूमौ छाया घनकटितकच्छायः । जीवा० १८७ ।
**घनगुप्तः**-नामशिल्पः । विशे० ६२७ ।
**घनतपः**-षोडशपदात्मकः प्रतरः पदचतुष्टयात्मिकया श्रेण्या गुणितो-घनो भवति, आगतं चतुःषष्ठिः ६४ स्थापना तु पूर्विकैव नवरं बाहल्यतोऽपि पदचतुष्टयात्मकत्वं विशेषः, एतदुपलक्षितं तपो घनतप उच्यते । उत्त० ६०१ ।
**घनपरिमंडलं**-चत्वारिंशत्प्रदेशावगाढं चत्वारिंशत्परमाण्वात्मकं च, तत्र तस्या एव विंशतेरुपरि तथैवान्या विंशतिरवस्थाप्यते । प्रज्ञा० १२ ।
**घनोदधि**-घनः-स्त्यानो हिमशिलावत् उदधिः-जलनिचयः स-चासौ चेति घनोदधिः । ठाणा० १७७ ।
**घनोपलः**-करकः । प्रज्ञा० २८ ।
**घम्मपक्कं**-धर्मपक्कम् । विपा० ८० ।
**घम्मो**-घर्मः । आव० ३४६ ।
**घय**-घृतवरः-क्षीरोदसमुद्रानन्तरं द्वीपः । प्रज्ञा० ३०७ । द्वीपविशेषः । अनु० ६० । घृतं-आज्यम् । दश० १८० । घृतविक्रयी, कर्म्मजायां बुद्धौ दृष्टान्तः । नंदी० १६५ ।
**घयउरा**-घृतपूर्णाः । उत्त० २१० ।
**घयकुडो**-घृतकुटः-घृतकुम्भः । आव० ३१० ।
**घयणं**-भाण्डः, औत्पत्तिकीबुद्धौ दृष्टान्तः । नंदी० १५३ ।
**घयणो**-घृतान्नः । आव० ४१६ । भाण्डः । बृ० प्र० २१३ ।
**घयपुण्णो**-घृतपूर्णाः । उत्त० २०६ ।
**घयमंडो**-घृतमण्डः-घृतसारः । जीवा० ३५४ ।
**घयमेहे**-घृतवत् स्निग्धो मेघो घृतमेघः । जं० प्र० १७४ ।
**घयवरो**-घृतवरः द्वीपविशेषः, घृतोदकवाप्यादियोगाद् घृतवर्णदेवस्वामीकत्वाच्च द्वीपः । जीवा० ३५४ ।
**घयविक्किणओ**-घृतविक्रायकः । आव० ४२७ ।
**घयविक्किणिया**-घृतविक्रायिका । आव० १६७ ।
**घरंतरं**-घरंतरा उपरेण जंतं घरंतरं । नि०चू०प्र० १८७ ।
**घर**-गृहाणि सामान्यजनानां सामान्यानि वा । अनु०



Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

१५६ । गृहम् । आव० ५८१, ८४५ । गृहं–सामान्यम् । प्रश्न० ८ ।

**घरओ**–गृहम् । आव० ३६१ ।

**घरकुटीए**–बहिरवस्थितं धनकादि, अथवा तत्कलहिका-न्तर्गतकुट्यां वा निवसति । आव० ५७ ।

**घरकोइल**–गृहगोधिका । पिण्ड० १०३ ।

**घरलोइलओ**–गृहकोकिलः–गृहगोधा । आव० ३८६ ।

**घरकोइलि**ा–गृहकोकिलिका–घरोलिका । ओघ० १२६ ।

**घरकोइलिया**–गिहिकोइला । नि० चू० प्र० १८२ आ । गृहकोकिला–गृहगोधिका । आव० ७११ ।

**घरकोइलो**–गृहकोकिला । आव० ६४१ ।

**घरघरओ**–घरघरकः–कण्ठाभरणविशेषः । जं० ५२६ ।

**घरचिडओ**–चटकः । नि० चू० द्वि० ३३ आ ।

**घरछाइणिया**–गृहच्छादनिका । उत्त० १४७ ।

**घरछादणिया**–गृहच्छादनिका । आव० ३४३ ।

**घरजामाउ**–गृहजामाता । ज्ञाता० २०१ ।

**घरट्ट**–घंटी, यन्त्रविशेषः । ओघ० १६५ । भ्रमणकल्पम् । दश० ११४ ।

**घरणी**–गृहिणी । आव० २२४ ।

**घरवइ**–गृहाणां वृतिः । बृ० प्र० १८४ अ ।

**घरवगडा**–गृहवगडा–गृहवृतिपरिक्षेपः । बृ० प्र० ३०६आ ।

**घरसमुदाणिया**–गृहसमुदानं–प्रतिग्रहम् । औप० १०६ ।

**घरा**–गृहाणि सामान्यतः । जं० प्र० १०७ । गृहाणि–प्रासादाः । दश० १६३ । गृहाणि सामान्यजनानां सामान्यं वा । भग० २३८ ।

**घरास**–घरावासो । नि० चू० प्र० २०५ आ । गृहवासः । बृ० द्वि० २०७ अ ।

**घरोइला**–भुजपरिसर्पविशेषः । प्रज्ञा० ४६ ।

**घरोलिका**–गृहकोकिलिका । ओघ० १२६ ।

**घरोलिया**–भुजपरिसर्पतिर्यग्योनिकः । जीवा० ४० ।

**घर्मा**–आद्यभूमिः । आव० ६०० ।

**घल्लइ**–क्षिपति । पउ० ६२–१२ ।

**घसा**–जत्थ एगदेसे अक्कममाणे सो पदेसो सव्वो वलइ सा । दश० चू० १०२ । शुषिरभूमिः । दश० २०५ ।

**घसिरं**–ग्रसिता–बहुभक्षी । बृ० प्र० २४८ अ ।

**घसिरो**–बहुभक्खणो । ओघ० ६८ । नि० चू० प्र० २०१ अ ।

**घसो**–भूराजिः । जीवा० २८२ । स्थलादधस्तादवतरणम् आचा० ३३८ ।

**घाए**–घातः–गमनम् । सूर्य० ८, ४६ ।

**घाओ**–घाताः–प्रहाराः । ज्ञाता० ६६ । संपीडनम् । ओघ० १३६ ।

**घाड**–घाटः–मस्तकावयवविशेषः । पुरुषादिवधः । ज्ञाता० १३८ ।

**घाडामुह**–घाटामुखं–शिरोदेशविषयः । भग० ३०८ । घाटामुखं–कृकाटिकावदनम् । जं० प्र० १७० ।

**घाडिए**–मित्रम् । नि० चू० द्वि० ७८ अ ।

**घाडिय**–सहचारी । ज्ञाता० ८६ । मित्रम् । नि० चू० द्वि० १२७ अ ।

**घाणं**–तिलपीडनयन्त्रम् । पिण्ड० १७ । घ्राणं–गन्धः । प्रज्ञा० ६०१ । घ्राणो–गन्धो गन्धोपलम्भक्रिया वा । गन्ध-गुणः । भग० ७१३ । घ्रायत इति घ्राणो–गन्धगुणः । भग० ७५३ ।

**घाणामाइ**–घ्राणमयात् । ठाणा० ३६६ ।

**घाणिदिए**–घ्राणेन्द्रियम् । प्रज्ञा० २६३ ।

**घाणो**– । ओघ० १६६ ।

**घात**–हन्यन्ते प्राणिनः स्वकृतकर्मविपाकेन यस्मिन् घातः–नरकः । सूत्र० १२८ ।

**घातिकर्म**–वेदनीयादिकर्म । प्रज्ञा० ५६५ ।

**घातो**–घातः–देशतो घातनम् । प्रश्न० १३७ ।

**घाय**–घात्यन्ते–व्यापाद्यन्ते नानाविधैःप्रकारैर्यस्मिन् प्राणिनः स घातः–संसारः । सूत्र० १६१ ।

**घायए**–घातकः योऽन्येन घातयति । जं० प्र० १२३ ।

**घायओ**–घातकः–योऽन्येन घातयति । जीवा० २८० ।

**घायणा**–घातना–प्राणवधस्य षष्ठः पर्यायः । प्रश्न० ५ ।

**घालती**–गृहीतभाण्डाः । निरय० २५ ।

**घास**–ग्रासम्–आहारम् । उत्त० ६०६ । ग्रासम् । उत्त० २६४ । घासाः–बृहत्यो भूमिराजयः । आचा० ४११ । ग्रस्यत इति ग्रासः–आहारः । सूत्र० ४६ । औप० ३८ ।

**घिंसिसिखासे**–ग्रीष्मकाले, शिशिरकाले, वर्षाकाले । ओघ०



Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

२०५ ।

**घिसु**-ग्रीष्मे । उत्त० १२३ ।

**घिणा**-घृणा-पापजुगुप्सालक्षणा। प्रश्न० ५। आव० ३५१।

**घिणीअण्णो**-जीवदयालु । नि० चू० प्र० १२० अ ।

**घीरोलिय**-गृहकोकिलिकाः-गृहगोधिका: । प्रश्न० ८ ।

**घुंटकः**-गुल्फः । प्रश्न० ८० ।

**घुंटिउ**-पीत्वा । तं० ।

**घुट्टंति**-पिबन्ति । नंदी० ६३ ।

**घुट्टग**-घुट्टकः-लेपितपात्रमसृकारकः पाषाणः। पिण्ड० ६।

**घुणः**-काष्ठनिश्रितो जीवविशेषः । आचा० ५५ ।

**घुणकीटकः**-सचित्ताचित्तवनस्पतिशरीरेऽपि कीटविशेषः । सूत्र० ३५७ ।

**घुणक्खर**-घुणाक्षरः-न्यायविशेषः । दश० १११ ।

**घुणखइयं**-घुणखादितं-कोलावासः । आव० ६५६ ।

**घुणचुण्ण**-घुणचूर्णं-अचित्तचूर्णम् । विशे० ६६० ।

**घुणाक्षरकरणं**-न्यायविशेषः । दश० १५८ ।

**घुणितं**-घुणाणं आवासो घुणितं काष्टमित्यर्थः । नि० चू० प्र० २५५ आ ।

**घुरघुरायमाणं**-अन्तर्नदन्तं-गलमध्ये रवं कुर्वन्तम् ।सम० ५२ ।

**घुर्घुरं**- । सूत्र० ३२१ ।

**घुर्घुरकं**- । उत्त० ३१२ ।

**घुर्घुरादि**- । विपा० ५६ ।

**घुलति**-भ्राम्यति । उत्त० १५० ।

**घुल्ला**-घुल्लिका । जीवा० ३१ । घुल्ला:-घुल्लिका: द्वीन्द्रिय-जीवविशेषः । प्रज्ञा० ४१ ।

**घूमायमानः**- । ज्ञाता० १५२ ।

**घूय**-घूकः-कौशिकः । ज्ञाता० १३८ ।

**घूरा**-जङ्घा खलका वा । सूत्र० ३२४ ।

**घूर्णितचेतसः**- । नंदी० १५२ ।

**घृत**-स्निग्धस्पर्शपरिणता घृतादिवत् । प्रज्ञा० १० ।

**घृतपूपः**-घृतनिष्पन्नः पूपः । आव० ४५८ ।

**घृतपूर्ण**-सुपक्ववस्तुविशेषः । उत्त० ६१ । अशनम् । आव० ८११ ।

**घृतवारकाः**- । विशे० ६३७ ।

**घृतविक्रयी**- । नंदी० १६५ ।

**घृतोदः**-घृतवरद्वीपानन्तरं समुद्रः । प्रज्ञा० ३०७ । घृत-रसास्वादः समुद्रः । अनु० ६० ।

**घृष्टः**- । आचा० ३६१ ।

**घेच्चिओ**-पिष्टितः । आव० २०६ ।

**घेच्छति**-ग्रहीष्यति । आव० २३४ ।

**घेत्थिहि**-ग्रहीष्यति । आव० २६३ ।

**घोच्छामो**-गर्हिताः स्म । आव० ६० ।

**घोड**-घोटकः । ग० । घोटा डं(डि)गराः । व्य० द्वि० २३३ आ ।

**घोडए**-घोटकः-अश्वः । प्रज्ञा० २५२ ।

**घोडओ**-घोटकः-सामान्योऽश्वः । जीवा० २८२ ।

**घोडगा**-एकखुरचतुष्पदविशेषः । प्रज्ञा० ४५ ।

**घोडगो**-घोटकः-अश्वः । आसुव्व विसमपायं गायं ठावित्तु ठाइ उस्सगे । आव० ७९८ । बलीवर्दः । नि० चू० तृ० ३७ आ ।

**घोडमादो**-असंखंडीदोषविशेषः । नि० चू० द्वि० ३२ अ ।

**घोडयगीवो**-घोटकग्रीवः । आव० १७६ ।

**घोडा**-घोट्टा-चट्टा, जूअकारादिधुत्ता । नि० चू० प्र० २०७ आ। चट्टा । बृ० तृ० ६६ आ। बृ० प्र० ३११ अ । बृ० द्वि० ३० आ ।

**घोडो**-घोटः-एकखुरचतुष्पदविशेषः । जीवा० ३८ ।

**घोण**-नासा । प्रश्न० ८२ ।

**घोणसो**-सर्पः । आव० ४२६ ।

**घोणा**-नासिका । जं० प्र० २३६ ।

**घोर**-घोरः-अतिनिर्घृणः, परीषहेन्द्रियादिरिपुगणविनाशमाश्रित्य निर्दयः, आत्मनिरपेक्षः । भग० १२ । घोरः-निर्घृणः परीषहेन्द्रियादिरिपुगणविनाशमधिकृत्य निर्दयः, अन्यैर्दुरनुचरो वा । सूर्य० ५ । घूर्णयतीति घोरः-निरनुकम्पः । उत्त० २१७। प्राणसंशयरूपम् । आचा० १६४ । आत्मनिरपेक्षम् । ठाणा० २३३ । घोरं-हिंसा । भग० १७५ । रौद्रम् । दश० १६७ । घोरो-निर्घृणः परिषहेन्द्रियकषायाख्यानां रिपूणां विनाशे कर्त्तव्ये । अन्ये त्वात्मनिरपेक्षं घोरम् । ज्ञाता० ८ ।

**घोरगत्त**-घोरगात्रम् । उत्त० ३०३ ।



Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

**घोरगुणे**-घोराः-अन्यैर्दुरनुचरा गुणा ज्ञानादयो यस्य स। सूर्य० ४। अन्यैर्दुरनुचरा गुणा मूलगुणादयो यस्य सः। भग० १२।

**घोरतवस्सी**-घोरतपस्वी-घोरैस्तपोभिस्तपस्वी। भग० १२। सूर्य० ४।

**घोरपरक्कमो**-घोरपराक्रमः-कषायादिजयं प्रति रौद्रसामर्थ्यः। उत्त० ३६५।

**घोरबंभचेरवासी**-घोरं-दारुणं अल्पसत्वैर्दुरनुचरत्वात् ब्रह्मचर्यं यत्तत्र वस्तु शीलं यस्य स घोरब्रह्मचर्यवासी। सूर्य० ४। भग० १२।

**घोरमहाविसदाहो**-घोरा-रौद्रा महाविषा-प्रधानविषयुक्ता। दंष्ट्रा-आस्यो यस्य स घोरमहाविषदंष्ट्रः। आव० ५६६।

**घोरविसं**-परम्परया पुरुषसहस्रस्यापि हननसमर्थविषम्। भग० ६७२।

**घोरव्वओ**-घोरव्रतः-धृतात्यन्तदुर्धरमहाव्रतः। उत्त०३६५।

**घोरा**-झगिति जीवितक्षयकारिणी औदारिकवतां, परिजीवितानपेक्षा वा। प्रश्न० १७।

**घोरासमं**-घोराश्रमः-गार्हस्थ्यम्। उत्त० ३१५।

**घोलण**-घोलनं-अङ्गुष्ठकाङ्गुलिगृहीतसञ्चाल्यमानयूकाया इव। आव० २७३। अङ्गुष्ठकाङ्गुलिगृहीतसंचाल्यमानयूकाया इव घोलनम्। विशे० ८४३।

**घोलिओ**-घूर्णितः। आव० ३०३।

**घोलितः**- । नंदी० १६२।

**घोलियया**-घोलितका दधिघट इव पट इव वा। औप० ८७।

**घोष**- । ठाणा० २०५।

**घोषविशुद्धिकरणता**-उदात्तानुदात्तादिस्वरशुद्धिविधायिता। उत्त० ३९।

**घोषातकी**-कटुकवल्लीविशेषः। नंदी० ७७।

**घोसं**-नर्दितम्। ज्ञाता० १६१। देवविमानविशेषः। सम० १२, १७। ज्ञाता० २५१। गोउलं। नि० चू० द्वि० ७० आ। घोषः-गोकुलम् उत्त० ६०५। बृ० प्र० १८१ आ। बृ० द्वि० १८३ अ। घोषः-शब्दः। उपा० २५। उदत्तादिः। भग० १७। घोषः-अनुनादः। जं० प्र० ११७। गोष्ठः। ठाणा० ८५। घोषः-दशमो दक्षिणनिकायेन्द्रः। भग० १५७। जीवा० १७०। स्तनितकुमाराणामधिपतिः। प्रज्ञा० ६४। निनादः। जीवा० २०७।

**घोसगसद्दो**-घोषकशब्दः। आव० ४२४।

**घोसण**-घोषणं। आव० ११५।

**घोसवई**-घोषवती सेनाविशेषः। आव० ५१४।

**घोसवती**-घोषवती-प्रद्योतराज्ञो वीणा। आव० ६७४।

**घोससमं**-घोषा-उदासादयस्तैर्वाचनाचार्याभिहितघोषैः समं-घोषसमम्। अनु० १५।

**घोसा**-निनादः। जं० प्र० ५३।

**घोसाइ**-घोषा-गोष्ठानि। ठाणा० ८६।

**घोसाडइ**-वल्लीविशेषः। प्रज्ञा० ३२।

**घोसाडए**-घोषातकी। प्रज्ञा० ३६४।

**घोसाडयं**-घोषातकम्। प्रज्ञा० ३७।

**घोसाडिफलं**-घोषातकीफलम्। प्रज्ञा० ३६४।

**घोसाडियाकुसुमं**-घोषातकीकुसुमम्। जं० प्र० ३४। जीवा० १९१।

**घोसेह**-घोषयत-कुरुत। ज्ञाता० १०३।

**घ्राणं**-पोथः। जं० प्र० २३७।

## च

**चंकमंत**-चङ्क्रममाणः। ज्ञाता० २२१।

**चंकमणं**-चङ्क्रमणं-गमनम्। आव० ५२९।

**चंकमणगं**-प्रचङ्क्रमणकं-भ्रमणम्। ज्ञाता० ४१।

**चंकमणिया**-चङ्क्रमणिका-गतागतादिका। आव ५५८।

**चंक्रमणभूमिः**- । ओघ० १२२।

**चंक्रमणिका**- । ओघ० १२२।

**चंगबेरे**-चङ्गबेरा-काष्ठपात्री। दश० २१८।

**चंगिकं**-औदारिकम्। ओघ० ९०।

**चंगेरी**-चङ्गेरी-ग्रथितपुष्पसशिखाकरूपा। प्रज्ञा० ५४२। महतीकाष्ठपात्री बृहत्पट्टलिका वा। प्रश्न० ८।

**चंगोडए**-नाणककोष्ठागारम्। बृ० तृ० ९३ आ।

**चंचरिकः**-भ्रमरः। प्रज्ञा० ३६१।

**चंचलायमाणं**-चञ्चलायमानं सौदामिनीयमानं कान्ति-



Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

ज्ञात्कारेणेत्यर्थः । जं० प्र० २०२ ।
**चंचले**-चञ्चलः-अनवस्थितचेत्तः । प्रज्ञा० ९६ । विमुक्तस्थैर्यम् । ज्ञाता० १३८ ।
**चंचा**-सप्तमदशा । नि० चू० द्वि० २८ आ ।
**चंचु**-चञ्चुः-शुकचञ्चुः । जं० प्र० २६५ ।
**चंचुच्चियं**-चञ्चुरितं-कुटिलगमनं, अथवा चञ्चुः-शुकचञ्चुस्तद्वद्वक्रतयेत्यर्थः, उच्चितं-उच्चिताकरणं-पादस्योत्पादनं चंचुच्चितम् । जं० प्र० २६५ । चञ्चुरितं-कुटिलगमनम् । शुकचञ्चुस्तद्वद्वक्रतयेत्यर्थः, उच्चितं-उच्चताकरणं पादस्य उच्चितं वा-उत्पाटनं पादस्यैवं चञ्चूच्चितम् । औप० ७० । जं० प्र० ५३० । चञ्चुरितं-कुटिलगमनम् । चञ्चुः-शुकचञ्चुस्तद्वद्वक्रतया उच्चितं-उच्चताकरणं पादस्योत्पाटनं वा (शुक)पादस्येवेतिचञ्चूच्चितम् । भग० ४८० ।
**चंचुमालइय**-पुलकिता । भग० ५४१ । पुलकितः । औप० २४ ।
**चंड**-रौद्रः । भग० ४८४ । चण्डः-कोपनः परुषभाषी वा । उत्त० ४९ । चण्डः-चारभटवृत्त्याश्रयणतः । उत्त० ४३४ । क्रोधः । भक्त० । चण्डं-झगिति व्यापकत्वात् । ज्ञाता० १६२ । चण्डा-रौद्रा । भग० १६७, २३१, ५२७ । चण्डत्वं संरम्भारब्धत्वात् । ज्ञाता० ९९ । चण्डः उत्कटरोषत्वात् । ज्ञाता० २३८ ।
**चंडकोसिओ**-चण्डकौशिकः । आव० १९६ । प्रद्वेषे सर्पविशेषः । आव० ४०५ । चंडकौशिकः-येन कर्म्मणां क्षये कृतेऽवाप्तं सामायिकम् । आव० ३४७ । दृष्टिविषसर्पविशेषः । आचा० २५५ । नंदी० १६७ ।
**चडगं**-समूहः । आव० ६७१ ।
**चंडतिव्व**-चण्डतीव्रः अत्यर्थतीव्रः । ज्ञाता० १६२ ।
**चंडपिंगल**-मोहान्निदानकृत् । भक्त० । चण्डपिङ्गलः- अर्थोदाहरणे चोरः । आव० ४५२ ।
**चंडप्रद्योतः**-उज्जयिन्यधिपतिः । नंदी० १६६ । प्रश्न० ९० ।
**चंडमेहो**-चण्डमेघः-अश्वग्रीवराज्ञो दूतः । आव० १७४ ।
**चंडरुद्दो**-चण्डरुद्रः-कायदण्डोदाहरणे उज्जयिन्यामाचार्यः । आव० ५७७ । चण्डरुद्रः-परुषवचने उदाहरणम् । बृ० तृ० २१८ अ । साधुविशेषः । ओघ० ३८ ।
**चंडरुद्राचार्यः**-खरपरुषवचने दृष्टान्तः । व्य०प्र० ११८ अ ।
**चंडवडंसओ**-चन्द्रावतंसकः-साकेतनगरे राजा, यो माघमासे प्रतिमयास्थितः सन् कालगतः । आव० ३६६ ।
**चंडवडिंसओ**-चन्द्रावतंसकः-कोशलदेशे साकेतनगरे नृपतिः। उत्त० ३७५ ।
**चंडविसं**-दष्टकनरकायस्य झगिति व्यापकविषम् । भग० ६७२ ।
**चंडा**-वेगवती-झटित्येव मूर्च्छोत्पादिका । ठाणा० ४६१ । चण्डा-चमरासुरेन्द्रस्य मध्यमिका पर्षत् । जीवा० १६४ । चमरस्य द्वितीया पर्षत्, तथाविधमहत्त्वाभावेनेषत्कोपादिभावाच्चण्डा । भग० २०२ । चण्डौ क्रोधनत्वात् । ज्ञाता० ९९ । ठाणा० १२७ । चण्डा-शक्रदेवेन्द्रस्य मध्यमिका पर्षत् । जीवा० ३९० ।
**चंडाए**-चण्डया-रौद्रयाऽत्युत्कर्षयोगेन । ज्ञाता० ३६ ।
**चंडाल**-चाण्डालः-ब्राह्मस्त्रीशूद्राभ्यां जातः । आचा० ८ ।
**चंडालरूवे**-चण्डालस्येव रूपं-स्वभावः यस्य सः । ज्ञाता० ८० ।
**चंडालियं**-चण्डेनाऽऽलमस्य चण्डेन वा कलितश्चण्डालः, स चातिक्रूरत्वाच्चण्डालजातिस्तस्मिन् भवं चाण्डालिकम् । उत्त० ४७ । चण्डः-क्रोधस्तद्वशादलीकं-अनृतभाषणं चण्डालिकम् । उत्त० ४७ ।
**चंडावेणया**- । भग० ८०२ ।
**चंडिक्कं**-चाण्डिक्यं-रौद्ररूपत्वम् । प्रश्न० १२० । चाण्डिक्यम् । सम० ७१ ।
**चंडिक्किए**-चाण्डिकितः-सञ्जातचाण्डिक्यः प्रकटितरौद्ररूपः । भग० ३२२ । ज्ञाता० ६८ । चाण्डिक्यः-रौद्ररूपः । जं० प्र० २०२ । चाण्डिक्यितः-दारुणीभूतः । विपा० ५३ ।
**चंडिक्किय**-प्रकटितरौद्ररूपः । भग० १६७ ।
**चंडी**-साधारणबादरवनस्पतिकायविशेषः । प्रज्ञा० ३४ ।
**चंडीदेवगा**-चण्डीदेवकाः-चक्रधरप्रायाः । सूत्र० १५४ ।
**चंद**-तृतीयवर्गस्य प्रथममध्ययनम् । निरय० २१ । चन्द्रः । निरय० ३६ । धर्मकथाश्रुतस्कंधेऽष्टमवर्गे देवः । ज्ञाता० २५३ । ठाणा० ३४४ । चन्द्रः । प्रज्ञा० ३६१ । चान्द्रः-प्रथमो द्वितीयश्चतुर्थश्च युगसंवत्सरः । सूर्य० १५४ ।



Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

चन्द्रो-वक्षस्कारपर्वतः । जं० प्र० ३५७ । चन्द्रः-चन्द्राकारमर्द्धदलम् । प्रज्ञा० ४११ । देवविशेषः । जीवा० २६२ । द्वीपविशेषः । जीवा० ३१७ । देवविमानविशेषः । सम० ८ ।

**चंदऊडु**-चन्द्रर्त्तुः । सूर्य० २०३ ।

**चंदकंतं**-देवविमानविशेषः । सम० ८ ।

**चंदकंता**-द्वितीयकुलकरस्य भार्या । सम० १५० । आव० ११२ । ठाणा० ३९८ ।

**चंदकूडं**-देवविमानविशेषः । सम० ८ ।

**चंदग**-चन्द्रकः चक्राष्टकोपरिवर्त्तिपुत्तलिकायामाक्षिगोलकः । बृ० द्वि० १०० अ ।

**चंदगइण**-चन्द्रगतिना । पउ० २८-४५, ५१ ।

**चंदगविज्झं**-राधावेधोपमम् । आउ ।

**चंदगविज्झयं**-चन्द्रावेध्यकं-प्रकीर्णकविशेषः । आव० ७४० ।

**चंदगवेज्झं**-चक्राष्टसुपरिपुतलिकाक्षिचंडिकावेधवत् । नि० चू० द्वि० १७ आ ।

**चंदगवेज्झो**-चन्द्रकवेधः । ओघ० २२७ ।

**चंदगुत्त**-चन्द्रगुप्तः । दश० ६१ । नंदी० १६७ । विमर्शदृष्टान्ते राजा । आव० ४०५ । प्रशंसाविषये पाटलीपुत्रराजा । आव० ८१८ । चूर्णद्वारविवरणे कुसुमपरे राजा । पिण्ड० १४२ । नि० चू० तृ० ६ अ । बिन्दुसारपिता । बृ० प्र० ४७ अ । नि० चू० प्र० २४३ अ । पाडलिपुत्ते राया । नि० चू० द्वि० १०२ अ । बृ० प्र० ४७ अ । अशोकस्य पितामहः । बृ० द्वि० १५४ अ ।

**चंदगुत्तपपुत्तो**-चन्द्रगुप्तप्रपौत्रः । विशे० ४०९ ।

**चंदगोमी**-चन्द्रगोमी-व्याकरणकर्त्ता कोऽपि । सूर्य० २६२ ।

**चंदघोसे**-चन्द्रघोषः-चन्द्रध्वजः संवेगोदाहरणे आरक्षुराभिधप्रत्यन्तनगरे मित्रप्रभमनुष्यः । आव० ७०९ ।

**चंदच्छाए**- । ज्ञाता० १२४, १३२ ।

**चंदच्छाये**-चन्द्रच्छायः- अङ्गजनपदराजश्चम्पानिवासी । ठाणा० ४०१ ।

**चंदजसा**-चन्द्रयशाः कुलकरपत्नी । आव० ११२ । संवेगोदाहरणे चन्द्रध्वजभगिनी । आव० ७०९ । विमलवाहनकुलकरस्य भार्या । सम० १५० । ठाणा० ३९८ ।

**चंदज्झयं**-देवविमानविशेषः । सम० ८ ।

**चंदण**-चंदणं मलयजम् । प्रश्न० १६२ । चन्दनं-उपकारकम् । प्रश्न० १५७ । भग० ८०३ । चन्दनः-मणिभेदः । उत्त० ६८९ । चन्दनः । प्रज्ञा० २७ । चन्दनं-वृक्षविशेषः । प्रज्ञा० ३२ । गन्धद्रव्यविशेषः । नि० चू० प्र० २७६ आ ।

**चंदणकंथा**-चन्दनकन्था-गोशीर्षचन्दनमयी भेरी । आव० ९६ ।

**चंदणकयचच्चागा**-चंदनकृतचर्चाकः-चन्दनकृतोपरागः । जीवा० २०५ ।

**चंदणकलसा**-चन्दनकलशाः-मांगल्यघटाः । जं० प्र० ४९, ४२० । औप० ५ । जीवा० २०५ । चन्दनकलशाः-माङ्गल्यकलशाः । प्रज्ञा० ८६ । जीवा० १६० ।

**चंदणग**-चन्दनकः-अक्षः । प्रश्न० २४ ।

**चंदणघडो**-चन्दनघटः-चन्दनकलशः । जीवा० २२७ ।

**चंदणज्जा**-महावीरस्वामिनः प्रथमशिष्या । सम० १५२ ।

**चंदणथिग्गलिया**-चन्दनथिग्गलिका । आव० ९८ ।

**चंदणपायवे**-चन्दनपादपः-मृगग्रामनगरे उद्यानविशेषः । विपा० ३५ ।

**चंदणपुड**-गन्धद्रव्यविशेषः । ज्ञाता० २३२ ।

**चंदणा**-चन्दनकाः-अक्षाः । उत्त० ६९५ । चन्दना-शीलचन्दनाया द्वितीयं नाम । आव० २२४ । चन्दनकाः-अक्षाः, द्वीन्द्रियजीवविशेषः । प्रज्ञा० ४१ ।

**चंदणि**-वर्चोगृहम् । आव० ६८१ ।

**चंदणिउदय**-आचमनोदकप्रवाहभूमिः । आचा० ३४१ ।

**चंदणिका**-चन्दनिका-वर्चोगृहम् । उत्त० १०६ ।

**चंदणिया**-वर्चोगृहम् । आव० ३५८, ६६६ ।

**चंदणो**-चन्दनकः-अक्षः, द्वीन्द्रियजीवविशेषः । जीवा० ३१ ।

**चंददहे**-द्रहविशेषः । ठाणा० ३२६ ।

**चंददिण**-चन्द्रदिनं-प्रतिपदादिका तिथिः । सम० ५० ।

**चंददीवो**-चन्द्रद्वीपः-जम्बूद्वीपसत्कचन्द्रस्य द्वीपः । जीवा ३१७ ।

**चंदद्दह**-चन्द्रह्रदः, चन्द्रह्रदाकाराणि चन्द्रह्रदवर्णानि चन्द्रश्चात्र देवः स्वामीति चन्द्रह्रदः । जं० प्र० ३३० ।

**चंदद्धं**-चन्द्रार्द्धं-अष्टमीचन्द्रः । जीवा० २०७ ।



Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

**चंदन**–चंदन–मणिविशेषः । जीवा० २३ । काष्ठविशेषः । जीवा० १३६ । गन्धद्रव्यविशेषः । जीवा० १९१ ।

**चंदनकं**–अक्षम् । ओघ० १३५ ।

**चंदनघड**–चन्दनघटः चन्दनकलशः । प्रज्ञा० ८६ ।

**चंदनमाला**– । प्रश्न० १२७ ।

**चंदपडिमा**–चन्द्राकारा प्रतिमा चन्द्रप्रतिमा । व्य० द्वि० ३५६ अ ।

**चंदपरिवेस**–चन्द्रपरिवेषः–चन्द्रसमन्ताज्जामानः कुण्डलाकारस्तेजः परिधिः । भग० १९५ ।

**चंदपरिवेसो**–चन्द्रस्य परितो वलयाकारपरिणतिरूपः । जीवा० २८३ ।

**चंदपव्वत**–वक्षस्कारपर्वतविशेषः । ठाणा० ३२६,८० ।

**चंदपुत्तो**–चन्द्रपुत्रः । आव० ३९७ ।

**चंदप्पभ**–देवविमानविशेषः । सम० ८ । मथुरायां गाथापती । ज्ञाता० २५३ । चन्द्रप्रभा–सुराविशेषः । आव० ६९५ । शीतलनाथजिनस्य शिबिकानाम । सम० १५१ । चन्द्रकान्तः । जं० प्र० ५१ । जीवा० २३४ । चन्द्रप्रभः । प्रज्ञा० २७ । चन्द्रप्रभः–एकोरुकद्वीपे द्रुमविशेषः । जीवा० १४६ । चन्द्रकान्तः । मथुरानगर्यां भिण्डवडेंसकोद्याने गाथापतो । ज्ञाता० २५३ । धर्मकथाश्रुतस्कंधेऽष्टमवर्गे देवीचन्द्रप्रभाया विमानम् । ज्ञाता० २५३ । धर्मकथाश्रुतस्कंधेऽष्टमवर्गे देवीचन्द्रप्रभाया सिंहासनम् । ज्ञाता० २५३ ।

**चंदप्पभा**–चन्द्रस्येव प्रभा–आकारो यस्याः सा चन्द्रप्रभा सुराविशेषः । जीवा० ३५१ । जं० प्र० १०० । चन्द्रस्य ज्योतिषेन्द्रस्य प्रथमाऽग्रमहिषी । जीवा० ३८४ । चन्द्रस्येव प्रभा–आकारो यस्याः सा चन्द्रप्रभा मद्यविधिविशेषः । जीवा० २६५ । चन्द्रस्य प्रथमाऽग्रमहिषी । ठाणा० २०४ । जं० प्र० ५३२ । शिबिकाविशेषः । आव० १८४ । भग० ५०५ । चन्द्रप्रभा–चन्द्रस्येव प्रभा–आकारो यस्याः सा । प्रज्ञा० ३६४ । वर्धमानजिनस्य शिबिकानाम । सम० १५१ । चन्द्रस्येव प्रभा–आकारो-यस्याः सा चन्द्रप्रभा । जं० प्र० १०० । धर्मकथायाः अष्टमाध्ययने प्रथममध्ययनम् । ज्ञाता० २५२, २५३ । मथुरानगर्यां चंद्रप्रभगाथापतेर्दारिका । ज्ञाता० २५३ । धर्मकथाश्रुतस्कंधेऽष्टमवर्गे प्रथमाध्ययने देवी । ज्ञाता० २५३ ।

**चंदप्पह**–चन्द्रप्रभः–मणिभेदः । उत्त० ६९८ । पृथिवीभेदः । आचा० २९ । चन्द्रस्येव प्रभा–ज्योत्सना सौम्याऽस्येति, अष्टमजिनः, यस्मिन् गर्भगते देव्याश्चन्द्रपाने दोहदः चन्द्रसदृशवर्णश्च तेन चन्द्रप्रभः । आव० ५०३ ।

**चंदमग्गा**–चन्द्रमार्गाः–चन्द्रमण्डलानि । सूर्य० ९ । चन्द्रस्य मार्गाः-चन्द्रस्य मण्डलगत्या परिभ्रमणरूपा मण्डलरूपा वा मार्गा आख्याता इति चन्द्रमार्गाः । सूर्य० १३७ ।

**चंदमसं**–चान्द्रमसं–सौम्यापरनाम, मृगशिरोदेवता । जं० प्र० ४९९ ।

**चंदलेसं**–देवविमानविशेषः । सम० ८ ।

**चंदलेहिकं**–आभरणविशेषः । नि० चू० प्र० २५५ अ ।

**चंदवडिंसयं**–चन्द्रावतंसकं–चन्द्रविमानम् । जं०प्र० ५३३ ।

**चंदवडिंसो**–नियमस्थिरो नृपः । मर० ।

**चंदवण्णं**–देवविमानविशेषः । सम० ८ ।

**चंदसंवच्छर**–चन्द्रसंवत्सरः 'ससिसमगे' त्यादिलक्षणगाथा । सूर्य० १६८, १७१ ।

**चंदसाला**–चन्द्रशाला । आव० १२३ ।

**चंदसालिआ**–चन्द्रशालिका–शिरोगृहम् । जं० प्र० १०७ ।

**चंदसालिय**–चन्द्रशालिका–प्रासादोपरितनशाला । प्रश्न०८।

**चंदसालिया**–चन्द्रशालिका । शिरोगृहम् । जीवा० २६९ ।

**चंदसिंगं**–देवविमानविशेषः । सम० ८ ।

**चंदसिट्ठं**–देवविमानविशेषः । सम० ८ ।

**चंदसिरी**–मथुरानगर्यां चन्द्रप्रभगाथापतेर्भार्या । ज्ञाता० २५३ ।

**चंदसूरदंसणं**–चन्द्रसूरदर्शनं । अन्वर्थानुसारी तृतीयदिवसोत्सवः । विपा० ५१ ।

**चंदसूरदंसणिय**–चन्द्रसूर्यदर्शनं–उत्सवविशेषः । ज्ञाता० ४१ । चन्द्रसूर्यदर्शनिकाभिधानं सुतजन्मोत्सवविशेषः । औप० १०२ ।

**चंद्रसूरपरिवेसा**–चन्द्रादित्ययोः परितो वलयाकारपुद्गलपरिणतिरूपाः सुप्रतीता । अनु० १२१ ।

**चंदसूरोवरागा**–चन्द्रसूर्योपरागाः–राहुग्रहणानि । अनु० । १२१ ।



Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

**चंदा**–चन्द्रः-चन्द्रमाः सोमस्याज्ञोपपातवचननिर्द्देशवर्ती देवः। भग० १९५। चन्द्रा–चन्द्रराजधानी। जंबू० प्र० ५३३। चन्द्राः–ज्योतिष्कभेदविशेषः। प्रज्ञा० ६९।

**चंदाणण**–जम्बूद्वीपे ऐरावतक्षेत्रे प्रथमो जिनः। सम०१५३। चन्द्राननं–चन्द्रप्रभजन्मभूमिः। आव० १६०।

**चंदाणणा**–शश्वती प्रतिमानाम। ठाणा० २३०। चन्द्रानना–चन्द्राननप्रतिमा। जीवा० २२८।

**चंदाणयं**– । नि० चू० प्र० ३०६ आ।

**चंदाभ**–देवविमानविशेषः। सम० १४। चन्द्राभः–कुलकरनाम। जं० प्र० १३२। पञ्चमं लोकान्तिकविमानम्। भग० २७१। ठाणा० ४३२।

**चंदायण**–चान्द्रायणः–अभिग्रहविशेषः। व्य० द्वि० ३३४ आ।

**चंदालगं**–चन्दालकं–देवातार्चनिकाद्यर्थं ताम्रमयं भाजनम्। सूत्र० ११८।

**चंदावत्तं**–देवविमानविशेषः। सम० ८।

**चंदावली**–चन्द्रावली-तडाकादिषु जलमध्यप्रतिबिम्बितचन्द्रपङ्क्तिः। जीवा० १९१। तटागादिषु जलमध्ये प्रतिबिम्बिता चन्द्रपङ्क्तिः। जं० प्र० ३५।

**चंदिमा**–चन्द्रमा–ज्ञातायां दशममध्ययनम्। सम० ३६। उत्त० ६९४। ज्ञाता० १०। आव० ६५३। अनुत्तरोपपातिकदशानां तृतीयवर्गस्य षष्ठमध्ययनम्। अनुत्त०२।

**चंदुत्तरवडिंसगं**–देवविमानविशेषः। सम० ८।

**चंदोत्तरणं**–कोशाम्ब्यामुद्यानविशेषः। विपा० ६८।

**चंदोदयं**–चन्द्रोदयं–चन्द्राननापुर्यां चन्द्रावतंसराज्ञ उद्यानम्। पिण्ड० ७६।

**चंदोयरणंसि**–उद्दंडपुरनगरे चैत्यविशेषः। भग० ६७५।

**चंदोवतरणे**–कौशाम्बीनगर्यां चैत्यविशेषः। भग० ५५६।

**चंदोवराग**–चन्द्रोपरागः–चन्द्रग्रहणम्। जीवा० २८३। भग० १९६।

**चंदोवराते**–चन्द्रस्य–चन्द्रविमानस्योपरागो–राहुविमानतेजसोपरञ्जनं चन्द्रोपरागो ग्रहणमित्यर्थः। ठाणा० ४७६।

**चंपं**–चम्पा–यत्र वासुपूज्यस्वामिपादमूले तरुणधर्मा पद्मरथो राजा प्रव्रजितुं गतः। आव० ३९१। नगरीविशेषः। आव० २१३, २२५।

**चंपक**–वृक्षविशेषः–आद्यंद्विपेषु तु विविधसुगन्धिगन्धवस्तुनिकुरम्बोन्मिश्रविमलशीतलसलिलसेकात् तत्प्रकटनं घ्राणेन्द्रिय ज्ञानस्य। विशे० ९९।

**चंपकच्छल्ली**–सुवर्णचम्पकत्वक्। जीवा० १९१।

**चंपकदमनक**–गन्धद्रव्यविशेषः। जीवा० १९१।

**चंपकपट्टं**–फलकविशेषः। उत्त० ४३४।

**चंपकप्पिओ**–चम्पकप्रियः–पार्श्वस्थदृष्टान्ते कुमारः। आव० ५२०।

**चंपकभेद**–सुवर्णचम्पकच्छेदः। जीवा० १९१।

**चंपकलया**–लताविशेषः। प्रज्ञा० ३०।

**चंपगकुसुमं**–चम्पककुसुमं–सुवर्णचम्पककुसुमम्। जीवा० १९१।

**चंपगजीइ**–गुल्मविशेषः। प्रज्ञा० ३२।

**चंपगपट्ट**–फलयविसेसो। नि० चू० प्र० ३५७ आ।

**चंपगपुड**–पुष्पजातिविशेषः। गन्धद्रव्यविशेषः। ज्ञाता० २३२।

**चंपगवण**–चम्पकवनं, वनखण्डनाम। जं० प्र० ३२०। ठाणा० २३०।

**चंपगलया**–लताविशेषः। प्रज्ञा० ३२।

**चंपगेइ**–चम्पकः–सामान्यतः सुवर्णचम्पको वृक्षः। जं० प्र० ३४।

**चंपगो**–चम्पकः–वृक्षविशेषः। जीवा० २२२।

**चंपतो**–किंपुरुषाणां चैत्यवृक्षः। ठाणा० ४४२।

**चंपय**–मुनिसुव्रतस्वामिजिनस्य चैत्यवृक्षः। सम० १५२।

**चंपयकुसुमं**–चम्पककुसुमं–सुवर्णचम्पकवृक्षपुष्पम्। प्रज्ञा० ३६१।

**चंपयछल्ली**–चम्पकछल्ला–सुवर्णचम्पकत्वक्। प्रज्ञा० ३६१।

**चंपयभेदे**–चम्पकभेदः सुवर्णचम्पकस्य भेदो द्विधाभावः। प्रज्ञा० ३६१।

**चंपयवडिंसए**–चम्पकावतंसकः। भग० १९४।

**चंपयवणं**–चम्पकवनम्। भग० ३६। आव० १८६।

**चंपरमणिज्ज**–चम्परमणीयः–उद्यानविशेषः। आव०२०२।

**चंपा**–चम्पापुरी। उत्त० ३७९, ३८०। जितशत्रुराजस्य नगरी। ज्ञाता० १७३। उत्त० ९२। क्षितिप्रतिष्ठितस्य पञ्चमं नाम। उत्त० १०५। पालितसार्थ-



Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

वाहवास्तव्या नगरी । उत्त० ४८२ । कपिलवासुदेवस्य नगरी । ज्ञाता० २२२ । उत्त० ३२१, ३२४ । नगरी, दत्तराजधानी । विपा० ६५ । संवेगोदाहरणे नगरी । आव० ७०६ । सङ्गपरिहरणविषये नगरी । आव०७२३। आर्जवोदाहरणे नगरी । आव० ७०४ । स्त्रीलोलुपसुवर्णकारवास्तव्यानगरी । आव० ६५ । द्रव्यव्युत्सर्गे दधिवाहननगरी । आव० ७१६ । वासुपूज्यस्वामिनो जन्मभूमिः । आव० १६० । चक्षुरिन्द्रियान्तर्दृष्टान्ते नगरी । आव० ३६६ । नगरीविशेषः । आव० २१२ । कुमारनन्दीवास्तव्या नगरी । आव० २६६ । इहलोके कायोत्सर्गफलदृष्टान्ते पुरी । आव० ७६६ । जिनदत्तस्य पुत्रीसुभद्रोदाहरणे नगरी । दश० ४६ । कुणिकराज्ञो राजधानी । भग० ३१६ । अङ्गेषु आर्यक्षेत्रम् । प्रज्ञा० ५५ । नगरीविशेषः । औप० १ । प्रज्ञा० ५५ । अन्त० १ । कोणिकराजधानी । ज्ञाता० १ । अन्त० २५ । ज्ञात० २५२ । भग० ४८४, ६१८, ६२० । धन्नसार्थवाहवास्तव्या नगरी । ज्ञाता० १६३ । चम्पा । ज्ञाता० १२५, १३२ । माकन्दीसार्थवाहवास्तव्या नगरी । ज्ञाता० १५६ । ना रदत्तसार्थवाहवास्तव्या नगरी । ज्ञाता० २००, २०५ । कुणिकराजधानी । निरय० ४, १६ । नगरीविशेषः । उपा० १६ । जितशत्रुराज्ञो नगरी । उपा० १६ । सुभद्रावास्तव्या नगरी । व्य० प्र० ११७ अ । अनंगसेनसुवर्णकारवास्तव्यं नगरम् । बृ० तृ० १०८ आ । अनङ्गसेनवास्तव्यं नगरम् । नि० चू० प्र० ३४५ अ । खंधगरायरायहाणी । नि० चू० तृ० ४४ अ । योगसंग्रहे आपत्सु दृढधर्मदृष्टान्ते नगरी । आव० ६६७ । सुनन्दवणिग्वास्तव्या नगरी । उत्त० १२३ । दधिवाहनराजधानी । उत्त० ३००, ३०२ । शय्यम्भवसूरिविहारभूमिः । दश० ११ । रविविषयप्रश्ननिर्णये नगरी । भग० २०६ । लोभपिण्डदृष्टान्ते पुरी । पिण्ड० १३३, १३६ । कोणिकराजधानी । विपा० ३३ । प्रश्न० १ । भग० ६७५ ।

**चंपानयरि-** । ज्ञाता० २०८ ।

**चंपाप्रविभक्ति-**त्रयोदशनाट्यभेदः । जं० प्र० ४१७ ।

**चंपे-**चम्पकः-वृक्षविशेषः । प्रज्ञा० ३६१ ।

**चंमं-**चर्ममयं तूलिकाद्युपकरणम् । बृ० द्वि० १०० आ ।

**चंमतियं-**आस्तरप्रावरणोपवेशनोपयोगिकृत्तितूलिकावर्ध्रूपं वा । बृ० द्वि० २५३ अ ।

**च-**प्रकृतमनुकर्षति । उत्त० १६७ । प्रस्तावनायाम् । विशे० १०३६ । वा । उत्त० २०६ । जं० प्र० ४५६ । चशब्दश्चेदित्येतस्यार्थे वर्त्तते । भग० ४६८ । उक्तसमुच्चयार्थः । आव० ८ । एवकारार्थः । आव० १० । चः-आधिक्यार्थे । आचा० ५५ । पूरणार्थः । आव० १२ । च शब्दः-समाहारेतरेतरयोगसमुच्चयान्वाचयावधारणपादपूरणाधिकवचनादिष्विति । ठाणा० ४६५ । अपिशब्दार्थः । उत्त० ४७६ । आभिनिबोधिकश्रुतज्ञानयोस्तुल्यकक्षतोद्भावनार्थः । आव० ७ पृथक् पृथक् अवग्रहादिस्वरूपस्वातन्त्र्यप्रदर्शनार्थः । आव० ६ । इवादेशः । जं० प्र० २०० । अधिकवचनः । आचा० १०२ ।

**चइओ-** । त्याजितः । ओघ० ६० ।

**चइत्ता-**त्यक्त्वा, अथवा च्युत्वा, कृत्वा । भग० १२६ । चित्वा कृत्वेति । औप० १०१ ।

**चइय-**च्यावितः-स्वत एवायुष्कक्षयेण भ्रंशितः । भग०२६३। त्याजिता-भोज्यद्रव्यात् पृथक्कारिता दायकेन । भग० २६३ । च्यावितः-ताभ्य एवायुःक्षयेण भ्रंशितः । त्याजितः-देयद्रव्यात्पृथक्कारितो दायकेन । प्रश्न० १०८ ।

**चइया-**त्याजिताः । ओघ० १५८ ।

**चउक्क-**चतुष्कं-रथ्याचतुष्कमेलकम् । औप० ४ । रथ्याचतुष्कमीलकः । औप० ५७ । आव० १३६, २०७ । रथ्याचतुष्कमीलनस्थानम् । भग० १३७, २००, २३८ । प्रश्न० ५८ । चतुष्पथयुक्तम् । ज्ञाता० २८ । जीवा० २५८ । प्रभूतगृहाश्रयश्चतुरस्रो भूभागः चतुष्पथसमागमो वा चतुष्कम् । अनु० १५६ । यत्र रथ्याचतुष्टयम् । ठाणा० २६४ ।

**चउक्का-** । चक्रे । नि० चू० तृ० १२१ आ ।

**चउगर-** । भग० ४६४ ।

**चउचरणगवी-**चतुश्चरणगौः । आव० १०३ । चतुर्णां चरणानां सम्बन्धिनी सा गौः । विशे० ६३५ ।

**चउजमलपय-**चतुर्यमलपदं-द्वात्रिंशदङ्कस्थानलक्षणं, चतुर्विंशतेरङ्कस्थानानामुपरितनाङ्काष्टकलक्षणं वा । अनु०



Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

२०६ ।

**चउजायग**–चतुर्जातकं– त्वगेलाकेसराख्यगन्धद्रव्यमरिचात्मकम् । जीवा० ३५५ ।

**चउत्थं**–चत्वारि भक्तानि यत्र त्यज्यन्ते तच्चतुर्थं, इयं चोपवासस्य संज्ञा । ज्ञाता० ७३ । चतुर्थं भक्तं यावद् भक्तं त्यज्यते यत्र तच्चतुर्थ, उपवासस्य संज्ञा । भग० १२५ । मेहुणं । नि० चू० द्वि० १६६ आ ।

**चउत्थगं**–चतुर्थं–एकमुपवासम् । ओघ० १३६ ।

**चउत्थभत्त**–चतुर्थभक्तं–केवलं एकं पूर्वदिने द्वे उपवासदिने चतुर्थं पारणकदिने भक्तं-भोजनं परिहरति यत्र तपसि तत् चतुर्थभक्तम् । ठाणा० १४७ । चतुर्थभक्तं एकदिनान्तरितः । जं० प्र० १३२ ।

**चउत्थभत्तस्स**–चतुर्थभक्ते एकस्मिन् दिवसेऽतिक्रान्ते इत्यर्थः। प्रज्ञा० ५०५ ।

**चउदसभत्तं**–चतुर्दशभक्तं–षड्रात्रोपवासः। आव० १६८।

**चउदसरूवी**–चतुर्दशोपकरणधारी । बृ० द्वि० २३७ आ ।

**चउदिसि**–चतुर्दिक–चतस्रो दिशः समाहृताः । जीवा० २२२ ।

**चउपुरिसपविभत्तगती**–चतुःपुरुषप्रविभक्तगतीः–चतुर्द्धा पुरुषाणां प्रविभक्तगतिः, विहायोगतेश्चतुर्दशो भेदः । प्रज्ञा० ३२७ ।

**चउप्पडोआरे**–चतुर्षु–पूर्वापरविदेहदेवकुरूत्तरकुरुरूपेषु क्षेत्रविशेषेषु प्रत्यवतारः–समवतारः, चतुर्विधस्य पर्यायो वा । जं० प्र० ३१२ ।

**चउप्पडोयारे**–चतुर्षु भेदलक्षणालम्बनानुप्रेक्षालक्षणेषु पदार्थेषु प्रत्यवतारः–समवतारो विचारणीयत्वेन यस्य तच्चतुष्प्रत्यवतारः । भग० ६२६ ।

**चउप्पय**–चतुष्पदं–नवमं करणम् । जं० प्र० ४६३ । चत्वारि पदानि येषां ते चतुष्पदाः–अश्वादयः । प्रज्ञा० ४४ । जीवा० ३८ ।

**चउप्पाइय**–चतुष्पादिकः–भुजपरिसर्पः तिर्यग्योनिकः । जीवा० ४० ।

**चउप्फलं**–कल्पं । नि० चू० प्र० १६१ आ ।

**चउप्फला**–पुट । नि० चू० प्र० १८० आ ।

**चउप्फाला**– । ज्ञाता० ५३ ।

**चउफास**–चतुःस्पर्शं–सूक्ष्मपरिणामम् । भग० ६६ ।

**चउब्भाइय**–घटकस्य–रसमानविशेषस्य चतुर्थभागमात्रोमानविशेषः । भग० ३१३ ।

**चउब्भागपलिओवमं**–चतुर्भागमात्रं पल्योपमं चतुर्भागपल्योपमम् । जं० प्र० ५३६ ।

**चउब्भागमंडलं**–चतुर्भागमण्डलम् । सूर्य० २१, २७ ।

**चउभाइया**–चतुष्षष्ठिपलमाना चतुर्भागिका । अनु०१५२ ।

**चउभागपल्लोवमं**–चतुर्भागः पल्योपमस्य चतुर्भागपल्योपमम् । जीवा० ३८५ ।

**चउमासिआ**–चतुर्थी भिक्षुप्रतिमा । सम० २१ ।

**चउमुहं**–चतुर्मुखम् । आव० १३६ ।

**चउम्मुह**–चतुर्मुखं–देवकुलादि । ठाणा० २६४ । भग० २३८ । चतुर्मुखदेवकुलिकादि । अनु० १५६ । तथाविधदेवकुलकादि । औप० ५७ । प्रश्न० ५८ । चतुर्द्वारं देवकुलादि । भग० २३८, औप० ४ । यस्माच्चतसृष्वपि दिक्षु पन्थानो निस्सरन्ति । जीवा० २५८ । चतुर्मुखम् । भग० २०० ।

**चउरंगं**–अश्वा गौः सगड पाइक्का । नि० चू० प्र० ८६ आ ।

**चउरंगिज्जं**–चतुरङ्गीयं–उत्तराध्ययनेषु तृतीयमध्ययनम् । उत्त० ६ ।

**चउरंतं**–चतुरन्तं–चतुर्विभागम् । प्रश्न० ६३ । चतुरन्तं दानादिभेदेन चतुर्विभागं, चतसृणां वा नरनारकादिगतीनामन्तकारित्वाच्चतुरन्तम् । भग० ७ ।

**चउरंतगमाइया**–चतुरन्तगमादिका,शारिपट्टादिका। आव० ५८१ ।

**चउरंतचक्कवट्टी**–चतुरन्तचक्रवर्ती-त्रिसमुद्रहिमवत्परिच्छिन्नेषु चतुर्ष्वन्तेषु चक्रेण वर्त्तितुं शीलं यस्यासौ । जीवा० २७८ ।

**चउरंस**–चतुरस्रं–चतुष्कोणम् । जीवा० २७६ । चतुरस्रः । भग० ८५८ । चतुरस्रः–संस्थानविशेषः । प्रज्ञा० २४२ ।

**चउरंससंठाणपरिणया**–चतुरस्रसंस्थानपरिणताः । प्रज्ञा० ११ ।

**चउर**–चतुरः–दक्षः । ठाणा० ३६७ । अनु० १३३ ।

**चउरग**–चकोरकः–पक्षिविशेषः । प्रश्न० ८ ।



Jain Education International 2010_05 For Private & Personal Use Only www.jainelibrary.org

**चउल–** । भग० ८०३ ।

**चउवग्गो–**णामवत्थव्वा संजयासंजतीओ वि आगंतुगा संजता संजतीओ य । नि० चू० द्वि० १५५ आ ।

**चउवीसइत्थय–**चतुर्विंशतिस्तवः–आवश्यकसूत्रे द्वितीयमध्ययनम् । आव० ४९६ ।

**चउसट्ठिआ–**चतुष्पलप्रमाणा–चतुषष्ठिका । अनु० १५१ ।

**चउसट्ठिकला–**चतुःषष्ठिकला । आव० ५५ ।

**चउसट्ठिगुणा–**चतुःषष्ठिगुणा । उत्त० ४८४ ।

**चउसट्ठिया–**चतुषष्ठिका–पलं मानविशेषः, तस्यैव चतुषष्ठितमांशस्वभावापलमिति तात्पर्यम् । भग० ३१३ ।

**चउसरणगमण–**अर्हत्सिद्धसाधुकेवलिप्रज्ञप्तधर्मशरणकरणम्। चउ० ।

**चउसाले–** । नि० चू० प्र० २६० अ ।

**चउसालयं–**चतुःशालकम् । जीवा० २६९ ।

**चउसुवग्गेसु–**संजतिसंजयसावगसाविगाण य एते । नि० चू० प्र० २२७ आ ।

**चओ–**चयः–स्तोकतरा वृद्धिः । पिण्ड० ४१ । पिण्डनेत्यर्थः । नि० चू० प्र० २० आ ।

**चओवचइयं–**चयापचयिकं–वृद्धिहन्यात्मकम् । आचा० ६६ ।

**चकार-छकार-जकार-झकार-ञकार-प्रविभक्तिनाम–**षोडशो नाट्यविधिः । जीवा० २४७ ।

